ये विवक्षिते उपसर्गाः पृथक् क्रियन्त इति तत्रैव यथा उभौ यदि ह दत्यत्र वसते पर्यष्टमाचष्ट इति णिचि कार्यसंपेक्षते यदि ह दष्याति स्यब्रव
तीति तन्नो ज्ञापकांतरं मृग्यं संतमं च किंचिदुक्तं यथाभिधानं सर्वमिति स्थितमुपरम्यते ॥ १२ ॥

॥ लोहितादि ॥ ॥ परस्परायतीति। अव्यक्तानुकरणादित्यतोऽचि विवक्षितेऽचिबहुलं छन्दसि भवत इति द्विर्वचनं ततोऽच्परस्य टाकारस्तिष्ठति ततो नित्यमाम्रेडिते डाचीति पररूपत्वं हस्तयकारः पश्चापरः पकारस्तयोः पररूपं पकारः। लोहितडाजभ्यः क्यष्वचनं भृशादिष्वितराणीति वार्तिकं तदेतत् स्थिताभिप्रायं न पुनरनेन लोहितादिग्रहणं प्रत्याख्यायत इत्याह यानि पठ्यन्त इति। निद्राकरुणाकृपाशब्दा वृत्तिविषये तद्वति वर्त्तन्ते अनिद्रो निद्रावान् भवति अकरुणः करुणावान् भवति अकृपः कृपावान् भवतीत्यत्रार्थे प्रत्ययः। अथ यत्पठितेभ्यस्तु क्यषेव भवतीत्यस्योपपादनमाकृतिगणश्चायमिति। कुत इत्यत आह तथा चेति। कः पुनः सामान्यग्रहणार्थः ककारः काऽर्थश्चेति अपत्यस्येति तृतीयेन चायमापत्स्यते इष्यते उच्यते हि कास्याविभाषाह

॥ लोहितादिडाज्भ्यः क्यष् ॥ ॥ लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष् प्रत्ययो भवति। लोहितायति लोहितायते। डाजन्तेः पटपटायति पटपटायते। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि। यानि पठ्यन्ते तेभ्यः क्यङेवाप्रत्ययः पठितेभ्यस्तु क्यषेव भवति। वर्मायति वर्मायते निद्रायति निद्रायते करुणायति करुणायते कृपायति कृपायते। आकृतिगणोऽयं तथा च ककारः सामान्यग्रहणार्थोऽनुवध्यते नः क्याच्छन्दसि इति नहि पठितानां ग्रहणेन कारणं तत्र दृष्टोऽस्ति ॥ ॥

इति निवर्त्तितेन चायं हलन्तादिष्यते उच्यते हि मा च्छन्दसि एतयाच्छन्दसीति विकल्पस्मृतिप्रणपुरितिकं हा दियगन्तादपि यथास्यादिति गाकारस्यैतद्वायादि संवास्तु नचैवं पाशादिभ्यो पः पाशपाऽत्र प्रसङ्गः सामान्याभिहितानां तिङां नियमार्थं प्रकरणं न च पाशादिपास्यस्मैपदमात्मनेपदं वाप्राप्तमस्ति अथ व्याचारकिं वा तान्तं भवेत् स्वमपि स्यापथ इत्येवास्तु तत्राह नः क्यच इति। ककारमनुवन्धमास्मन्ततः स्ववकारस्याप्याकृतिगणत्वमभिप्रेतमित्याह नहीति। भाष्ये लोहितादिग्रहणं प्रत्याख्यानपरमेव वार्त्तिकं व्यारभ्यातं ककारो विप्रत्याख्यानतः। कथं पुनः पटपटायतीति का षष्ठीयोगे डाज् भवति यावता कृभ्वस्तियोगे

सविधीयते तत्राह ॥ ॥

कलस्त्तिमिरिक्रेस्या दिभवलर्थेक्यष विधीयते सभवतिप्रयोगेनभवन्तितेनैवोक्तलात्तस्यार्थस्यातो भवतेरप्रयोगा एवंवा क्यसोभवितव्यं यादि क्यस
षायोगे ऽराचनएष्डाजंतालक्षविधानमनुपपन्नं स्यादितिभावः। अथकिमर्थंवात्यषइतिस्त्रमारभ्यतेनवाक्षेतिचकारोत्रकर्तव्यः लोहितादिभ्यः क्यषभ
वतिचकारात्क्यङ्चतत्रक्यङ्पक्षेआत्मनेपदंक्यषपक्षेपरस्मैपदमितिसिद्धमिष्टं अहोस्तक्ष्मटर्शदेवानांप्रियः यदिदमपिनहष्टं क्यङ्ङाज्ञातिनोश्चेतिस्हत
हिप्रातिपदिकग्रहणोलिङ्गविशिष्टस्यापिग्रहणमितिलोहिनीशब्दादप्यर्यं क्यषभवतिसतिचैवंक्यङ्तदात्मनेपदंक्यषंतात्परस्मैपदमितिविज्ञापमा
नेआत्मनेपदपक्षेक्यङ्ङानिनोश्चेतिपुंवद्भावेतिसलोहितीलोहिनीभवतिलोहितायतइतिप्राप्नोतिअथपुनः क्यषंतात्तदात्मनेपदेविकल्पितेलोहि
नीयतेलोहिनीयतातीष्टमिष्यतीतिसिद्धएवफलभेदः॥ ॥कष्टायक्रमणे॥ ॥चतुर्थीसमर्थादिति। संगतार्थः चतुर्थीसमर्थइतितलीयासमासः

क्यच्स्तिमिरिक्यषापियोगेऽजभवतीत्येतदेववचनंज्ञापकं अच्चेरित्यनुवृत्तेरप्युततज्ञावेक्यषप्रविज्ञायते लोहितनी
लहरितमद्रफेनमंद लोहितादिः॥ ॥कष्टायक्रमणे॥ ॥क्यङ्नुवर्ततेतस्मात्कष्टशब्दाच्चतुर्थीसमर्थात्क्रमणेर्थेनार्ज
वेक्यङ्प्रत्ययोभवति कष्टायकर्मणोक्रामतिकष्टायते अत्यल्पमिदमुच्यतेसत्रकष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायां
मितिवक्तव्यं कण्वचिकीर्षायामितिवक्तव्यंकण्वचिकीर्षापापंचिकीर्षतित्येतस्मिन्नर्थेभ्यः क्यङ्प्रत्ययोभवति सत्रायतेकक्षा
यतेकक्षायतेकस्रायतेगहनायते कण्वचिकीर्षायामिति किं अजः कष्टंक्रामति॥ १४॥

प्रत्ययार्थेनक्रमणेनसहसंगतार्थत्वंयस्यचतुर्थ्यन्तंतस्मादित्यर्थः एतच्चकष्टायेतिनिर्देशादेवलभ्यते क्रमणाशब्दस्यपादविहरणेप्रसिद्धत्वात्त
त्रैवप्रत्ययोमाविज्ञायीत्याहक्रमणेअनार्जवइति॥ अनार्जवंकौटिल्यंइहत्वनार्जवशब्देनार्जवकरणस्यैक्रमणोपपर्यवस्यत्यर्थात् किंपुनःक्रम
णमुत्साहःयथामोक्षकरणाध्ययनायक्रमतेउत्सहतइत्यर्थइतिभाष्यात्। कष्टायकर्मणोक्रमतइतिकृच्छ्रगहनयोःकषइतिकृच्छ्रइडभावःकष्टं
दुःखंदहतुतत्कारणांपापंकर्मच्छिद्रंपापंकर्मकर्तुमुत्सहतइत्यर्थः वृत्तिसर्गइतिसर्गआत्मनेपदंप्रयोगानुपरस्मैपदंयद्यतेतत्रयापकर्मकर्तुंकामः
कुटिलमाचरतीत्यर्थः अनुत्साहत्वात्परस्मैपदं। अत्यल्पमिदमुच्यतइति॥ सर्वलक्ष्यासंग्रहात् कथंतर्हिवक्तव्यमित्याहसत्रकक्षेत्यादि। अस्मिन्स
न्नेछित्तीयांतेभ्यःप्रत्ययःचिकीर्षप्रतिकर्मत्वात्। कण्वचिकीर्षायामितिप्रकृतिप्रत्ययसमुदायस्यायमर्थनिर्देशः कण्वपापंसत्रादयोहित्रिविध
पापपर्यायाः। तेभ्यश्चिकीर्षायांप्रत्ययःस्यात्पापंचिकीर्षतीत्यस्यपदेनविग्रहः अजः कष्टंक्रामतीति। क्रमिरत्रपादविक्षेपवर्तीतिकष्टंगहनदेशंक्रामति

२९

का॰प॰३१
१५

॥कर्मणो रोमंथ॥ ॥कर्मण इति पंचमी रोमंथतपोभ्यामित्यनेन समानाधिकरणात् प्रत्येकसंबंधाच्चैकवचनं वर्त्तीति तिङ्पंताद्धेतोर्यत्स्वस्ययो
ऽजिति युचि प्राप्ते तस्मात् द्वंदनिपातनात् क्तिन् । युजयि भवति वर्त्तनाच्चाणां चरसंपदादित्वात् द्रावेक्षि प्रहनुचलन इति । हनुचलनसहचरीतं चर्वितस्य पुरव
प्रदेशे आकृष्य चर्वणात् तत्रेत्यर्थः । कोटो रोमंथं वर्त्तयतीति । अपगीर्णमित्यन्यप्रदेशान्निःसृत रोमंथायां दृव्यं वर्त्तयति हस्तं करोति गुलिकां करोती
त्यर्थः । नात्र हनुचलनमस्ति तपसः परस्मैपदं चेति एवं च नमो वरिवश्चित्रङ इति सूत्रे तपसः शब्दः पठितव्यस्तथा तु नकृतमित्येव हतपस्यते लोकं जिगी
षुरत्रेरितिच्छांदसत्वादात्मनेपदं ॥ ॥सुखादिभ्यः॥ ॥वेदनायामिति । विदं चेतनाख्यान निवासेष्विमस्मा ज्युरादिराणंतात् द्रावेण स प्रत्ययो युचाच

॥कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः॥ ॥रोमंथशब्दात्तपः शब्दाच्च कर्मणो यथाक्रमं वर्त्तिचिरोरर्थयोः क्यङ् प्रत्ययो भवति । रोमं
थं वर्त्तयति रोमंथायते गौः हनुचलन इति वक्तव्यं । इह मा भूत् कीटो रोमंथं वर्त्तयति । तपश्चरति तपस्यति ॥ ॥बाष्पो
ष्मभ्यामुद्वमने॥ ॥कर्मण इति वर्त्तते बाष्पशब्दादूष्मशब्दाच्च कर्मण उद्वमनेऽर्थे क्यङ् प्रत्ययो भवति । बाष्पमुद्वमति बाष्पायते । ऊष्मा
यते । फेनाच्चेति वक्तव्यं फेनमुद्वमति फेनायते ॥ ॥शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥ ॥शब्दवैरकलह अभ्र कण्व मेघ इत्येते
भ्यः करणे करोत्यर्थे क्यङ् प्रत्ययो भवति । शब्दं करोति शब्दायते वैरायते कलहायते अभ्रायते कण्वायते मेघायते । सुदिनदुर्दिननीहा
रेभ्यश्चेति वक्तव्यं सुदिनायते दुर्दिनायते नीहारायते । अटाट्टाशीकाकोटापोटासोटा घाग्रहणं कर्त्तव्यं । अटायते शीकायते को
टायते पोटायते सोटायते घाग्रायते ॥ ॥सुखादिभ्यः कर्तृवेदनायां॥ ॥कर्मग्रहणमनुवर्त्तते सुख इत्येवमादिभ्यः कर्मभ्यो वेद
नायामर्थे क्यङ् प्रत्ययो भवति वेदयितुश्चेत् कर्त्तुः संबंधीनि सुखादीनि भवंति । सुखं वेदयते सुखायते दुःखायते । कर्तृग्रहणं
किं सुखं वेदयति प्रसाधको देवदत्तस्य सुखदुःखग्रहनकच्छ्रअस्रअलीकप्रतीतयकरुणकृपणसो

रामः
१५

दिव्यादिविदित्यपृथ्वेसोपसंख्यानिको वा वेदनाशी यामर्थे नु भवकृतिप्रत्ययसंज्ञानमनुभवः यद्यपि वेदनाशब्दो ज्ञानमात्र वचनस्तथापि कर्तृग्रहणेन सु
खादीनि विशेष्यंते कर्तृगतानां च सुखादीनां वेदनानुभवरूपैवेति मत्वैवमुक्तं । क्रियापेक्षकर्तृत्वं वेदनासंनिधानात् तदपेक्षमेव विज्ञायते कर्त्तृत्वं च
सुखादीनि विशेष्यंते नवैनाप्यभिचाराभावात् । सर्वैव हि वेदना वेदयितुरेव भवति तद्देत इह वेदयितुश्चेत्कर्त्तुः सुखादीनि भवंतीति आश्रयाश्रयि
भावलक्षणश्चायं संबंधोपि भावलक्षणश्च संबंधो न जन्यजनकभावलक्षणः एवं च कर्तृग्रहणेन लुप्तषष्ठीकं पृथक्पदं वेदयतत्वइति । आकुस्मादात्मनेपदी
सधिकारो वेदिः पठितः एवं च प्रत्युदाहरणे परस्मैपदपाठः प्रमादजः । प्रसाधको ग्योगादेः कर्त्तृसिध्यसाध्यमानस्य नेत्रविकारादिना सुखमनुमानतो जानाति ॥

॥नमोवरिवः॥ ॥करणे विशेषे पूजादाविति। करणइतिसामान्यानुवृत्तावपि क्यच्विधानशक्तिस्वाभाव्याद्विशेष उपलभ्यतइतिभावः। नमस्यतिदे
वानितिनमः स्वस्तिस्वाहेतिचतुर्थीनभवतिप्रत्ययार्थेगुणीभूतस्यनमः शब्दस्यतिङन्तसंबंधाभावात्। अथवानमस्यतिनमस्कारेणाद्रियतइत्यर्थः। तत्रो
पपदविभक्तेः कारकविभक्तिर्बलीयसीतिद्वितीयैवभवति। एवं चनमस्कारोतिदेवानित्यत्रापि द्वितीयैवभवति। परिचर्यायामिति परिचर्याशुश्रूषा
चित्रीयतइति। आश्चर्ये कर्तृलिंगंसमुदायस्यविशेषकं भवतीति। ङकारात्मनेपदं भवति। काचिचितीत्वं एतदर्थमेवचशब्देगणि सूत्रे चित्रशब्दोनपठि

नमोवरिवश्चित्रङः क्यच्॥ ॥करणइतिवर्ततेनमस्वरिवसचित्रङ् इत्येतेभ्यः क्यच्प्रत्ययोभवतिकरणे विशेषेपूजा
दौ। नमसः पूजायांनमस्यतिदेवान्। वरिवसः परिचर्यायां वरिवस्यतिगुरून्। चित्रङ आश्चर्ये चित्रीयते। ङकारआत्मनेप
दार्थः॥ ॥पुच्छभाण्डचीवराण्णिङ्॥ ॥करणइतिवर्ततेपुच्छभाण्डचीवरइत्येतेभ्योणिङ्प्रत्ययोभवतिकरणे
विशेषे। पुच्छादुदसनेपर्यसनेवा। उत्पुच्छयतेपरिपुच्छयते। भाण्डात्समाचयने। संभाण्डयते। चीवरादर्जनेपरिधानेवा
संचीवरयतेभिक्षुः। ङकारआत्मनेपदार्थः। णकारः सामान्यग्रहणार्थः णेरनिटीति॥ ॥१४॥ ॥

तः। चित्रीयतइतिविस्मयतइत्यर्थइत्येकेविस्मापयतइत्यर्थइत्यन्येतथाचभट्टिकाव्ये मायामृगं प्रकृत्यभवतिततश्चित्रीयमाणोसाविति॥ ॥
पुच्छतांडा॥ ॥पुच्छादुदसनेपर्यसनेवेति। उदसनमुत्क्षेपणं पर्यसनंपरितः क्षेपणं। उत्पुच्छयतइति। ननु यथाकाचारेकाडि विहितेआङः क्षमो
नभवतितत्कस्यहेतोः आङ्विशिष्टस्यैववाल्यर्थस्य मनोभिधानात् तद्वदिहाप्युत्क्षेपणोतिरोविधानादुदः प्रयोगोनप्राप्नोतीति। अस्त्वत्रवि
शेषः पर्यसनेप्ययंविधीयतेतत्रोदसनंयोतयितुमुच्छब्दः पर्यसनंयोतयितुंपरिशब्दश्चप्रयोक्तव्यः। समाचयनंराशीकरणं आर्जनंद्रव्यलाभो
पायोयाञ्चादिः ङकारआत्मनेपदार्थइति। तेनोक्तसूत्रेपुच्छादयोनद्रव्यायन्तुमितिभावः॥ ॥१४॥ ॥छ॥ ॥छ॥ ॥

॥ मुंडमिश्र ॥ ॥ किमर्थमिदं न प्रातिपदिकाद्धात्वर्थ इत्येवमिद्धं न च तत्करोतीत्यादिना तत्र धात्वर्थनियमः क्रियते राजानमतिक्रांतवानसरराज
दित्यपि दर्शनात् मुंडं करोतीति मसावकमित्यादीनामेव व्येभ्यो णिच् यथासादित्येवमर्थं प्रपंचार्थं वा हलिकल्योरत्वं देतत्तन्निपातनार्थं अस्य थाह
लिं कलिं इति णिचि नेत्र चो णिजित्ती ति वृद्धिः प्राप्नोति णाविष्ठवदिति टिलोपश्च तत्र लोपः श्र्वांतरस्थत्वान्नित्यः वृद्धिस्तु टिलोपे कृते अप्राप्तैवे
त्युभयोरनित्ययोः परत्वाद्वृद्धौ कृतायामेकाचस्य लोपः तन्न सन्लोपन्मां भवतीति सन्वल्लघुनीति सन्वद्भावः स्यात् दीर्घोलघोरिति दीर्घश्च अल
निपातने तु यथपि परत्वाद्वृद्धिः तथाप्ययमेव लुप्यत इति सन्वद्भावो न भवति तदाह हलिकल्योरदंतत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति। उपलक्ष

॥ ॥ मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ ॥ मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलि
कलिकृततूस्त इत्येतेभ्यः कर्मणो णिच् प्रत्ययो भवति। मुंडं करोति मुंडयति। मिश्रयति श्लक्ष्णयति लवणयति। व्रता
द्भोजने तन्निवृत्त्योश्च। पयो व्रतयति वृषलान्नं व्रतयति। वस्त्रात्समाच्छादने संवस्त्रयति। हलिं गृह्णाति हलयति कलिं
गृह्णाति कलयति। हलिकल्योरदंतत्वनिपातनं सन्वद्भावप्रतिषेधार्थं। अचकलत् अजहलत्। कृतं गृह्णाति
कृतयति। तूस्तानि विहंति वितूस्तयति केशान्। विजटीकरोतीत्यर्थः ॥ ॥ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥
॥ ॥ एकाचो यो धातुर्हलादिः क्रियासमभिहारे वर्त्तते ॥ ॥

णामेतत् दीर्घो लघोरिति दीर्घाभावार्थं च दीर्घो लघोरित्यत्राथग्लोप इति वर्त्तते। एवं च बबलिपटुप्रभृतिभ्यो णौ चङि अबीबलत् अपीपटदिति भवति
नत्वबबलत् अपपटदिति। मत्सा पयाः सत्र मुंडादयः पठितव्याः तथा तु उक्तमित्येव ॥ ॥ धातोरेकाचः ॥ ॥ हलादेरिति विशेषणादेकाच
इति बहुव्रीहिः। क्रियासमभिहारे वर्त्तत इति। समभिव्याहृतिर्यमणो या क्रियायां वर्त्तत इत्यर्थः अनेन समभिहारस्य प्रकृतिविशेषणत्वं दर्शयति क्रिया
धातुवाच्या समभिहारविशिष्टापि क्रियैव भवति अतः प्रकृतिविशेषणत्वमेव युक्तं यथातिशयेन भुक्तोपि भुक्त एवेत्यतिशायनं प्रकृत्यर्थस्तद्वत् ॥
॥ ॥ छ ॥ ॥

तस्माद्यङ् प्रत्ययो भवतीति। ननु अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति तत्रैव समभिहारे द्योत्ये प्रकृत्यर्थः समभिव्याह्रियमाणेन द्योतनायेत्यर्थः। यथाप्र
कृत्यर्थस्यातिशयद्योतनाय तरबादयस्तद्वत्· इह हि प्रकीर्णानां पदार्थानां तेषामेककालानामेकत्र राशीकरणं समुदायभावापत्तिर्मुख्यः स
मभिहारः यथा पुलाकादीनां धातुवाच्यानां तु क्रियैकैव। यद्यपि दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु इति अनेकार्थो दिविः पठ्यते तथापि
न युगपदनेकमर्थमाचष्टे किन्तर्हि प्रयोगभेदेन। यद्यपि चाश्रयभेदाद्विषयभेदाच्चाभिधेयः पाकः अन्य एव हि देवदत्तकर्तृकः पाकोऽन्य एव चान्यकर्तृ
कः अन्यश्चौदनस्य पाकोऽन्य एव तैलादीनां तथापि धातुनानिर्दिष्टत्वभेदैवं सामान्याप्यते अत एव भवद्भिरास्यते इत्यादौ बहुवचनेन भवतिना लुक
र्तृभेदः क्रियाव्यक्तिभेदेनव्याप्तः एकफलावच्छिन्नामेकां क्रियां कुर्वत्स्वपि बहुषु पचन्तीति दर्शनात् तदेवं धातुगम्यासमूहरूपा प्रधानक्रियैके

तस्माद्यङ् प्रत्ययो भवति· पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः पुनः पुनः पचति
पापच्यते यायज्यते· भृशं ज्वलति जाज्वल्यते देदीप्यते·॥ ॥१५॥ ॥श्रीः॥ ॥

वेति समभिहाराभावः आधिश्रयणादीनां तु गुणक्रियाणां युगपदेकधातुवाच्यत्वेऽपि क्रमजन्मत्वादुत्पन्नापवर्गित्वेन युगपदवस्थानाभावा
त्समूहत्वाभावात्समभिहाराभावः तदेवं मुख्यस्य समभिहारस्य धात्वर्थविषये संभवाभावाद्गौणोऽत्र स्वीकृत इत्याह पौनःपुन्यं भृशार्थो वेति तद्रूपाणां
क्रियान्तरैरव्यवेतानां समभिहारो भवति तथा क्रियाणामपि क्रियान्तरैरव्यवेतानामेतदुभयं भवति तत्र प्रधानक्रियाणां पौनःपुन्यं समभिहारः
पुनः पुनरनुष्ठीयमानविषयो हि तत्प्रधानक्रियैव च पुनः पुनरनुष्ठीयते अवयवक्रियाणां तु भृशार्थता समभिहारः बुद्धिगोचरानेकसकला
वयवक्रियाविषया हिंसा। पापच्यत इति। दीर्घोऽकित इति दीर्घः देदीप्यत इति। गुणो यङ्लुकोः। पदे वसमभिहारस्य द्योतितत्वात् क्रियासमभिहारे द्वे
भवत इति वा नित्यवीप्सयोरिति वा द्विर्वचनं न भवति १५ ॥

का०प० ३१ ।धातोरिति किमिति। अन्यस्य क्रियासमभिहारे ह्यसंभवात्प्रश्नः। भृशं प्राटतीति। अत्र धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्ततो यङ्
१७ स्यात् ततश्चोपसर्गस्यापि द्विर्वचनं स्यात्. यदि सोपसर्गस्य संघातस्यैव क्रियासमभिहारे वृत्तिः अथापि च तत इत्यादौ यङ् न प्राप्नोति योऽत्र धातुः सा न क्रियासमभि
हारे यश्च क्रियासमभिहारे न स धातुरिति तस्माद्धातुरेव समभिहारविशिष्टक्रियावाची उपसर्गस्तु सन्निधिमात्रेणोपकारकः ततश्च संघातात्मा स्वभावा
न्नार्थो धातुग्रहणेन यत्र तर्हि संघातेनैव विशिष्टा क्रियोच्यते इति अत्र हि केवलस्तिष्ठतिर्गतिनिवृत्तिवचनः प्रपूर्वेण तु संघातेन गतिक्रियैवो
च्यते यथा जंगम्यत इति अत्राप्यनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतौ तन्निवृत्तौ च वर्त्तते उपसर्गस्तु सन्निधिमात्रेणोपकारक इति धातोरुत्पत्तिर्विहि
ता तस्मादार्धधातुकसंज्ञार्थमेवा धातुग्रहणं तेन लुबेव चिरिसासिभवति। आनुषंगिकी तु धातुनिवृत्तिः। अथ कथं यङ् तादात्मनेपदं भवति कि
चनं स्यात्. ङि. तो धातोरात्मनेपदमुच्यते यश्चात्र धातुर्न स ङित् तत्र तु यं समुदायस्यानुबंधः यश्च ङि. त्स स यो न स धातुः यत्र चावयवे कृतं लिंगमव

।।धातोरिति किं सोपसर्गाद्युत्पत्तिर्माभूत्. भृशं प्राटति. एकाच इति किं भृशं जागर्त्ति हला
देरिति किं भृशमीक्षते।। ।।श्री।। ।।श्रीः।। ।।श्री।। ।।छ।। ।।

रितार्थे तत्र समुदायस्य विशेषकं भवति। अयं ङ कारश्चेदभिघातुरित्यादौ गुणनिषेधार्थे चरितार्थः। कश्चिदाह क्रियासमभिहारे यङ् ङि. त्यकारोत्र
प्रश्लिष्यते स चानुदात्तोऽनुनासिकः प्रतिज्ञायते तत्रानुदात्तत्वमवयवे ङ. चरितार्थं समुदायस्य विशेषकं भवति अनुदात्तेतश्च हलादेरित्येतच्च न भ
वति जंचंक्रम्यते दंद्रम्यते सत्र चंक्रम्यते दंद्रम्य ग्रहणाल्लिंगादिति। सर्वत्र कर्मः अथ कथं कण्डूयत इति यङ् तदात्मनेपदं भवति सोऽपि हि ङकारो गुणनिवृत्तौ एम०
चरितार्थ इति स च्वे भूयात्तर्णाच्छादित इकारस्य कारोवानुदात्तः प्रश्लिष्यत इति प्रतिब्रूयाद् न इकारे नुमप्रसज्येत इकारे श्वीदितो निष्ठायामिति सनिषेधः १७
स्यादिति. नैष दोषः नुम्विधौ गोः पादान्त इत्यतो न ग्रहणमनुवर्त्तते तेनांते इकार इत्संज्ञको येषां तेषां नुम्. श्वीदितो निष्ठायामित्यत्राप्येकाच इति
वर्त्तते. सत्संप्रतिविहितमापुष्यतां मुधा पुनरयं प्रयासस्तथा हि अनुदात्त ङि. त इत्यत्र न धातुग्रहणमस्ति ततः किं इदं तन्तो भवति प्रसय एव ङि. तस्मा
च्छिलात्मनेपदं सिद्धं भवति न चैवमाशि प्रियत अवोच दित्यादौ चङ ङः प्यामपि प्रसंगः प्रागेव विकरणेभ्योऽनुदात्तङि. त इत्येतत्प्रकरणं प्रवर्त्तते। अन्यथा
वर्त्तिष्यादौ विकरणेष्वव धानान्नियमो न स्यात्. यथा च प्रागेव विकरणेभ्यो नियमः प्रवर्त्तते प्रवृत्ते तु नियमे विकरणा इति तथा तत्रैव प्रतिपादिताम्

॥लुपसद॥ ॥लुप्ल छेदने षद्लृ विशरणगत्यवसादनेषु आङः सदिः पघर्थे स्वार्थस्य तु चौरादिकत्वाण्णिजंतस्य एकाच इत्यस्यानुवृत्तेर्ग्रहणं चर गत्यर्थः जप जल्प व्यक्तायां वाचि जभि जृंभी गात्रविनामे दह भस्मीकरणे दंश दशने अनुनासिकलोपनिर्देशो यङ्लुकमप्यनुनासिकलोपार्थः दंदशीति गॄ निगरणे तुदादिः गॄ शब्दे क्र्यादिः तत्र काशांत विकरणेन साहचर्यात् दीर्घस्य ग्रहणमित्येके इत्यपरे धात्वर्थगर्हायामिति भावशब्देन धात्वर्थवि वक्षितः दर्शयति गर्हितमिति क्रियाविशेषणं तेन भावगर्हा त्राणपते गर्हितत्वं तु छेदनस्य निषिद्धत्वादिविषयत्वात् लोष्टमर्दीत्यादिछेदीनत्वरवा शीचयेन इति एवमुत्तरत्रापि यथासंभवं गर्हितत्वं द्रष्टव्यं चंचूर्यत इति चरफलोश्चेति उत्त्वं उरतोत इति हलि चेति दीर्घः जंजप्यत इत्यादौ ज

॥लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायां॥ ॥लुप सद चर जप जभ दह दश गॄ इत्येतेभ्यो भावगर्हायां धात्वर्थगर्हायां यङ् प्रत्ययो भवति। गर्हितं लुंपति लोलुप्यते एवं सासद्यते चंचूर्यते जंजप्यते जंजभ्यते जंजप्यते दंदह्यते दंदश्यते निजेगिल्यते भावगर्हायामिति किं साधु जपति भावग्रहणं किं साधनगर्हायां माभूत् मंत्रं जपति वृषलः नित्यग्रहणं विषयनियमार्थमनुवर्तते एतेभ्यो नित्यं भावगर्हायामेव भवति न तु क्रियासमभिहारे भृशं लुंपति॥ १७ ॥ ॥

पजभदहदशां भंजयशां चेति नुक् निजेगिल्यत इति ऋत इद्धातोः एपरत्वं द्विर्वचनं अभ्यासस्य गुणः जेगिर् यङ्ति ग्रो यङीति लत्वं च अभ्यासे तिहलि चेति दीर्घश्च तत्र दीर्घस्यासिद्धत्वात् लत्वे कृते विहतनिमित्तत्वाद्दीर्घाभावः। अस्मे तु न मु न इत्यत्र नेति योगविभागेनासिद्धत्वं बाधित्वा दीर्घे कृते लत्वमिच्छंति नात्र सर्वा अस्मत्ति गर्हायामिति किमिति भावस्येव तत्र धर्मविशेषो लक्ष्यत इति प्रश्नः। धर्मविशेषानुपादाने प्रशंसायामपि स्यादित्याह साधु जपतीति जपति वृषलो मंत्रमिति अत्र स्वरवर्णादिभ्रेषाभावाद्भावगर्हा नास्ति वैदिकमंत्रजपं प्रति शूद्रस्यानधिकारात्तु साधनभावो गर्हितः यस्य स्वल्वी ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यम् इति तत्र पुनः तु भावः श्रोत्रप्रतिपूरणं उच्चारणे जिह्वाछेदो धारणे शरीरभेद इति न सो जपितुमर्हति नित्यग्रहणमित्यादि पूर्ववदेतद्व्याख्येयं १७ ॥

का॰प्र॰ ३१ ॥ ॥नित्यं कौटिल्ये॥ ॥धातोरिति वर्त्तते गत्या विशिनस्य विशेषणं गतौ वर्त्तमानो यो धातो रिति कौटिल्ये इति संनिधानात् ङ इति विषय एव कौटिल्यं ग
१९ म्यते चंक्रम्यते दंद्रम्यते इति क्रमु पादविक्षेपे द्रम द्रमु मीमृ गतौ तु गतौ अनुनासिकान्तस्य। यो लीयस्य घ निपातानि क्री तिस कुटिल्यां तिं संपाद
यत्रैव मुच्यते। नित्यग्रहणमनर्थकमनभिधानाद्वेवाक्यं न भविष्यति न हि चंक्रम्यत इति हन्तेरर्थं कुटिलं क्रामती तिवाक्यं शक्रो तिगमपितुं सं
शयो हि वाक्याद्भवति किं गति कौटिल्यमुत वक्तृदयत्ववि वंधनं जिह्माचरणमिति वृत्तौ तु गति कौटिल्यमेव नियतं गम्यते कौटिल्यमात्र प्रति
पादने च वाक्यं निवारयितुमशक्यं अनिष्टं चातत्त्वाह नित्यग्रहणं विषयनियमार्थमिति। गति कौटिल्यं विषयः तत्रैव यङ् यथा स्याद्विसेवम

॥नित्यं कौटिल्ये गतौ॥ ॥गतिवचनाद्धातोः कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति· चं

क्रम्यते दंद्रम्यते नित्यग्रहणं विषयनियमार्थं गतिवचनान्नित्यं कौटिल्य एव भवति· न तु क्रियास

मभिहारे भृशं क्रामति॥ ॥

र्थमित्यर्थः तदाह गतिवचनान्नित्यं कौटिल्य एव भवतीति। व्यवच्छेद्यं दर्शयति न तु क्रियासमभिहार इति। ननु यथा वउवायाह्वषेवाध्यर इत्येप्राप्तः स्त राम॰
तोपकृष्य विधीयते यथा वा जीतः क्तो भूते प्राप्तस्तत्रोपकृष्य वर्त्तमाने विधीयते एवमत्रापि धातुमात्रात्क्रियासमभिहारे यङ् स्थितः गतिवचना १९
त्तु कौटिल्ये इति तत्र कौटिल्यन्यायेनैव बाधः सिद्धः यथा वाविवक्षितार्थनभिधानाद्वाक्यं न भवति तथा समभिहारेन गमो ऽत्रप्रसङ्गो न भविष्य
ति अथैवमपि वचनापेक्षावाक्यानिवृत्तावपि वचनमपेक्षतत्वेतन्नित्यग्रहणं चिंत्यप्रयोजनं॥ ॥छ॥ ॥ ॥

॥लुपसद॥ ॥लुप्ल छेदने षद्ल विशरणगत्यवसादनेषु आउ:मदिः पघर्पस्सास्य तुचौरादिकत्वात्ण्यंतस्य एकाच इत्यस्यानुवृत्तेर्ग्रहणं चरगत्य
र्थः जपजल्पव्यक्तायांवाचि· जभिजृंभीगात्रविनामे दह भस्मीकरणे दंश दशने अनुनासिकलोपनिर्देशोयङ् लुगभ्यनुनासिकलोपार्थः दंदशीति
गृनिगरणे तुदादिः गृशब्दे क्र्यादिः तत्राकारांतविकरणेन साहचर्याद्दीर्घस्य ग्रहणमित्येके द्वयोरपीत्यपरे· धात्वर्थगर्हायामिति भावशब्दो धात्वर्थवि
वितः इतिदर्शयति· गर्हितमिति क्रियाविशेषणं तेन भावगर्हात्र गम्यते गर्हितं त्वंतुच्छेदनस्य निषिद्धत्वादिविषयत्वात् लोप्यम दीत्यणन्तेदीनस्वाभा
वीचयेन रहितिएवमुत्तरत्रापियथासंभवं गर्हितत्वं द्रष्टव्यं· चंचूर्यतइति· चरफलोश्चेतितु कउत्परस्यातः हलिचेति दीर्घः जंजप्यतइत्यत्रजपजभ

॥लुपसद्चरजपजभदहदशगृभ्योभावगर्हायां॥ ॥लुप· सद· चर· जप· जभ· दह· दश· गृ इत्येतेभ्यो भा
वगर्हायांधात्वर्थगर्हायांयङ् प्रत्ययो भवति॥ गर्हितंलुंपति लोलुप्यते· एवं सासद्यते· चंचूर्यते· जंजप्यते· जंज
भ्यते· जंजप्यते· दंदह्यते दंदश्यते· निजेगिल्यते· भावगर्हायामितिकिं साधु जयति· भावग्रहणं किं साधनगर्हा
यामाभूत मंत्रं जपति वृषलः निस्यग्रहणं विषयनियमार्थमनुवर्त्तते· एतेभ्यो नित्यं भावगर्हायामेव भवति
तु क्रियासमभिहारेभृशं लुंपति॥ १७ ॥ ॥

पजभदहदशभंजपशांचेतितुकनिजेगिल्यतइति· ऋतइद्धातोः एपरत्वद्विर्वचनं अभ्यासस्य गुणः जेगिर् यङ्इतिस्थिते ग्रोयङीति लत्वं चग्रा श्री
ति हलिचेति दीर्घश्च तत्र दीर्घस्यासिद्धत्वाल्लत्वे कृतेविहतनिमित्तत्वाद्दीर्घाभावः॥ अमेतु नमुनइत्यत्रनेतियोगविभागेनासिद्धत्वं बाधित्वादीर्घे
कृते ललमिच्छंति नात्रसवाक्यमत्ति· गर्हायामितिकिमिति· भावस्येव तद्धर्मविशेषोलक्ष्यतइतिप्रश्नः॥ धर्मविशेषानुपादाने प्रशंसायामपि
प्रणादित्याह साधुजपतीति· जपतिवृषलोमंत्रमिति· अत्रस्वरवर्णादिभ्रेषाभावाद्भावगर्हानास्तिवैदिकमंत्रजपप्रतिशूद्रस्यानधिकारात्तु
साधनभावोगर्हितः यस्य स्वल्पीवत्सागतिः शूद्रस्यचेदमुपशृण्वतस्त्रपुजतुभ्यांश्रोत्रप्रतिपूरणमुच्चारणोजिह्वाच्छेदोधारणेशरीरभेदइतिना
मोजयितुमर्हति· निस्यग्रहणमित्यादि· पूर्ववदेतद्व्याख्येयं १७ ॥

का॰पु॰ ॥ सत्यापपा ॥ ॥ सत्यापेत्येकदेशार्थः । सत्यमाचष्ट इति · ननु भाष्ये सत्यस्य कृञ्याप्रुक् सत्यशब्दात्कृञि कर्तोत्यर्थे णिज्भवति आपुक्
सत्यं करोति सत्यापयतीत्युक्तं · सत्यं कृञ्ग्रहणमनार्थं प्रदर्शनार्थी वा करोतिर्द्दिष्ट इति मन्यतेः आपुग्वक्तव्य इति · आपुग्वचनसामर्थ्यादि
१९ लोपो न भवति · क्वचित्तु सत्यापेत्येवायं ग्रन्थः पठ्यते · अथ कथं पुनः शरापयेदिति · छन्दो वृषयः कुर्वंति · एतेन प्रशालापयेदिति प्रयोगो
व्याख्यातः पाशाद्विमोचन इति · प्रापिकोयमर्थनिर्देशः अन्यत्रापि भवति · अन्यथा विपाशयतीति विशब्दस्य प्रयोगो न स्यात् विशब्दविशिष्टसे

॥ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ ॥ सत्यादिभ्यश्चूर्णपर्यंते
भ्यश्चुरादिभ्यश्च णिच्प्रत्ययो भवति · सत्यमाचष्टे सत्यापयति · अर्थवेद सत्यानामापुग्वक्तव्यः अर्थापयति · वेदा
पयति · सत्यापयति · आपुग्वचनसामर्थ्याट्टिलोपो न भवति · पाशाद्विमोचने · विपाशयति · रूपाद्दर्शने · रूपयति · वी
णयोपगायति उपवीणयति · तूलेनानुकुष्णाति अनुतूलयति श्लोकैरुपस्तौति उपश्लोकयति · सेनया अभिया
ति अभिषेणयति लोमान्यनुमार्ष्टि अनुलोमयति · त्वचं गृह्णाति त्वचयति · अकारान्तस्त्वचशब्दः · वर्मणा संनह्य
ति संवर्मयति · वर्णं गृह्णाति वर्णयति · चूर्णैरवध्वंसयति अवचूर्णयति · चुरादिभ्यः स्वार्थे चोरयति · चिंतयति · स्वा
भाविकत्वादर्थाभिधानस्य यथा प्रत्ययार्था निर्दिश्यंते · १८ ॥

वर्मो वनस्पत्यर्थेत्वात्पथा चर्मसन्नाहः प्रयोगो न भवति । एवमुपवीणयतीत्यादावपि द्रष्टव्यं · तूलतस्त्वर्थेनानुकुष्णाति अनुतूलयती ए॰म॰
त्यर्थः अनुगृह्णातीति पाठेन समीचीनोर्थः । अभिषेणयतीति · उपसर्गात्सुनोतीत्यादिना षत्वं · अकारान्तस्त्वचशब्द इति · त्वचसंवर १९
णे इत्यस्मात्पुंसि संज्ञायामिति घः । अवध्वंसयतीति · विकिरतीत्यर्थः । प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे सत्यस्यापुग्वचनार्थं वचनं अन्ये
षां प्रपंचार्थं · मालिनोपश्लोकयतीत्यादौ सापेक्षेभ्यो यथा सम्भवति एवमर्थं वा · कथं पुनर्विमोचनादिरर्थो निर्दिष्टो लभ्यत इत्यत आह · स्वा
भाविकत्वादिति · प्रत्ययार्था निर्दिश्यंत इति · सूत्रकारेणानिर्दिष्टोपि प्रत्ययार्थोभिधानाकारैर्निर्दिश्यत इत्यर्थः ॥ ॥१८॥ ॥

॥ हेतुमति॥ ॥ लोके फलसाधनयोग्यः पदार्थो हेतुरित्युच्यते तस्य ग्रहणे ध्यध्ययनेन वसतीत्यत्रापि प्रसज्येत हेतुमद्ग्रहणं चानर्थकं स्यात् कथं करणाद्धि निवर्त्तते तस्य विशेषणं हेतुमतीति करणं क्रियासंवे विचक्रिया हेतुमतीति किं विशेषणोपादानेन ननु ग्राह्योपात्ते हेतौ यथा स्याद् इत्येवमर्थं मिनत्स्याद्यथा समस्त तीया पुक्तादिसत्र श्रूयमाणायां तृतीयायां यासात्मनेपदं यथा स्यात् तदर्थयोगमात्रे मा भूदित्येवमर्थं तृतीयायुक्तग्रहणं एवं तर्हि प्रतिविशेषेण कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं युक्तमिति तत्प्रयोजको हेतुश्चेति यत्संज्ञा विहिता तस्यैव याशिभाषिकस्य ग्रहणमिति मत्वाह हेतुः स्वतन्त्रस्य कर्तुः प्रयोजक इति तदीयो व्यापार इति प्रवर्त्तना तस्या भावांतरभेदमाह प्रेषणाध्येषणादिलक्षण इति भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेषणा माणस्यार्थः गुर्वादेराध्यस्य प्रवर्त्तना ध्येषणं प्रार्थनेत्यर्थः आदिशब्देन तत्समर्थाचरणं गृह्यते तेन च बहुधाभिधीयते अनुमतिरुपदेशोनुग्रह इति

॥ हेतुमति च॥ ॥ हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः तदीयो व्यापारः प्रेषणाध्येषणादिलक्षणो हेतुमांस्तस्मिन्नभिधेये धातोर्णिच् प्रत्ययो भवति· कटं कारयति· ओदनं पाचयति·॥ १९ ॥ ॥

तत्र यस्यानुमतिमन्तरेण याऽर्थो न निर्वर्त्तते तस्य राजादेरनुमत्या प्रयोजकत्वं वैद्यादेस्तु युक्तापर्यटकं पिबेज्वरित इत्साधुपदेशेन प्रवर्त्तकत्वं यः पुनः केन चिन्निषिद्धं प्रितं पलायमानं निहणाद्धि निहन्तुं व्यवहन्यते तत्र निरोद्धा हंतुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रवर्त्तकत्वं सर्वत्राय विशेषः प्रकरणादिगम्यः सर्वत्रानुगतं प्रवर्त्तनामात्रमेव तु णिजर्थः ननु यथापि त्वमानि तु क्तेर्यं प्रतिपित्तत्वं स एव णाध्यते तेन यथात्रापि यं प्रति हेतुत्वं स एव हेतुमानिति युक्तं च प्रति हेतुत्वं तत्प्रयोजक इति वचनात् कर्त्तारं प्रतीति भिक्षा कारयति कारीषाणि क्रियाये स्तु लाभ कस्य कुमारस्य यस्मिन्व्यापारे प्रयोजक रूपेणोपयुज्यते तमेव प्रति स च प्रयोजकव्यापारो भिक्षायणादिः सर्वसाधनसाध्यो विच्छित्यादि वैतितत्योरेव हेतुमत्त्वं युक्तं न पुनः प्रयोजकव्यापारस्य न हि तत्राभो प्रयोजकरूपेणोपयुज्यते किं तर्हि कर्तृरूपेण यथा काष्ठस्य पाकाये शंकरणात्वेन तु ज्वलनाये संततये भृत्यं तु कर्तृत्वमेव उच्यते णिचः प्रकृतिभूतेन धातुनैवाभिधीयमानोऽर्थस्तेन फललाभावात्तत्र णिज्न भविष्यति॥ ॥

का॰ पद॰
२०

ननु पचतीत्युक्ते न ज्ञायते किं स्वयमेव पचति उतान्येन प्रवर्त्तित इति अतोऽन्येन प्रवर्त्तितस्येयं प्रवृत्तिरिति द्योतनाय णिज् भवतु । एवं तर्हि हि
तोरिति वक्तव्यं करणात् इत्यत्र हेतोः करणे व्यापारे अभिधेये णिज् भवतीत्यर्थः तथा तु न कृतं कारणातिरिक्तानीसत्रस्य अभिधाने स्वाभाव्यमत्र हेतुः
स्वभावतो हि णिच्प्रत्ययः प्रयोजकव्यापारमाचष्टे तेन पाकादिरूपे क्रियायोगे लब्धहेतुत्वे पदेशः स हेतुत्वेनोपलक्षितो यः स्यात् तस्यैवं प्रयोजकव्या
पार एव मतुपोऽर्थे अत्र द्वौ पक्षौ संभवतः हेतुमतीति प्रकृत्यर्थनिर्देशः हेतुमतीति धातुर्वर्त्तत इति प्रत्ययार्थो वा हेतुमति करणेऽभिधेये णि
ज् भवतीति ननु पचति पाचयतीति च अक्रमण्यर्थः तिरोगम्यते तत्कथमत्र प्रकृत्यर्थत्वं शङ्क्यते उच्यते इह हि कः पचेः प्रधानार्थः यासौ तण्डुला
नां विक्लित्तिः अधिश्रयणादीनां तु तादर्थ्यात्तदवच्छेदेन पचेरर्थता यो हि यानार्थमुदकमाहरति विक्रयार्थं च काष्ठान्याहरति शीतं वा
पनेतुमग्निं समिन्धे नासौ पचतीत्युच्यते तस्य हेतो विक्लित्तिं प्रति तादर्थ्याभावात्तदवच्छेदाभावाच्च अतस्तादर्थ्यादेवाधिश्रयणादीनां
पच्यर्थता तद्वत् प्रयोजकव्यापारोऽपि तादर्थ्यादेव पच्यादिवाच्यो भविष्यति णिच्प्रत्ययस्तु द्योतकः तथा च योऽप्यंकाते तत्र यामामानो
भक्तवीजबलीवर्दैः प्रतिविधत्ते स उच्यते पञ्चभिर्हलैः कृषतीति तदेवं पक्षद्वयसंभवे यदाद्यः पक्ष आश्रीयते तदोपचाप्रकृत्यभि
हिते णिज् भवति एव मुक्तप्रेषितादिशि दृष्टानपि हितेऽपि स्यात् उक्तः करोति प्रेषितः करोतीति हेतुमद्विषयत्वात् करोत्यर्थस्य प्रत्ययार्थपक्षे तु
कार्थत्वाण्णिज्भावः नैष दोषः प्रयोजकव्यापारस्य द्योतनाय णिज् विधीयते तस्य स्वशब्देन द्योतितत्वाद् द्योत्याभावान्न भविष्यति इह त
र्हि पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्युभयोः कर्त्रोर्लेनाभिधानं प्राप्नोति धातुवाच्यव्यापारे हि कर्त्तरि लो भवति पचिना च प्रयोजकव्यापा
रोऽप्यभिधीयते प्रत्ययस्तु द्योतकः इति धातुवाच्यव्यापारसाम्यात् कर्त्तरि पि साम्यमिति द्वयोरप्यभिधानं प्राप्नोति पाचयतो देवदत्तय
ज्ञदत्ताविति प्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्य प्रत्ययार्थस्य प्राधान्यात् तस्यैव कर्त्तरि लकारः । इह च गमितो ग्रामं देवदत्तो यज्ञदत्तेनेति
प्रयोजकव्यापारस्यापि गमिवाच्यत्वात् गमिं प्रति कर्मणो गत्यर्थ इति कृत्वा गत्यर्थानां कर्त्तरि क्तः प्राप्नोति प्रयोज्यस्य तु कर्मत्वात् तत्र वक्ष्यते
क्तेऽहिंसार्थेनेक तु अकर्मकाणामिति । इह च अस्ति भेदः यन्तेषु अनतिरिक्तो हिंसार्थ इति कृत्वा प्रयोजकव्यापारमतिहारविवक्षायाम्

राम॰
२०

किंचान्वयव्यतिरेकाभ्यां शब्दार्थावसायः न च पचति पठति गच्छतीत्यादावंतरेण णिचं कंचिदपि प्रयोजकव्यापार एव प्रतीयते उत्पन्ने तु णिचि प्रती
यते अतस्तदर्थत्वमेव युक्तं । पंचभिर्हलैः कर्षतीत्यत्र त्वनेकार्थत्वाद्धातूनां कृषिरेव प्रतिविधानेपि वर्तत इति युक्तं न पुनस्तद्दर्शनेन सर्वत्र प्रकृ
त्यर्थत्वं । न त्वत्रापि पक्षे पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र ण्यर्थस्य प्राधान्यात्तेन व्याप्यमानस्य प्रयोज्यस्य कर्मसंज्ञा प्राप्नोति गतिबुद्धिप्रत्यव
सानार्थेति नियमान्न भविष्यति । इह तर्हि ग्रामं गमयति ग्रामयमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ न प्राप्नुतः
नैष दोषः ग्रामोत्र गमेरेव कर्म ग्रामकर्मकं गमनं कुर्विति प्रैषार्थः । इह तर्हि एधोदकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृञः प्रतिय
त्न इति षष्ठी न प्राप्नोति उपस्कुरु करोति धातुमात्राश्रयत्वात्सिद्धं तस्मात्त्वपि तस्य स्वरूपस्याभावात्सिद्धमिति अत्राप्येधोदककर्मके करोत्यर्थे प्रयुज्यत
इति षष्ठी भविष्यति । इह तर्हि अभिषावयतीति परिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इत्युपसर्गात्सुनोतीति षत्वं न प्राप्नोति अत्राप्यभिषवं
कुर्वित्युपसर्गविशिष्टे प्रकृत्यर्थे प्रयुक्ते णिरिति सिद्धं षत्वं । यदा तु एवं तेनैवोपसर्गस्य संबंधस्तदा षत्वं भवति न वेति चिंत्यं । इह तर्हि भेदिका देवद
त्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्तरि कृद्योगलक्षणा षष्ठी न प्राप्नोति अप्रधानत्वान्न तृतीया वक्ष्यतीति तथापि वचनसोऽत्र
देवदत्तोपज्ञदत्तेनेति प्रयोज्ये कर्तर्यप्रधानेपि तृतीया भवतिमाप्ते ; तथा षष्ठ्यपि भविष्यति । अथेह कथं णिज् भवति भिक्षा वासयंति कारी
षोग्निरध्यापयतीति कथं च न स्यात् अचेतनत्वात् चेतनावत एतद्भवति प्रेषणमध्येषणमिति । नैष दोषः नावश्यं स एव वासं प्रयोजय
त्याहोस्विदमिति यो पि तूष्णीमास्ते नस्तत्समर्थमाचरति सोपि वासं प्रयुंक्ते भिक्षाश्च प्रचुरा अश्वमंजनवत्स्थल भ्यमाना वासं प्रयुंजते
तथा कारीषोग्निर्निवातैकांते प्रज्वलितः शीतकृतमध्ययनविरोधिनमुपद्रवमपनयन् अध्ययनेनुकूलो भवतीति तथा नु व्याप्तिस्य

देशोनुग्रहस्तस्मिन्नेते पुणिज्ञमेवतितथात्रापि भविष्यति । यद्यप्यनुमत्यादिषु प्रयोज्यव्यापारोद्देशेन प्रवृत्तिर्न हि तु न तथा तथाप्यानुकूल्याचरण
मेव प्रयोजकव्यापारत्वेनाध्यारोप्यते इह कश्चित्कंचिदाह एधस्तु भवान् अनुयुक्तोस्मि भवानिति तत्र प्रेष्टा प्रयोज्यस्तस्य प्रेरकः प्रयोजक इति त
द्व्यापारे णिच् प्राप्नोति एकविषयत्वाद्वा णिचो लोडादीनां च पर्यायप्रसंगः । नैष दोषः कर्तुः प्रयोजको हेतुरित्युक्तं प्रयोज्यश्चात्र न कर्ता न ह्यसौ
संप्रति एधितुं घटमानस्तस्य निर्व्यापारत्वात् कारकत्वमेव नास्ति कुतस्तद्विशेषः कर्तृत्वं कर्तृत्वमेव हि तस्य विधीयते प्रैषाक्रियायां कर्ता
भवेति यथा राजा भव युध्यस्वेति राजत्वमेव विधीयते तेन एवं प्रयोज्योत्र न कर्तेति प्रयोजकोपि न हेतुः । किमिदानीं पूर्वमेव कर्तुः सतः प्रयो
जको हेतुः यद्येवं व्यर्था प्रयुक्तिः अथाप्युपरतिशंकया क्वचित्प्रयुक्तोर्थवत्तथापि यत्राप्रवृत्तो बलादिना प्रवर्त्यते तत्र णिज्न प्राप्नोति ।
न क्रमः प्रवृत्तप्रवर्तन एव हि णिजिति किं तु प्रवर्तितोपि प्रयोज्यो यत्र प्रवर्तत एव न तु निवर्तते तत्र णिज्भवति अनुवर्तमाना प्रयुक्तिः
प्रयोज्यप्रवृत्तौ हेतुः न मध्ये विच्छिन्ना अतः प्रयोज्यप्रवृत्तिवेलायामपि बुद्धौ विपरिवर्तमानास्यैव प्रवृत्तिहेतुः तस्यामेव च दशायां
णिज्भवति तत एवं प्रयोज्यप्रवृत्त्युपहितप्रयुक्तिर्णिजर्थः केवला तु लोडर्थ इति विवेकः उक्तं च द्रव्यमात्रस्य तु प्रैषे पृच्छादौ लोडि
यीयते । सक्रियस्य प्रदृष्टे प्रैषस्तदा स विषयो णिच इति किं च प्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः अनियतकर्तृका तु प्रयुक्तिर्णिजर्थः ॥ १९ ॥

॥ श्रीः ॥ ॥ छ छ ॥ ॥ राम ॥

।तत्करोतीत्युपसंख्यानमिति तत्करोतीति कर्मण्ययमेतत् तेन द्वितीयान्तात्प्रत्ययः करोतीत्यत्र प्रकृत्यर्थमात्रं विवक्षितं न प्रत्ययार्थः॰ ते न एवं तादृशावकर्मणो
भूता भविष्यतो द्विलब्ध उत्पन्नोऽष्टलो भवति सूत्रं करोति सूत्रयतीति। इह व्याकरणस्य सूत्रं करोतीति वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते तत्र अप
देशिवद्भावेन व्यतिरेकनिबंधनाषष्ठी इत्यतो नु व्याकरणं सूत्रयतीति प्रत्ययार्थभूतकरोमर्थाभिधायी सूत्रशब्दः संपद्यते उक्तं हि पदार्थाभिधा
नं वृत्ति रिति ते न हत्वमावो निवृत्त्वं इति सूत्रव्याकरणयोरभिसंबंधो निवर्तते अस्ति च व्याकरणस्य करोति नासामर्थ्यमिति द्वितीया भवति षष्ठि
नु व्याकरणं सूत्रं करोतीति वाक्य एव सामानाधिकरण्यं तद्वा माणवकं मुण्डं करोति माणवकं मुण्डयतीतिवत् व्याकरणं सूत्रयतीत्यपि सिद्धं।

।तत्करोतीत्युपसंख्यानं सूत्रयत्याद्यर्थं॰ सूत्रं करोति सूत्रयति॰ आख्यानात्कृतस्तदाचष्ट इति णिच् कृल्लुक्
प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं॰ आख्यानात्कृदन्तात् णिज्वक्तव्यस्तदाचष्ट इत्येतस्मिन्नर्थे कृल्लुक् प्रकृ
त्याः प्रत्यापत्तिः प्रकृतिवच्च कारकं भवति॰ ॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

सूत्रमवमोचने मूत्रप्रस्रवणा इति चुरादौ पाठादेव सूत्रयतीति सिध्यति अनेकार्थत्वाद्धातूनामर्थान्तरेऽपि भविष्यति गणपाठसिद्ध एवं बलर्थ उपसंख्या
नेनापि प्रदर्शितः। आख्यानादि तिवा कंसं आचष्टे आख्यानात्कृदन्तादिति। आख्यायत इत्याख्यानं कृत् खल्वपि टो बहुलमिति कर्मणि ल्युट् ल्यल्लि
चिदाख्यायते तत्र सर्वं राजागमनादिकमप्याख्यानमिहाभिप्रेतं न कं सवधनलोपाख्यानादिकमेव संज्ञाभूतं। कृदन्तादिति। कृदग्रहणेनागति
काकसर्वस्यापि ग्रहणमिति कं सवधराजागमनसूर्योद्गमनादेरपि कृदन्तत्वं प्रकृतिप्रत्यापत्तिरिति। कृतो या प्रकृतिः सा विकारपरित्यागे
न स्वेनैव रूपेणावतिष्ठत इत्यर्थः। प्रकृतिवच्च कारकमिति। यत्तत्र कृदन्ते संनिहितं कारकं तत्प्रकृतिवद्भवति कृत्प्रकृतेः शुद्धे णिचि या दृशं
भवति तादृशमस्यापि णिजन्तस्य भवतीत्यर्थः॥ ॥

का·प॰
२२

कंसंघातयतीति। हतेर्हन्स्य घस्त्यप्रत्यये वधादेशः वध हननं वधः कंसस्य वध इति कर्मणि षष्ठ्याः समासः ततो णिच् तल्लुक् प्रकृतेः प्रत्याये त्रिर्व
धादेशपरिसणेन हंतिरूपेण वध्यस्यानेन घत्र्य प्रसंगे निघातेति शिष्टानामस्मतया भावात् उभयोरप्यभावः इत्येवं वधादेशानिवृत्तिः सिध्यतितथा णिच्युष्वेणोपयोगि
नातिपूर्वेणापोक्तयतीसत्वकुलस्यापि नियोगशिष्टत्वात्तन्निवृत्तौ निवृत्तिरिति प्रकृतिप्रत्ययोर्निवचनं। अथ कथं कंसम् घातयत् राजानमागमयत्
तरा कंसवधराजागमनशब्दाभ्यां णिचि विहितेगमस्त्रानाम धातुत्वं च तयोरेवस्य तेन ततश्चाद्वि र्वचने अपि तयोरेवस्यात् तेन दोषः प्रकृति वचकारकमि
त्युक्तं कृत्य हते अश्र शुद्धेणि चि विहिते कंसादिकाकं कीदृशं भवतिधातावनंतभूतं द्वितीयायां तेन नात्रापिताहृशे नैवरूपेण भवितव्यं ते राजानमाग
मयतीत्यत्र नलोपाभावोप्युपपन्नो भवति एवमपि कंसंघातयतीत्यत्र होहंतेर्ञ्णिन्नेष्विति कुत्वं हनस्तोचिण्णलोरिति तत्वं च न प्राप्नोति किं कारणं
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते। एवं तर्हि प्रकृतिवच्च कारकमिति चकारो भिन्नक्रमः कारकमित्यस्यानंतरं द्रष्टव्यः कार्यशब्दश्चाध्याहर्त्तव्यः

कंसवधमाचष्टे कंसंघातयति· बलिबंधमाचष्टे बलिं बंधयति· राजागमनमाच
ष्टे राजानमागमयति॥ ॥२०॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥

एतदुक्तं भवति कृत्प्रकृतिहि स्यादिस्तस्याः णुद्धेणि चियादृशं रूपं भवति तथा स्याणिचि यत्तस्य भवति कार्यं च तद्वदेव भवतीति एतेनाद्व्द्विर्वचने अपि व्याख्या
तं बालिबंधमिति बंधनं बंधः बलेर्बंधो बलिबंधः पूर्ववत् कर्मणि षष्ठ्याः समासः शेषं पूर्ववत्· राजागमनमिति अत्र कर्त्तरि षष्ठ्याः समासः राजान
मागमयतीति कोऽत्र कृत्प्रकृतौ राजा कर्त्ता तस्मान् णुद्धे णिचिगतिबुद्धि इत्यादिना कर्मसंज्ञा भवतीत्यस्मिन्नप्युपसंख्यानिके णिचि तस्यैव कर्म — राम॰
संज्ञा भवति इह तु देवदत्तेन पाकमाचष्ट इति णिचि विहिते देवदत्तेन पाचयतीभवति नहि देवदत्तस्य शुद्धे णिचि कर्मसंज्ञास्ति गत्यर्थादीनामेवेति नि — २२
यमात् इह तु मृगरमणमाचष्टे मृगान्रमयतीति यत्प्रतिपाद्यस्य दर्शनार्थमाख्यानं तदा णिजिष्यते नान्यदा तत्र यदा तस्यैव रमणं तदा मृगान्र
तिपाद्यमाचष्टे एतस्मिन्नवकाशे एवं मृगानमंते इति तदा तस्य प्रतिपाद्यदर्शनार्थाप्रवृत्तिरिति णिज भवति यदा तु आमे मृगरमणमाचष्टे तदा तत्र प्र — ॥२०॥
गाणामस्य भवान्नतदृशनार्थाप्रवृत्तिरिति मृगरमणमाचष्ट इति वा आमेव भवति एतच्च मृगरमणादिविषयमेव राजागमनादौ त्वस्यदापि भवति।

नाशः

।।आङ्लोप इति। अत्रापनयादिति न संबध्यते मर्यादायां य आकारस्तस्य लोपो भवति कुल्लुगित्यादि पूर्ववत्। आरात्रिविवासमिति। विवसनं विवा
सः अतिक्रमणं रात्रेर्विवासो रात्रिविवासः कर्त्तरि षष्ठ्याः समासः तत आङ्मर्यादाभिविध्योरित्यव्ययीभावः यावद्रात्रेरिति। क्रमणं तावत्कथाः कथय
तीत्यर्थः वसेः कर्मकत्वात्प्रतिबुद्धीत्यादिना रात्रेः कर्मसंज्ञा हेतुमति णिचि भवति तिदृशि त्रपि णिचि भवति रात्रिं विवासयतीति। चित्रीकरणे प्रापि
ति तदृशि च चित्रीकरणमाश्चर्यकरणं प्रापि प्राप्नोत्यर्थे चित्रीकरणे गम्यमाने तत्प्राप्नोतीत्यस्मिन्नर्थे णिच भवति लुल्लुगित्यादि पूर्ववत्। संभावय
न इति भूमाहावात्मनेपदी उज्जयन्या माहिष्मती विदूरे देशः इति तावतो देशस्य प्राप्नुयादिति क्रमणाप्यायं सूर्यमुद्गमयतीति· प्रकृतिवत्कारका
रकमिति सूर्यशब्दस्य षष्ठ्यन्तं करणं प्रग्रामयतेरेव सोपसर्गादिति सापायादुच्छब्दस्यापि एथ क्रमणं अत्रापि सूर्यस्य हेतुमण्णिचि कर्मत्वादस्मिन्न

।।आङ्लोपश्च कालापनयने मर्यादायां· आरात्रिविवासमाचष्टे रात्रिं विवासयति· चित्रीकरणे प्रापि· उ
ज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयते सूर्यमुद्गमयति· नक्षत्रयोगे ज्ञि· पुष्ययोगं जानाति पु
ष्येण योजयति· मघाभिर्योजयति॥ ॥ २१ ॥ ॥ श्रीः॥ ॥छ॥ ॥छ॥ ॥

पि णिचि कर्मत्वं नक्षत्रयोगे ज्ञीति तदृशि च ज्ञि ज्ञानात्यर्थे नक्षत्रयोगे यत्कृदं संवर्त्तते तस्माज्ज्ञानातीत्यस्मिन्नर्थे णिज् भवति लुल्लुगित्यादि पू
र्ववत् पुष्ययोगमिति· पुष्येण चन्द्रमसो योगः पुष्ययोग इति कर्त्तरि तृतीया उभयप्राप्तौ कर्मणीति नियमात् षष्ठी न भवति चन्द्रमस इति नियमेन गम्यमान
त्वादुभयप्राप्तिः पुष्यो हि चन्द्रमसं युनक्ति संबध्नातीति तत्र युजेर्गत्यादिषु न तत्र भवितव्यं करणे कर्तुः पुष्यस्य शुद्धे णिचि कर्तृत्वमेवेत्यस्मिन्नपि णिचि क
र्तृत्वात्तृतीया भवति पुष्येण योजयतीति लकारस्तु प्रधान एव कर्त्तरि भवति यथा शुद्धे णिचि तत्र हि देवदत्त इव कर्मण्यनु वक्ष्यमाणं इह तावत्सूर्यमुद्गमयती
ति तिपो यस्य प्रवर्त्ती संतस्याभिप्रायं निर्वर्त्तयति गन्तुश्चायमभिप्रायः माहिष्मत्यां सूर्योद्गमनं संभावयेयमिति तं च सूर्यो निर्वर्त्तयति॥ ॥ ॥

॥ ॥राम॥ ॥छ॥ ॥

का॰प॰३॰१

२३

।।एतदेव प्रवर्त्तयिस्य प्रवर्त्तित्वं यदुक्तं प्रवर्त्तीपितुरभिप्रायसंपादनं नहि कश्चित्परो मुग्धहीतमइति प्रवर्त्तते सर्वदिमे स्वभूत्यर्थं यत्तावदेते गुरुस्तच्छुश्रूषं
ते तेपीह प्रीतो गुरुरध्यापयिष्यति परत्र वा सुखेष्याम इति वर्त्तते दासाश्चापि भक्तं चेलं च लप्स्यामहे पीभाषाश्च ननो भविष्यन्तीति प्रवर्त्तते यः स्तनिं दउपा
लंभ लत्र स्यात्परिभाषणं शिल्पिनोपि मित्राणि च नो भविष्यन्तीति वेतनं च लप्स्यामह इति प्रवर्त्तते य एवं त्र सर्वत्र तत्त्वदृष्टे शेन प्रवृत्तिः स्यैतु न तथा लथाप्य
भिप्रायसंपत्तिमात्रेणा प्रयोज्यप्रयोजकभावाध्यारोपेणणिज् भविष्यति। इह च कंसं घातयतीति येतावदेते कंसघातानुकारिणां नटानां व्याख्यानोपा
ति कंसानुकारिणां नेपथ्ये सामाजिकैः कंसबुद्ध्या गृहीतं तं तादृशो नेव वासुदेवेन घातयंति यपि चित्रं व्याचक्षते ऽयं मथुरा अयं प्रासादः अयं कंसः अ
यं भगवान् वासुदेवः प्रविष्टः एताः कंसकर्षिण्यो रज्जवः एते ऽरूपाणि निपातिताश्च प्रहाराः अयं हतः कंसः अयमाकृष्ट इति तेपि चित्रगतं कं
सं तादृशो नैव वासुदेवेन घातयंति चित्रेपि हितबुद्धिरेव परस्पतः एते न चित्रलेखका व्याख्याताः। येपि ग्रंथवाचयंतः कंसवधमाचक्षते काथि
कानामतेषु सत्तिप्रभृत्याविनाशात्कंसादीन् वर्णयंति तेपि वर्णयमानाः श्रोतॄणां बुद्धिस्थाः प्रसक्षवद्दर्शयंति चित्तमपि तेषां तदात्मकमिव भ
वति अत एव व्याश्रितास्च भवंति नानापक्षसमाश्रयो व्याश्रयः केचित्कंसभक्ताः केचिद्वासुदेवभक्ताः वर्णान्यत्वं खल्वपि पुष्यंति केचिद्र
क्तमुखाः केचित्कालमुखाः त्रैकाल्यमपि लोके लक्ष्यते कथायां वा अमानायां हि वक्तारोपवंति गच्छ हन्यते कंसः गच्छ घानिष्यते कंसः
किं गतेन हतः कंसः इति तद्देवं काश्चित्कोपि बुद्धिस्थेन वासुदेवेन घातयति श्रोतापि शब्दोपहितरूपांश्च बुद्धेर्विषयतां नातान् प्रसक्षमिव राम॰
कंसादीन् साधनमस्यते एवं ग्रोजानमागामपतीलासादृश्यापि यथासंभवं द्रष्टव्यं।। ।।२१।। ।।२३।। ।।२।। ।। २३

॥कंड्वादिभ्यः॥ ॥षष्ठीमेकंड्वादयोधातवएवस्युस्ततोयग्रहणमनुवर्त्ततेवानवाअनुवर्त्तनेयगभावपक्षेलङादिषुसत्सुकंड्वतीत्याद्यनिष्टंप्रसज्ये
तकंड्वतित्यादिचनस्यात्धातोःसुवभावात्क्विबंतात्सुसंभवेपिकंडूरीतिनवेदनामात्रंगम्यतेकर्त्तरिक्विपोविधानात्संपदादित्वाद्भावेक्विब्भविष्यतिएवम
पिकंड्वौकंड्वःअचिश्नुधातिसुवङ्प्राप्नोतिकंड्वाकंड्वेनोरुःधात्वोरितिविभक्तौरुदात्तनिषेधःस्यात्मंतुर्वल्गुरित्यत्रचतुक्प्रसंगःअथनानुवर्त्ततेकंड्
रितिनसिध्यतियगंतात्संपदादित्वाद्भावेक्विप्यल्लोपयलोपयोःकृतयोर्भविष्यतिनचैवमल्लोपस्यस्थानिवत्वादुवङ्प्रसंगःकौलुप्तनस्थानिवदिति
वचनात्ननुचक्वौविधिंप्रतिसप्रतिषेधःअन्यथालवमाचक्षाणोलोरित्यत्रक्वौलुप्तस्यणेःस्थानिवत्वाभावेपिणौकृतस्यटिलोपस्यस्थानिवत्वाद्वृद्धिःन
स्यात्अतोत्रस्थानिवत्वेसत्युवङ्स्यादेवअसत्कृष्णौःश्रुडिट्कौक्विप्यनेनवोगुणपिकर्त्तमोस्थानिवत्वंतस्यक्वौविधित्वात्आदिष्टाटचःपूर्वत्वाच्चतत्र

॥कंड्वादिभ्योयक्॥ ॥कंडूञ् इत्येवमादिभ्योयक्प्रत्ययोभवति द्विविधाः कंड्वादयोधातवः प्राति
पदिकानिच तत्रधात्वधिकाराद्धातुभ्यएवप्रत्ययोविधीयतेपदं कंडू नतुप्रातिपदिकेभ्यः तथाचगुण
प्रतिषेधार्थः ककारोनुबध्यते॥ ॥

एवोठिकृतेपुनरुवङोप्रसंगःएवमपिकंड्वःकंड्वाकंड्वोधातुविधिःप्राप्नोतिमंतुर्वल्गुरितिचनसिध्यतियकिदीर्घेकृतेमंतूर्वल्गूरितिस्यात्अ
थप्रातिपदिकान्येवतत्रापिवाग्रहणाननुकृतौसएवदोषःपोधातुपक्षेअनुवर्त्तनंनहिवाग्रहणंसंतुचप्रातिपदिकान्येवतत्रायमप्यर्थःककारो
नानुबध्यतेभवतिअनार्द्धधातुकत्वाल्लिटेवगुणोनभविष्यतिनेवंशक्यंइहहिसुखमतिदुःखतिमगधतीत्यतोलोपोनस्यात्अनार्द्धधातुकत्वा
देवनघञ्जनात्एवशमःपाटिलुपगमावपक्षेपितथाप्रयोगप्रसंगात्ततउभयेकंड्वादयइत्याहद्विविधाःकंड्वादयइति।धातुभ्यएवप्रत्ययोविधी
यतइति।नित्यमितिभावः।तेनपक्षेकंड्वतीत्यादिनभवति।ननुप्रातिपदिकेभ्यइति।तेनकंड्वौकंड्वःमंतुरित्यादिप्रयोगसिद्धिःनचास्मिन्नपि
पक्षेतापद्यधिविधीयतेतदापर्वेक्तिदोषानुषंगःकिंकारणंइतिग्रहणादेतेभ्यःक्विपस्यात्नचैतेभ्यइदानींक्विब्दृश्यतेपूर्वत्रतुपक्षेकंडूरी
तिसिद्ध्यर्थमेवक्विबिष्टव्यःकथंपुनर्ज्ञायतेउभयेकंड्वादयइतितच्छ्लोकेनदर्शयति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

का·प्र·२१ धातुप्रकरणादिति। अनुवृत्तेन धातुग्रहणेन विशेषणात् ककारासंजनाच्च धातुत्वमेषामभिमतमिति विज्ञायते। तस्यार्थः यत् स्तु खल्वयमाचार्यः
कं. डिद्दीर्घमुच्चारयति कंडूञ् तृणीञ् महीङिति ततोऽयमन्येषां धातुर्विभाषित इति धातुत्वमेषां विभाषितमिति मन्यत इत्यर्थः। अथ कंड्वादीनामर्थनिर्देशः
२५ कंडूञ् गात्रविकर्षणे। मंतु तृणीञ् रोषे। वल्गु पूजामाधुर्ययोः। असु मनस् उपतापे। महीङ् वृद्धिपूजनयोः। लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने। इ
रस् इरज् ईर्ष्यायां। दुवस् परिचरणे। मेधा आशुग्रहणे। कुषुभ क्षेपे। मगध परिवेष्टने। तंतस् दुःखे। सुख दुःख तत्क्रियायां। सपर पूजायां। अ
र आराकर्मणि। भिषज् चिकित्सायां। भिष्णज् उपसेवायां। इषुध शरधारणे। चरण भुरण गतौ। चुरण चौर्ये च। तुरण त्वरायां। भुरण धारणपो

धातुप्रकरणाद्धातुः कस्य चासंजनादपि। आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः। कंडूञ्। कंडूयति। कंडूयते। ञित्वात्
कर्त्रभिप्राये क्रियाफले इत्यात्मनेपदं। कंडूञ्। मंतु तृणीञ्। वल्गु। असु। मनस्। महीङ्। लेट्। लोट्। इरस्। इरज्। इरञ्। दुव
स्। मेधा। कुषुभ। मगध। तंतस्। पंपस्। सुख दुःख। सपर। अर। भिषज्। भिष्णज्। इषुध। चरण। भुरण। तुरण। भुरण। ग
द्गद। एला। केला। खेला। लिट्। लोट्॥ ॥गुपूधूपविच्छिपणिपनिभ्य आयः॥ ॥गुपू रक्षणे। धूप संतापे। विच्छ गतौ। प
ण व्यवहारे स्तुतौ च। पन च। इत्येतेभ्यो धातुभ्य आयप्रत्ययो भवति। गोपायति। धूपायति। विच्छायति। पणायति। पनाय
ति। स्तुत्यर्थेनैव पणिना साहचर्यात्तदर्थः पणिः प्रत्ययमुत्पादयति न व्यवहारार्थः। शतस्य पणते सहस्रस्य पणते। अनु
बंधश्च केवले चरितार्थस्तेनायप्रत्ययान्तात् आत्मनेपदं भवति॥२१॥

धारणयोः। गद्गद वाक्स्खलने। एला केला खेला विलासे। लिट् अल्पार्थे कुत्सायां च। लोट् दीप्तौ॥ ॥गुपूधूप॥ ।विच्छायतीति। विच्छिरयं तुदा
दिः पठ्यते तत्सामर्थ्यादायप्रत्ययान्तादपि शविकरणो भवति न तु शप्। यथा जुगुप्सते इत्यात्मनेपदं तेन विच्छायंती विच्छायतीति आच्छीनद्योर्नुमिति एम०
नुम्विकल्पो भवति। अन्ये तु सार्वधातुके आयप्रत्ययस्यैव तुदादिपाठसामर्थ्यान्न विकल्पमाहुः। स्तुत्यर्थेनेति महिकाव्ये तु व्यवहारार्थादप्यायः। न चो २५
पलेवति ज्ञापणापाद इति। अनुबंधः केवले चरितार्थ इति। अवयवे च विचरितार्थो लिंगं समुदायस्य विशेषकं भवति यथा गुपादीनामनुदात्तेत्त्वमि
ति भावः। ये तु व्यवहारार्थादप्यायमिच्छंति तेषामपि पणायमानेय णापिष्यती स्याद्वा वनुबंधः केवले चरितार्थः॥ ॥२२॥ ॥ ॥

॥ऋतेरीयङ्॥ ॥सौत्र इति॥ अस्मिन्नेव सूत्रे उच्चरित इत्यर्थः॥ ॥घृणायां वर्त्तत इति॥ नात्र कृपापर्यायो घृणाशब्दः किं तर्हि जुगुप्सायां घृणा जुगुप्सा कृपयोरिति
वचनात् जुगुप्सा निन्दा बीभत्सेत्यर्थः ऋतीयाशब्दो बीभत्सापर्यायो निघण्टुषु पठितः॥ अथ कस्मादीयङ् उच्यते न च्छिङ्॰ वा उच्यते तस्य ईयादेशे कृते ऋतीय
त इति सिद्धं परत्वादिङागमे कृते तस्य प्रत्ययादिलोपादेशो न स्यादिति चेत् न अन्तरङ्गत्वात् आपन्नादिरूपदेश एव इवर्णस्य सिद्धार्थमिति वचनादन्तरङ्गत्वं।
ज्ञापनार्थमेतत् ज्ञापयति धातुप्रत्ययानामायन्नादयो न भवन्तीति तेन कणोह इत्यत्र कारादेशो न भवति क्वचित्तु कृत्तावेवं यथा तेन ऋतेश्छङिः स्यैव सिद्धे ईयङ्
कं ज्ञापकं धातुविहितानामायन्नादयो न भवन्तीति अत्र ब्रूमः द्विवचनविभज्योपपदे तरबीयसुना ईयसेव सिद्धे ईयसुन्वचनं ज्ञापकं प्रातिपदिक

॥ऋतेरीयङ्॥ ॥ऋतिः सौत्रो धातुर्घृणायां वर्त्तते तत ईयङ् प्रत्ययो भवति॰ ङकार आत्मनेपदार्थः॥ ऋतीय
ते॰ ऋतीयेते॰ ऋतीयन्ते॰ ऋतेश्च ङित्ति सिद्धे ईयङ्वचनं ज्ञापकार्थं धातुविहितानां प्रत्ययानामायन्नादयो न भ
वन्तीति॥ ॥कमेर्णिङ्॥ ॥कमेर्धातोर्णिङ् प्रत्ययो भवति॰ णकारो वृद्ध्यर्थः॰ ङकार आत्मनेपदार्थः॥ का
मयते॰ कामयेते॰ कामयन्ते॰ ॥ ॥ २३ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

प्रत्ययानामायन्नादयो न भवन्तीति उच्यते चायन्नादयस्तेवचनादुभयेषामपि सुस्तस्माद् ऋतेश्छङि स्यादिवृद्धो न पठनीयमिति॥ ॥कमेर्णिङ्॥ ॥
इह णिङो णकारो रोऽशनीति विशेषणार्थश्च स्थितार्थो ङकार आत्मनेपदार्थ उभयोश्च तदर्थयोः प्रतिषेधबलीयस्त्वात् उपधाया इति वृद्धेः ङित इति चे
त्प्रतिषेधः प्राप्नोति ज्ञापकात्सिद्धं यदयं न कम्यमिचमामिति कमेर्मित्संज्ञायाः प्रतिषेधं शास्ति तज्ज्ञापयति भवत्यत्र वृद्धिरिति तस्य हि प्रयोजनं मितां
ह्रस्व इति ह्रस्वो मा भूदिति यदि चात्र वृद्धिर्न स्यात् ह्रस्वयत्नोपपत्तिः कुतो मित्संज्ञाप्रतिषेधो नर्थकः स्यात् नैतदस्ति ज्ञापकं यदा णिङ् तादर्थ्यमस्मिन्नक्रिय
ते तदा णिङ् तस्य णिचि या वृद्धिस्तस्या ह्रस्वो मा भूदित्येवमर्थमेतत्स्यात् न च णिजपेक्षायामपि हि हेतौ णिङि मेवङि तमये स्यात् प्रतिषेधः किं कारणं णिङ् नीति
निमित्तसप्तमी॥ ॥छ॥ ॥छ॥ ॥

का॰प॰ह॰री
२५

ननु च णीडुं· तस्य णेश्चिवृत्त्या भवितव्यं णेरव्यवहितत्वात् णिलोपेपि कृते स्थानिवद्भावाद्व्यवधानमेव यदा तर्हि णिङं नाच्चिण्णमुलोभ
वतः तदा चिण्णमुलोर्दीर्घ इत्यस्यापि त्येषविधिर्मा भूदित्येवमर्थोपि मित् संज्ञाप्रतिषेधः स्यात्· किं पुनः कारणं तत्र दीर्घोन्यतरस्यामिति सूच्यते न प्रकृ
तो ह्रस्व एव विकल्प्यते त एवं हि कमेर्मित्संज्ञाप्रतिषेधो न कर्तव्यो भवति कथं यदा णिङि· वृद्धिर्नास्ति तदा ह्रस्व एवोपधेति सिद्ध्यति ह्रस्व विकल्पे
नैव निष्प्रसंगः अशमि अशामीत्यादि चमि हृ नैवं शक्यं यदा शमिप्रभृतिभ्यो णिज् तेभ्यो द्वितीयो णिच् क्रियते तदा न स्यात् यश्च णमु
ल्परो णिज् द्वितीयः न तस्मिन् मित्संज्ञा प्रथमेन णिचा व्यवहितत्वात् यस्मिंश्च मित्संज्ञा प्रथमेन णिचा विना सो चिण्णमुल्परः द्वितीयेन व्यवहि
तत्वात् णिलोपेपि कृते स्थानिवद्भावाद्व्यवधानमेव दीर्घोन्यतरस्यामिति सूच्यमानो पुनस्त्रापि भवति दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधात्· ते
भ्यः शमिप्रभृतिभ्यो पदं· तेभ्यो णिच्यल्लोपयलोपयोः पयोर्लोपस्य स्थानिवद्भावात् सत्यां वृद्धौ चिण्णमुलोः कृतयोरशंशमि अशंशामि शंश
मं शंशाममिति न स्यात् दीर्घः पुनर्विकल्प्यमानोत्रापि भवति तद्विधौ स्थानिवद्भावप्रतिषेधात्· तथा हेडृ अनादरे घटादिः एवं इङ्स्वादे
शो हिडयति तत्र चिण्णमुलोः कृतयोर्ह्रस्वविकल्प्यमाने अहिडि अहेडि इति स्यात् दीर्घे तु पुनः अहिडि अहीडि इति भवति तस्माद्दीर्घ एव विक
ल्पनीयः ततश्च मित्संज्ञाप्रतिषेधोपि तन्निवृत्त्यपेक्षणः । तथा आपादयः आ ईधातुके वेति णिङ्भावे त्वामितिह्व वृद्धौ कृतायां मि
तां ह्रस्व इति ह्रस्वो मा भूदित्येवमर्थोपि मित्संज्ञाप्रतिषेधो वक्तव्य एवेत्यज्ञायकमेतत् । एवं तर्ह्येषा स्थानेयत्नः क्रियते तेनैवात्र प्रतिषेधः प्र राम॰
प्नोति किं कारणं णिलक्षणयोर्गुणवृद्ध्योः प्रतिषेधः न चैषा इग्लक्षणा वृद्धिरिति सलमतिकर्क्षाशप्रक्रियातर्क्कानुसरणेन ॥ २३ ॥ २५

॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥

आयादयः॥ ॥आर्द्धधातुक इति परसप्तम्या आयादिविधिभिरेकवाक्यता वा स्याद्भिन्नवाक्यता वा एकवाक्यतायामयमर्थो भवति गुपादिभ्य आर्द्धधातुके परतो वा आयप्रत्ययो भवतीति एवमुक्तं तत्राश्रिते तत आर्द्धधातुक एव विकल्पेनायादयः स्युः सार्वधातुके नैव स्युः नैष दोषः इष्यगारम्भात् पाहि आर्द्धधातुक एवायादीनामुत्पत्तिरिष्यते ततो गुपादिभिः संयुक्तैव निर्दिष्टो न गुपादिभ्य आर्द्धधातुके वेति एवं सूत्रपाठ इति न वक्तव्यं भवति यत्त्वेवं कृत्वा निर्दिश तितेनयमापद्ये आपार्थभेदेनैकवाक्यतेति तत आयमर्थो भवति गुपादिभ्यो नित्यमायप्रत्ययो भवति आर्द्धधातुके वेति च एवमपि गुपाद्यर्थे सार्द्धधातुकं प्राप्तं तत्र ततो विहिते विकरणवद्विकल्पेनायादयः स्युः ततश्च स्त्रीभावविवक्षायां गुपेः प्रत्ययान्तत्वात् किं निकृतेयं ह्या आयप्रत्ययो न भवति तदा गुप्तिरिति कामम सिद्धं सिद्ध्यति यदा तु भवति तदा अलोपयलोपयोर्गोपायतिरित्यनिष्टं प्राप्नोति गोपायेति चेष्टं न सिद्ध्यति भिन्नवाक्यतायां लायाधं तायदार्द्धधातुकं प्राप्तं तत्र ततो विहिते आयादयो वा भवन्तीत्यर्थः स्यात् तत्र चायायं तावदार्द्धधातुकमिति वदतां तेषामुत्पत्तिस्त्वङ्गीकृतानवोत्पन्नानामुत्पन्नविकल्पः शक्यते कर्तुं

॥आयादय आर्द्धधातुके वा॥ ॥आर्द्धधातुकविषये आर्द्धधातुकविवक्षायामायादयो वा भवन्ति। गोप्ता। गोपायिता। अर्त्तिता। ऋतीयिता। कमिता। कामयिता। नित्यं प्रत्ययप्रसङ्गे तदुत्पत्तिरार्द्धधातुकविषये विकल्प्यते। तत्र यथायथं प्रत्यया भवन्ति। गुप्तिः गोपाया॥ ॥छ॥ ॥

मिति लोपस्यायेन निवृत्तिर्विकल्पो भवति ततश्चायप्रत्ययान्तात् स्त्रीभावविवक्षायामप्रत्यया ह्रस्वकारप्रत्यये कृते निवृत्त्यभावपक्षे गोपायेति काममिष्टं सिद्ध्यति निवृत्तिपक्षे तु गोपेत्यनिष्टं प्राप्नोति गुप्तिरिति चेष्टं न सिद्ध्यति लिटि च निवृत्त्यभावपक्षे गोपायां चकारेति काममिष्टं सिद्ध्यति निवृत्तिपक्षे तु यदि लिटि परतो निवृत्तिस्तथापि प्रत्ययलक्षणेन कास्प्रत्ययादित्याम्भवितव्यं अथाप्याम्विकृते निवृ [illegible] त्तिस्तथापि तस्यैव श्रवणं प्राप्नोति सर्वथा गोपा चकारेत्यनिष्टं प्राप्नोति जुगोपेति चेष्टं न सिद्ध्यति तस्मादुष्ट एवायं परसप्तमीपक्ष इति मत्वाह आर्द्धधातुके विषय इति। कोर्थ इत्याह आर्द्धधातुकविवक्षायामिति। आर्द्धधातुकमिहोत्पादयिष्यामीति बुद्धौ सत्यामित्यर्थः विषयसप्तमीपक्षेपि भिन्नवाक्यतायामार्द्धधातुके विधित्सिते आयादयो भवन्तीत्युक्ते कुतो विधित्सित उत्पत्ते आयामायाघंतस्यापि धातुत्वान्ननु इति तम्पेत तत्र निवृत्तिपक्ष एवाश्रित इति स एव दोषोयं पूर्वमवोचाम तस्मादेकवाक्यतयोत्पत्तिविकल्पं इत्याह नित्यं प्रत्ययप्रसङ्गे तदुत्पत्तिरार्द्धधातुके विकल्प्यत इति। किमेवं सति सिद्धं भवतीत्याह तत्रेति॥ ॥छ॥ ॥छ॥ ॥

का·पद· ॥सनाद्यंताः॥ ॥सनादयोंते येषामिति। अंतशब्दः समीपवचनः गमकत्वाद्व्यधिकरणेपि बहुव्रीहिः। अथवा अंततावयवमात्रं प्रदर्शितं सूत्रे तदवयव
२६ वाचिनों तशब्दस्य समानाधिकरणोसेव बहुव्रीहिः सनादयोंता अवयवा येषामिति। समुदायाइति। अनेन तद्गुणसंविज्ञानो बहुव्रीहिरश्रीयत प्रतिदर्श
यति। धातुसंज्ञाइति। धातुशब्दो त्रस्वरूपपदार्थको न भूवादिपदार्थकत्वात् ती नां संज्ञानो विधाने प्रयोजनाभावात्। सुप्तिङं तमिस्त्रांतग्रहणेन ज्ञा
पितं संज्ञाविधौ प्रत्ययग्रहणोप्रत्ययग्रहणपरिभाषा न प्रवर्ततइति ततश्चासत्यंतग्रहणो तदंतविधिर्न स्यादिस्त्रांतग्रहणं कृतं एवं स्थितेयघपूर्व एवानं
नतदंतविधिः क्रियेत ततोहेवदत्तमिश्रिकीर्षतीति देवदत्तादेः समुदायस्य संज्ञाप्रसंगे नेतिमलाह प्रत्ययग्रहणपरिभाषैवेसादि अपूर्वविधौ तु मोरवं प्र

॥सनाद्यंताधातवः॥ ॥सन आदिर्येषां ते सनादयः सनादयोंते येषां ते सनाद्यंताः सनाद्यंताः समुदायाधा
तुसंज्ञाभवंति· प्रत्ययग्रहणपरिभाषैव पदसंज्ञायामंतवचनेन लिंगेन प्रतिषिद्धा सती पुनरिहांतवचनेन प्र
तिप्रसूयते· चिकीर्षति· पुत्रीयति· पुत्रकाम्यति॥ ॥२५॥ ॥श्रीः॥ ॥श्री॥ ॥

तिप्रसचेतु फलस्य लाघवं भवतीति भावः। भूवादयइत्यस्यानंतरं सनाद्यंताश्चेत्युच्यमाने सनादीनामियत्तापरिच्छेदो न स्यात् एवं तर्हि संड· ताश्चेत्युच्यतां
संडि· तिप्रत्याहारः सनः सशब्दादारभ्याणिङोङ·कारात् एवमपि संदेहः स्यात् वर्णादिष्वपि ङकारस्य भावात्। एवं तर्हि सनाद्यंताइत्यस्यानंतरं भूवादयश्चे एम०
तिवक्तव्यः। स्यादितत एवमुच्यमाने सनातशब्दवद्भूवादिशब्दोपि प्रकृतोयेक्षः स्यात् ततश्चानुक्रांतानां गुपादीनामेव स्यादिति एवमपि भूवादिग्रह २६
णमर्थकं गुपादयश्चेतिवक्तव्यं नानर्थकं भूवोवादयो भूवादयइत्येवमर्थमेतत्स्यात् भूवादिपाठइदानीं किमर्थः स्यात् अनगोणकार्यार्थानुबंधासं
जनार्थश्च येषां तर्हि तदुभयं न संभवति भूरणिप्रभृतीनां तेषां पाठः किमर्थो लिमति निबंधेन॥ ॥२५॥ ॥छ॥ ॥

।।स्यतासी।। ।।इहयद्यपि ऌ इत्यनुकरणमुच्चारितमेकमेव तथापि तस्य प्रतिपाद्यमनुकार्यं भिद्यते ऌट् ऌङ् इति यत्र च प्रतिपाद्यानां संख्यासाम्यं
तत्र संख्यातानुदेशः न तु उच्चारितरूपसाम्ये अन्यथा परस्मैपदानामपि एकं तावद्रूपं स्तु न वेति वैषम्यान्न स्यात् तथा डारौरसः प्रथमस्येत्यत्रापि न स्यात् तदेवं
ऌ इत्यस्य द्वे प्रतिपाद्ये लुडिति चापरमिति त्रीणि निमित्तानि निमित्तिनौ तु द्वाविति वैषम्यात्संख्यातानुदेशो न प्राप्नोतीत्यत आह ऌरूपमुत्सृष्टानुबन्धं सामान्यमेक
मेवेति। नात्र प्रतिपाद्यं भिद्यते यत्तदुभयानुगतमुत्सृष्टानुबन्धं ऌ इति सामान्यरूपं तदनुक्रियते एतच्च ऌलुटोरिति द्विवचननिर्देशादवगम्यते तत्र यथानुकरणेन
भेदस्तथानुकार्येपीत्यर्थः। करिष्यतीति। ऋद्धनोः स्ये इति इट्। कर्तेति। स्य इत्यस्यैव प्रत्यासत्त्या ... निवृत्त्यर्थः। इदित्करणमिति। इत्संज्ञाकस्येकारस्य
करणमित्यर्थः। अनुनासिकलोपप्रतिषेधार्थमिति। अन्यथा मन् तास् आ इति स्थिते टिलोपे कृते नकार उपधे स्यात् ततः नेपदे ... तिपरतो निदितामिति
नलोपः प्राप्नोति तस्यानिदितामितीत्त्वनिबन्धनः प्रतिषेधो यथा स्यादित्यर्थः। मन्ता संगन्तेति कोऽर्थः मन्ते सेतस्य इं संगन्ता संगस्यते संगन्तं भविष्यतीत्यर्थः

।।स्यतासी लृलुटोः।। ।।ऌरूपमुत्सृष्टानुबन्धं सामान्यमेकमेव तस्मिन् लुटि च परतो धातोर्यथासंख्यं स्यतासी प्रत्ययौ भवतः करिष्यति। अकरिष्यत्। श्वः कर्ता। इदित्करणमनुनासिकलोपप्रतिषेधार्थं। मन्ता। संगन्ता। २५

ननु संगन्ते सेतदुदाहरणं अनोपधत्वात् अनुस्वारपरसवर्णयोः कृतयोरपि तयोरसिद्धत्वात् अनोपध एवाऽयं अन्ये त्वाहुर्यथासिद्धत्वात्संगन्ते सेतदनुदाहरणं
मन्ते सेतदप्युदाहरणं न भवति अत्रापि टिलोपस्याभीयस्यासिद्धत्वात् मन् तास् आ इति स्थिते नकार उपधा न भवतीति पदद्वितमपाताच्छास्त्रीयमसिद्धत्व
मनित्यं अस्तोरल्लोप इति तपरकरणात् तत्र आसामासन्निसाद्ये मा भूदित्येवमर्थं तत्रासिद्धत्वादेव लोपो न भविष्यति किं तत्र द्वित्वार्थेन तपरत्वेन तत्
द्वाप्यत्यसिद्धत्वमनित्यमिति तेन देतनुदेतुरित्यत्र अथिग्रंथि इत्यसिं जीनामिति लिटः कित्वान्नलोपे तस्यासिद्धत्वाभावादेत्वाभ्यासलोपौ भवतः त
त्रत्र टिलोपस्यासिद्धत्वाभावान्मन् त् आ इति स्थिते उपधैव नकार इदमुदाहरणमिति। यद्येवं पूर्वत्रासिद्धत्वमनित्यं नमुनेत्यत्र नेति योगविभागात् तथा चे
कादेशास्ववशेषैतरङ्गः सिद्धो भवति सिज्लोपस्य कादेशे सिद्धो भवतीति निर्देशः षत्वादिषु सिद्धो भवति द्विर्वचननिषये च पूर्वत्रासिद्धीयं न भवतीति ततश्चानुस्वा
रपरसवर्णयोः सिद्धत्वात् संगन्ते सेतदप्युदाहरणमेवेति।। ।।

॥ अस्येतु संहृतं ते तिपठंति हंतेर्भावकर्मणोरिण्यात्मनेपद्यं तत्र संपूर्वस्यपाठे प्रयोजनं मृग्यं एवं तावज्जयादिष्ये नासिद्धत्वमनित्यमाश्रित्य तासेरिटि कारण
मनुनासिकलोपप्रतिषेधार्थमित्युक्तं । वामनस्तुटिलोपस्यासिद्धत्वादेव नलोपेन भविष्यतीति मन्यमानः इदितो नुम्धातो रित्यत्र वक्ष्यति तासिद्धासिचोरिटि
कार्यनास्ती त्युच्चारणार्थो निरनुनासिकइकारः यथ्यतइति यदि तु तासेरिकारे नुबंधः स्यात्ततो नुम्विधौ धातुग्रहणमधातोस्तासेर्माभूदित्येवमर्थंस्या
त्तत्रश्च धातुपदे शावस्थायामेव नुम्भवतीत्ययमर्थो नस्याश्रितः स्यादितितस्याभिप्रायः ।जयादित्यस्तु नुमविधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्था
मितिवचनमेवशरणमाशिश्रियत । इहविकरणाः केवलकारेपादाने नविधीयंते यथास्यादयः ते किंलावस्थायामेव भवंत्युताहो आदेशेषुकृ
तेषु पदिलावस्थायामेव ततमास्यनुदात्तेदित्यत्रयद्वक्ष्यते तासिः परस्यलसार्वधातुकस्यानुदात्तत्ववचनं ज्ञापकं सतिशिष्टोपिविकरणस्वरोल
सार्वधातुकस्वरं नबाधत इत्यस्यार्थस्येतितन्नोपपद्यते लावस्थायामेव तासौकृते तस्यच प्रत्ययाद्युदात्तत्वे पश्चाल्लादेशेषु क्रियमाणेषु तेषा
सार्वधातुकस्वरं नबाधत इत्यस्यार्थस्येति
मेव स्वरः सतिशिष्टो भवतीति तस्यानुदात्तत्ववचनमप्राप्तविधिरेवस्यात् तत्रकोदोषः चिनुतस्त्रिच्चंति क्रीणीतः क्रीणंतिशिष्टो विकरणस्वर एव
प्राप्नोति । द्वितीये तु पक्षे पूर्वं तिबादयः पश्चात्तासिरितितस्यैव स्वरः सतिशिष्टः तत्रश्च निघातस्वरे सोवसार्वधातुकानुदात्तत्वे सिद्धे तासि
ग्रहणं क्रियमाणमुक्तार्थस्यज्ञापकं संपद्यते । अस्तु तर्हि तथा यथैवं धातुमात्रात्सार्वधातुकमात्रे भावकर्मणोर्यक्कर्तरि तु शब्विधीयत
इतियक्शपावुत्सर्गौ तिबेवार्थेषु धातुमात्रात्सार्वधातुकविशेषे स्यादय इतितेपवादा ३ । तथा दिवादेर्धातुविशेषात्कर्तरि श्यन्नादयः
शपोपवादाः तत्रदेविष्यतीतिनिष्पत्तौ स्यादावुभयप्रसंगे अपवादविप्रतिषेधात्स्यनादयः स्युः पक्षांतरे त्वंतरंगाः स्यादय एव सिध्यंति ।
नैषदोषः दिवादिभ्यः श्यन्निसादिषु स्यादयोनुवर्तिष्यंते दिवादिभ्यः श्यन्न भवति लृलुटोस्तु स्यतासी भवतो दिवादिभ्य इति एवं सर्वत्र एते
नैतदपिनिरस्तंपतत्वल्लिदमाशंसते परेण लावस्थायां विधीयमानाः स्यादयः किमितिसार्वधातुकोत्पत्तिं प्रतीक्षंत इतिकथं उत्तरत्रानु
वृत्तेरेव सार्वधातुके यग्भवति भावकर्मणोः लृलुटोस्तु स्यतासी भवतः सार्वधातुके सार्वधातुके कर्तरि श्यन्न भवति लृलुटोस्तु स्यतासी
भवतः सार्वधातुक इति एवं सिजादिष्वपि द्रष्टव्यं तदेव मादेशेषु स्यादय इति स्थितं ॥ २५ ॥

॥सिब्बहुलं॥ ॥जोषिषत् मंदिषदिति। जुषी प्रीतिसेवनयोः मदिः स्तुतिमोदमदस्वप्नकान्तिगतिषु अनुदात्तेतौ व्यत्ययेन परस्मैपदे सिप् इट् लेटोऽडाटावितिति पोऽट् इ
तश्च लोपः परस्मैपदेष्विति इकारलोपः तत्र चवेति वर्त्तते तारिषदिति। तॄ प्लवनतरणयोः सिब्बहुलं छंदसि णिदिति वचनाद्वृद्धिः अभीषांसविता सा विषदि
ति यथा छांदसो वा दीर्घः स्यतातीति। ह्वल ह्नल पत ल्ट गतौ लेटोऽडाटाविलाट् इट पाप्तट्टै काट्क्रूः। आवयातीति च्युङ् प्रुङ् प्लुङ् गतौ रएंतः। इहावयाति सिप्ठीष्ट
इति पातेरवपूर्वाल्लिटि बहुलवचनात् सिप् यथा मयीषुटूरूर्य्य काबडुपदेशे नुदात्तादितितु प्रतिषेधो न भवति सिपा व्यवधानात्॥ ॥कास्प्रत्ययात्॥ ॥आमप्र
त्ययो भवतीति। हलंतप स एतदुक्तं अदंतपक्षे लाम प्रत्ययो भवतीति वक्तव्यं। अमंत्रविषय इति। मंत्रविषयश्चेत् प्रयोगो न भवतीत्यर्थः ऋग्यजुः सामलक्षणो मं
त्रः तत्रैव गाभियुक्तैर्मंत्रशब्दस्य प्रयोगात् आथर्वणा अपि मंत्रा ऋग्यजुष एवांतर्भवंतीति तांत्रिकेषु मंत्रशब्दप्रयोगो मंत्रवदुपचारात् छंदसीति नोक्तं ब्राह्मणेऽपि प्रथा

॥सिब्बहुलं लेटि॥ ॥धातोः सिप्प्रत्ययो भवति बहुलं लेटि परतः जोषिषत्· तारिषत्· मंदिषत्· मंदिषत्· न च भवति
पताति दिद्युत्· उदधिं आवयाति॥ ॥कास्प्रत्ययादाममंत्रे लिटि॥ ॥कास्शब्दः कृत्वा यांततः प्रत्ययांतेभ्यश्च धातुभ्य आ
म्प्रत्ययो भवति लिटि परतोऽमंत्रविषये· कासांचक्रे· प्रत्ययांतेभ्यः· लोलूयांचक्रे· अमंत्र इति किं कृष्णो नो नाव· कास्यनेकाच
इति वक्तव्यं चुलुंपाद्यर्थं· चुलुंपांचकार· चकासांचकार· दरिद्रांचकार· ॥ ॥

प्रात् अथ ह शुनः शेप ईक्षांचक्रे ते हृतदंतवैघासांचक्रिरे अविज्ञातानि च दर्शयांचकार· कासांचक्र इति। आमंतस्य पदत्वमाम इत्यत्रोपपादितं। नो नावेति नौ इति यदु
गंतात् प्रत्ययलक्षणेन प्राप्त आम् न भवति। कास्यनेकाच इति वक्तव्यमिति। यथा प्रासे हिक्कशब्दात् शब्दाद्वा गारिभ्यश्चाचारक्विबंतेभ्य एकाज्भ्योऽपि प्रत्ययांतत्वा
दाम्प्रसंगः चुलुंपादिभ्यश्चाप्रत्ययांतत्वादप्रसंगो तो व्याप्तिव्याप्तिपरिहाराय प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्त्तव्यमित्यर्थः तत्र कशब्दस्य णलि अ
चो ञ्णितीति वृद्धौ आत औ णलः चकौ अन्यत्रातो लोपे चकतुः चकुः अशब्दस्य णलि रूपमाविति अत्रोन्ये तु आदेश इति ही घर्ते आतो लोप इटि च अतुः उः। च
कासांचकारेति। चकास्दीप्तौ दरिद्रांचकारेति। आत औ णल इत्यत्र औकारविधानमेऔकारविधानं दरिद्रातेरेव इधातुके लोप इत्याकारलोपे अप्योकारस्य श्रव
णार्थं ते न दरिद्राविति अपि भवतीसाद्धः। चुलुंपांचकारेति। चुलुंपयति विलंबिकिकारवचनात्साधुः। आमोमकारस्य हलंत्यमितीत्संज्ञा कस्मान्न भवतीत्याह॥

का॰ प॰ ८० ॥ आमो मित्वमिति। कार्यांचकारेत्यादौ प्रयोगे यः आम् शब्दस्तस्यामित्वं मकार इत्संज्ञको यस्य नास्ति सो मित तस्य भावः अमित्वं। कुत इत्याह अदंतत्वादिति।
२८ अत् अंते समीपे यस्यासो अदंतः सूत्रे विधानवेलायां समीपे अकारवत्वादित्यर्थः तेनैतन्न नोदतीयं आम् वेलकथमदंतः अथादंतः कथमामिति। सूत्रे विधी
यमानस्यैव वा प्रत्ययस्योपलक्षणम् आम् इति। अगुणत्वं विदेस्तथेति। विदेर्धकोरल्पत्र विदेरामि गुणाभावोपि तथा अदंतत्वादेवेत्यर्थः अंदंतत्वादित्येतत्प्र
संगेन चेदमिहोक्तं उषविदजागृभ्योन्यतरस्यामित्यत्र तु वक्ष्यंतत्र हि विदेरकारांतत्वमाम् प्रत्ययसंनियोगे न निपात्यते तेन आतो लोपस्यस्यानिवृत्वात्गुणो

॥ ॥ आमोऽमित्वमदंतत्वादगुणत्वं विदेस्तथा। आस्तकासोराम्विधानाच्चपररूपं कृतंतवत्॥ ॥२६॥ ॥छ॥ ॥

न भवति मपुनर्विदिज्ञाने इत्यकारो विवक्षित इत्युच्यते वेदित्री त्यादौ श्रवणप्रसंगात्। अभ्युपेत्यापि मकारांतत्वमित्संज्ञाभावमाह आस्कासोराम्विधा
नाच्चेति। आमोऽमित्वमित्यनुषंगः सतिहि मित्वे आस्कासोराम् भवन्नयथवाम् संतात्परः स्यात्तथा च सवर्णदीर्घत्वे सत्यकिवित्कादः स्यात् अतो रूपायास राम॰
ञ्चकासप्रत्ययादितितिञ् आस्कासोराम्विधानात् अप्यामोऽमित्वमवसीयत इत्यर्थः। आम् च कासोर्विधानाच्चेत्यस्यैपठंति तदयुक्तं न हि सूत्रे चकास २८
आम्विधानमस्ति पदपिकास्यनेकाज् ग्रहणं तदपि चुलुंपाद्यर्थं सावकाशं। नन्वदंतत्वपक्षे अपापंत्र इति निर्देशः स्यात्तत्राह पररूपं कृतंतवदिति।
यथा सर्वत्र लोहितादिकतंतेभ्य इत्यत्र पररूपमेवमत्रापि निपातनात्पररूपमित्युक्तं भवति॥ ॥२६॥ ॥छ॥ ॥छ॥ ॥

॥इजादेश्च॥ ॥अऋच्छतिवर्जित इति॥ अऋच्छतिनास्यक्तः तद्रूपरहित इत्यर्थः ऋच्छतेरन्य इति यावत्. इयज उपवपेति। यजिवप्योर्हनमेणालिशालुलुभमोवे
तिणित्वाभावपक्षेऽत्रभावाद्गुरुमत्वाभावः एवं चलपिमसु हाहरणं इयाज्ञिथ इयष्ट उवपिथ उवप्थान्यत्र हं निपातपरिभाषयैवाम न भविष्यति संनि
पातजं त्वस्यां मस्यसंप्रमाणं तद्विघातकस्यामो निमित्तेन भवति आमि हि सति लेर्लुका भवितव्यमिति लिट्संनिपातमसो विहन्यात् इदं तर्हि प्रयुदा
हरणं इयेषेति नत्यत्र लिट्संनिपातजं निज्ञादित्वं आप क्रियमाणेऽपि गुरुमद्ग्रहणे कस्मादेवात्र न भवति यावता गुणे कृते गुरुमानेष भवति एवमोष
तुरित्यादावपि सवर्णदीर्घत्वे कृते गुरुमानेव भवति सत्यं सति गुरुमद्ग्रहणे संनिपातपरिभाषयैवात्राप्याम् न भवति लिडानंतर्यं हि तु कल्वा हुरुमत्वा

॥इजादेश्च गुरुमतोऽनृच्छः॥ ॥इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिटि परत आम्प्रत्ययो भव
ति। ईह चेष्टायां। ऊह वितर्के। ईहांचक्रे। ऊहांचक्रे। इजादेरिति किं। ततक्ष। रक्ष। गुरुमत इति किं। इयज। उवप। अनृ
च्छ इति किं। आनर्छ। आनर्छतुः। आनर्छुः। ऊर्णोतेश्च प्रतिषेधो वक्तव्यः। प्रोर्णुनाव। अथवा च ऊर्णोर्णुवद्भावोप
ऊ॰ प्रसिद्धिः प्रयोजनं। आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्॥ ॥

याः॥ अथवा गुरुमत इति नित्ययोगे मतुप् नित्यं यस्य गुरुणा संबंधः। पपेषं उच्छी विवासेऽप्युषांचकार उछ उंछे उच्छांचकार आम निमित्तत्वात् गु
रुमत्त्वात् तस्मादाम् न प्राप्नोति ज्ञापकात्सिद्धं यदयमनृच्छ इत्याह तज्ज्ञापयति भवत्येवं जातीयकेभ्य आमिति सन् तर्हि ज्ञापकार्थमृच्छतिप्रतिषेधो वक्तव्यो
भवति ननु चास्ति हि स्वार्थ एवासौ कर्तव्यः नार्थ आस्ति हि स्वार्थेन ज्ञापकात्सिद्धं यदयमनृच्छ इत्युक्तवानिति लिटि परतो गुणं शास्ति तज्ज्ञापयति नास्मादाम्
भवतीति न चात्र ऋच्छतीत्यनेनात्रैश्लिपा निर्देशः ऋच्छत्यृतामिति तेरपि सरूपेणैव प्रश्लेषात् प्रश्लेषे वा ऋवचनमत्र प्रमाणं अतेश्च लिटि गुणविधाने प्र
योजनं तत्रैव वक्ष्यामः तस्मादृच्छतेर्गुणविधानं ज्ञापकमेव तस्मादाम् न भवतीति स एषोऽनृच्छ इति प्रतिषेधो ज्ञापकार्थ एव कर्तव्यः स्यात्॥ ॥

।एवंतर्हि तिटीति विहितविशेषणं इजादेर्गुरुमतो योलिट्ठि हितस्तत्रेतितेनलि। एनिमित्ताय स्यगुरुमत्त्वात्तस्माच्चनभविष्यति आमनिमित्तायस्यगुरु
मत्त्वात्तस्माच्चभविष्यति अनृच्छ इति प्रतिषेधस्तुक्रियतां मा भूत् कारि। ककिंचित्तु गुरुमत इति किं इयेष उवोषेति पठ्यते तत्र उवोषेत्युदाहरणमयुक्तं उष वि
दजागृभ्य इति विकल्पविधानात् नित्यस्य विधेः प्रसंगाभावात् अन्यथा विकल्पविधानमनवकाशं स्यात्। प्रोर्णुनावेति। अजादेर्द्वितीयस्य न न्द्राः संयोगा
दय इति नुशब्दस्य द्विर्वचनं। कार्यान्तरसिद्ध्यर्थमवश्यमूर्णोतेर्णुविद्भावो वाच्यः तेनैवामोपि प्रतिषेधः सिद्ध इत्याह अथवा वाच्य इति। तत्र यङि भावाति
देशः आमि टोत्वभावात्तिदेशान्नोतौ तयोभावात्। इजुपग्रहइट्प्रतिषेधः विभागुण इति पंचमी यत्नस्य चात्र हेतुत्वं यथाध्ययनेन वसतीति एका

॥दयायासश्च॥ दय दानगतिरक्षणेषु। अय गतौ। आस उपवेशने। एतेभ्यश्च लिटि परत आम्प्रत्ययो भवति। दया
चक्रे। पलायांचक्रे। आसांचक्रे॥ ॥उषविदजागृभ्योन्यतरस्यां॥ ॥उष दाहे। विद ज्ञाने। जागृ निद्राक्षये। एतेभ्यो लि
टि परतो ऽन्यतरस्यामाम्प्रत्ययो भवति। ओषांचकार। उवोष। विदांचकार। विवेद। जागरांचकार। जजागार। विदेरदंतत्व
प्रतिज्ञानादामि गुणो न भवति॥ ॥ २७ ॥ ॥छ॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥

च इति वर्त्तमाने श्रुकः किती तियङ्इट्प्रतिषेधः ततोपि हेतो एकि ज्ञायो वाच्य इत्यर्थः उदाहरणानि प्रोर्णोनूयते प्रोर्णुनाव प्रोर्णुतः प्रोर्णुतवानिति॥
॥दयायासः॥ ॥दयायासः सर्वेप्यनुदात्तेतः। पलायांचक्र इति। उपसर्गस्यायताविति उपसर्गस्य लत्वं॥ ॥उषविद॥ ॥विद ज्ञान इति। सत्ताविचा
रणार्थयोस्त्वात्मनेपदित्वोर्लाभार्थस्य चोभयपदित्वो ग्रहणं न भवति परस्मैपदिभ्य उषिजागृभ्यो जागर्त्तिना धात्वादिकेन साहचर्यादिति भावः। वि
वेदेति। आम्प्रत्ययसंनियोगे नादंतत्वप्रतिज्ञानादत्र गुणो भवत्येव अत एवाह विदेरदंतत्वप्रतिज्ञानादामि गुणो न भवतीति॥ २७ ॥ ॥ राम० २९

॥भह्रीभृहुः॥ ॥श्लुवत्कार्यमपेक्ष्यास्तत्रैषष्ठीसंनियोगशिष्टत्वाच्चाम् प्रत्ययोपि तेभ्य एव विधीयमाने पित्तत्परित्यागेनालभ्यमानस्यापि रवादिस्य प्रतिनि
षिनाकारणाहिनाप्रयोगः परिसमाप्यते एवं हि प्रारब्धः प्रयोगः परिसमापितो भवति इक्यां तदेपादानेतु प्रयोगान्तरं स्यात् द्रव्यभेदे क्रियाभेदात् प्रतिनिर्दि
ष्टस्य मुख्यबुद्ध्योपादीयते तद्द्वयवानान्तरमप्ययसंसंभवात् तथेहाप्यामन्ते न लिट्प्रयोगः प्राप्नोति परिसमाप्तः साक्षात्कांस्यादिः नम एवं प्रयोगो नुप्रयो
गो नुप्रयोगेणापरिसमाप्यमानो यत्कृञ् लिट्परस्यैवानुप्रयोगेणापरिसमाप्यते तस्मादाम्नाति प्रत्ययान्तस्य परस्यानुप्रयोगप्रसंगः तस्माल्लिड्डितीयस्य मध्यमे

॥भीह्रीभृहुवांश्लुवच्च॥ ॥ञिभी भये· ह्री लज्जायां· डुभृञ् धारणपोषणयोः· हु दानादनयोः। एतेभ्यो लिटि
परत आम्प्रत्ययो भवत्यन्यतरस्यां· श्लाविव चास्मिन्कार्यं भवति· किं पुनस्तत्· द्वित्वमित्त्वं च· बिभयांचकार· बिभाय·
जिह्रयांचकार· जिह्राय· बिभरांचकार· बभार· जुहवांचकार· जुहाव॥ ॥कृञ्चानुप्रयुज्यते लिटि॥ आम्प्रत्य
यस्य पश्चात्कृञनुप्रयुज्यते लिटि परतः· कृञिति प्रत्याहारेण कृभ्वस्तयो गृह्यन्ते· तत्सामर्थ्यादस्तेर्भूभावो न भव
ति· पाचयांचकार· पाचयांबभूव· पाचयामास· २८ ॥

नविधानमः इदं तर्हि प्रयोजनं अनुप्रयोगः पश्चात्प्रयोगो यथा स्यात् ईक्षांचक्रे चक्रे ईक्षामिति मा भूत् अव्यवहितनिवृत्त्यर्थं च ईक्षां देवदत्तश्चक्रे
कथं अव्यवहितनिवृत्तिः आमपेक्षया पश्चाद्भावस्य तत्रैव मुख्यत्वात् तदेवं पूर्वनिवृत्तिः अव्यवहितनिवृत्तिश्च प्रयोजनमिति स्थितं इह तु तान्हराणाम्
दयामेव चकारेति वृत्ते च ब्राह्मणे अव्यवहितप्रयोगश्छान्दसः कथं भट्टिकाव्ये उत्पश्यांप्रचक्रे नगरस्य मार्गान् बिभयांप्रचकार दधाविति कथं वा तेषां तयां
प्रथममासम्भ्रंशयां यो न दुष्टं चकारेति वार्त्तिककारः ऐच्छातायः पठति विपर्यासनिवृत्त्यर्थं चाव्यवहितनिवृत्त्यर्थं चेति २८ ॥ ॥ ॥

का·प२
३०

विदांकुर्वन्तु॥ ॥इहोत्तरत्र चानुप्रयोगानुसारेण आमेते लकारा उन्नेयाः। विदेर्लोटि आम्प्रत्यय इति निपात्यते तत्र लसनुषंगः तथा गुणाभावश्चेत्यत्र एवं लोपे
लुगित्यत्र तथा कृञश्च लोट्परस्यानुप्रयोग इत्यत्र सर्वमेतद् आमन्तादिति निपात्यते। इतिकरणः प्रदर्शनार्थ इति सर्वेषां लोड्वचनानामुपलक्षणार्थमित्यर्थः
किमेवं सति सिद्धं भवतीत्याह न केवलमिति। प्रचुरप्रयोगत्वात्तु सूत्रे बहुवचने पठितं। कश्चित्तु भाष्यवार्त्तिककारानुक्तत्वादुपलक्षणत्वेन छत्रिस इतिकरणस्य
प्रयोजनं ब्रवीतु॥ ॥अभ्युत्सादयां॥ ॥अकारिति कृञो लुङि च्लिपि चेमं त्रैव सेत्याहिना लुक तियो हल्ङ्यादिलोपः अक्रन्निति तत्रैव बहुवचनं छि। क्रि

विदांकुर्वन्त्वित्यन्यतरस्यां॥ ॥विदांकुर्वन्त्वित्येतदन्यतरस्यां निपात्यते· किं पुनरिह निपात्यते· विदेर्लोटि आम्प्रत्ययो गुणाभावो
लोटो लुक्· कृञश्च लोट्परस्यानुप्रयोगः· अत्र भवन्तो विदांकुर्वन्तु विदन्तु· इतिकरणः प्रदर्शनार्थः· न केवलं प्रथमपुरुष
बहुवचने किं तर्हि सर्वाण्येव लोड्वचनान्यनुप्रयुज्यन्ते· विदांकरोतु· विदांकुरुतात्· विदांकुरुतमिति॥ ॥अभ्युत्सादयां
प्रजनयां चिकयां रमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि॥ अभ्युत्सादयामित्येवमादयश्छन्दसि विषये ऽन्यतरस्यां
निपात्यन्ते· सदिजनिरमीणां ण्यन्तानां लुङ्याम्प्रत्ययो निपात्यते· चिनोतेरपि तत्रैवाम्प्रत्ययो द्विर्वचनं कुत्वं च· अकः इति च
लुङि पिपरेकमनुप्रयोगः संबध्यते· पावयांक्रियादिति पवतेः पुनातेर्वा ण्यन्तस्य लिङ्याम् निपात्यते क्रियादिति चा
स्यानुप्रयोगः विदामक्रन्निति विदेर्लुङ्याम् निपात्यते गुणाभावश्च· अक्रन्निति चास्यानुप्रयोगः· अभ्युत्सादयामकः·
अभ्युदसीषददिति भाषायां· प्रजनयामकः· प्राजीजनदिति भाषायां· चिकयामकः· अचैषीदिति भाषायां· रमयामकः·
अरीरमदिति भाषायां· पावयांक्रियात्· पाव्यादिति भाषायां· वि

द्यादिति। तस्येत्याशिषि लिङ्· लिङाशिषीत्यार्द्धधातुकत्वाट्टिकरणाभावः लिङ् ह्ययाल्लिङ् सुद्विर्वचनं चेति। चकारात् कुत्वं च· अभ्युदसीषददिति· सदे
र्ण्यन्तात् लुङि णौ च सुपधाया ह्रस्वः चङीति द्विर्वचनं हलादिः शेषः सन्वल्लघुनीतीत्वं दीर्घो लघोः। भाषायामिति। अन्यतरस्यामित्यनुवर्त्तनेऽप्यछन्दस्यपि
यथादर्शनं भवत्येव भाषायां तेनैतदेव रूपमिति अभ्युदसीषददिति भाषायामित्युक्तं॥ ॥४२॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

दयामक· विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥ ४१ ॥

राम०
३०

॥च्लिलुङि॥ ॥इकारउच्चारणार्थइतिचकारलकारसंयोगस्यकेवलस्योच्चारयितुमशक्यत्वात् नत्वयमनुबंधः प्रयोजनाभावात्। चकारः स्वरार्थइ
तिएतदुत्तरसूत्रेव्याख्यास्यामः अस्यसिजादीनादेशान्वक्ष्यतीतियद्येवंकिमर्थमुपादीयतेयावताअत्रवर्णार्थोविभवलुप्यदेशः कार्यार्थोविधानचार्यं च्लेः क्वचि
च्छ्रूयतेनापिधिवादीनामिवाश्रूयमाणस्यैवकिंचित्कार्यंदृश्यतेतस्मात्सिचमेवोत्सृज्यतस्यापवादाः क्ताद्योविधीयेतरन। नैवंशक्यंएवंहिमंत्रेघसादिसूत्रे
वृद्धनांग्रहणंकर्त्तव्यंस्यात्तत्कथंव्यर्थमङोग्रहणंआकारांतेषुधेटेतभविालर्थंचङोग्रहणंतस्यहिविभाषाधेट्श्व्योरितिचङः स्थास्तिधात्वंतरार्थंसि
चोग्रहणंघस्जितेरपिजनेतिविहितस्यच्लिणोलुकेछं दसिदृश्यतेतत्स्याप्यतामेतानिचीणिचत्वारिवाग्रहणानिभवंतिच्युत्सर्गेपुनः सर्वेषांस्थानिभूत
स्यतस्यैवैकस्यग्रहणानन्तुचक्रियमाणेप्युत्सर्गेणान्येवत्रीणिग्रहणानिभवंतिच्लिलुङि च्लेः सिच्मंत्रेघसादिसूत्रेचपरेतच्लेरिति। एवंतर्हियदेतच्छतिस्था
घुपाभूभ्यः सिचइतिएतच्लेरितिवक्ष्यामितदेवचमंत्रेघसादिसूत्रेप्यनुवर्तिष्यतेतत्लाघवंभवति परिलोपेलुच्यतेकिंल्यवस्थायामेवलुकंकरिष्यतिउताहो

॥च्लिलुङि॥ ॥धातोश्च्लिप्रत्ययोभवतिलुङिपरतः इकारउच्चारणार्थः चकारः स्वरार्थः अस्य
सिजादीनादेशान्वक्ष्यतितत्रैवोदाहरिष्यामः॥ ३० ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

आदेशेषुकृतेष्वस्यानिवद्भावेनयदिच्लवस्थायामेवअगुः अस्थुः सिजभ्यस्तविदिभ्यश्चेतिजुस नप्राप्नोति। माभूत्सिजितोव्मातइत्येवंभविष्यतितत्रापिसिजग्र
हणमनुवर्त्ततेसिजग्रहणंनिवर्त्तिष्यतेयदिनिवर्त्ततेअभूवन्नित्यत्रापिप्राप्नोतिकेनसिजभ्यस्तेतिनेत्याहइदानीमेवसुकृंत्लवस्थायामेवलुगितितदेव
मातइत्यत्रङितइत्येवानुवर्त्ततेनसिचइतिलघ्यपितर्हिप्राप्नोतिअधात् अवान् लङः शाकटायनस्यैवेतिनियमात्कित्स्योभविष्यतिएवमपिमाहिगातांमा
हिष्यातांआदिः सिचोन्यतरस्यामितिस्वरोनप्राप्नोति। अथादेशेषुकृतेषुततोविभाषाधाधेट्स्वत्रापितथैवस्यात् धेटश्चविभाषाधेट्श्व्योरितिचङः पिबि
कल्पितः तत्रयदासिचोलुगलुकौतदाअधात् अधातां अधुः अधासीत् अधासिष्टां अधासिषुरितिसिद्धमिष्टंचङोपिलुगभावपक्षेअदधत् अदधतां अद
धन्नितिसिद्धंलुक्पक्षेतुप्रत्ययलक्षणेनद्विर्वचनेअदधादित्यपिचतुर्थरूपंप्राप्नोति। नचङोलुकिद्विर्वचनंनलुमतांगस्येतिप्रतिषेधात् बहुवचनेतर्हिचङोलु
क्यधानित्यनिष्टंरूपंप्राप्नोतित्रैशब्दमेवचेष्यते अधुः अधासिषुः अदधन्निति ॥

ननु वचक्रोपि लुङ्ग्यात् इति जुस् भविष्यति यथा सिचः नैतदस्ति सिज्ग्रहणं तत्रानुवर्त्तते निवर्त्तिष्यते सिज्ग्रहणं यदि निवर्त्तते आतः स्येतदेवं भवत्यङो लुकि
विधिर्यथा संभवन्नियमार्थं न स्यात् ततश्चाभूवन्निसत्र प्रत्ययलक्षणेन सिचः इति जुस् प्राप्नोति इदानीमेव स्युः कृते तेषां देशे षु लुगिति एवं तर्हि यदि तत्र सिजभ
स्तेति एतन्न भ्यस्तेति विस्तरामि किं कृतं भवति च कुः कापि ज्ञाभ्यस्तेति जुस् सिद्धो भवति आतश्च पि सिज्ग्रहणानुवृत्तेर्नियमाद् भूवन्निसत्र जुस् भ
वश्च सिद्धो भवति कृते षां देशे षु लुगिति सिज्लक्षणः स्वरः सिद्धो भवति। परि ज्ञाभ्यस्तेसु च ते माङ् चङ् क्षुदोषः अधुक्षन् अगोवन् अपीपचन् अत्रापि
जुस् प्राप्नोति तस्मात् सिजभ्यस्तेसेव वक्तव्यं आतश्च पत्रापि सिज्ग्रहणमेवानुवर्त्तनीयं नियमो यथा स्यात् द्विधिर्माभूदिति तत्र श्रतदेव स्थितं बहुवचने अ
धानिति प्राप्नोति यदा चक्षेरथ भ्रङो लुक् क्रियते तदा न केवलं बहुवचने सर्वेष्वेव वचनेषु सिज्लक्षणः स्वराभावः स्वरे वा तु शब्द प्रसंगः तस्मात् जाति
स्याद्यपेसत्र सिचः इत्येव वक्तव्यं ततश्च तदेव स्थितं तान्येव त्रीणि ग्रहणानीति। प्रस्तुता क्रियमाणे लुगुत्सर्गमंत्रेष मादिस्त्रे श्योरेव ग्रहणं कथं धेटो ज
नेश्च वडूविगणेनो विकल्पितत्वान्नित्यं लुक् इत्यत्र ग्रहणानि सिच एव तानि भविष्यन्ति कोत्र विशेषः। अयमस्ति विशेषः सिचो लुकादिः सिचो भ्यतस्मात् सिस
ने न स्वरेणाभवितव्यं बहुविगणेस्तु नेति तस्माद्द्वयोरप्यपक्षयोः ग्रहणानि नार्थश्चोत्सर्गेणात् उच्यते अमति ह्युत्सर्गमंत्रेष्वसेस्तत्रयेभ्यः सिचो लु
क् क्रियते तेषामादिः सिचो भ्यतस्मात् सिसेषस्वरः प्राप्नोति मतित्वस्मिंल्लोपे इति तस्यापि लुग्विधानात् सिजभागात् यथायथं स्वरः सिद्धो भवति
या आकांते सिचो लुकि क्रियमाणे सिजभ्यस्तश्चात इति जुस् प्राप्नोति लेसु लुक्यं तिभवश्च भवति तस्मात् लुगुत्सर्गः कर्त्तव्यः। तथा शलइगुपधादनि
टः क्सः इत्यत्रापि निरइति लोपे विशेषणं यथा स्यात् अमति पुनश्च लुगुत्सर्गे कियेत द्विशेषणं भवति धातोः न विधीयते यस्मात् स्वरस्येति तत्र च लुङादेशा
सार्वधातुकत्वात् संप्रतिपन्नमनिड्त्वम् अभिचारात् विशेषणमिति प्रत्ययांतरागतं तदाश्रयणीयं न विधीयते प्रत्ययांतरस्य यस्मात् स्वरस्येति तत्तो गुहेर्न
स्यात् अघुक्षदिति विधीयते यस्मात् स्वरस्य रहिते सादावित्स्वरत्वादिसत्रेणाविकल्पितः अथापि याक्षिके णोऽभावेनानिडिति अपदिश्येत निसंक्तः प्रा
प्नोति घुत्सर्गे पुनरनिट इति तस्यैव विशेषणं भवति सबकराविट निष्क दाचित् सेट्प्रस्तानिट्त्वदाक्तः परासेटत्वदा सिजिति सिद्धं मिष्क अघुक्षत् अगूहीदिति
तस्मात् लुगुत्सर्गः कर्त्तव्यः क्सः स्यानित्येन विधानं कर्त्तव्यमित्यर्थः॥ ३० ॥ ॥

च्लेः सिच्॥ ॥इकार उच्चारणार्थ इति। न त्वनुबंधः यद्येवमंस्तेत्यत्र सिजंतस्यांगस्यात्मनेपदे ङित्वमपेक्षानिर्दिष्टत्वात् इति न लोपः प्राप्नोति ज्ञापकात्सिद्धं यदयं हन्तः सिजिति हंतेः परस्य सिचः कित्वं शास्तीति ज्ञापयति न सिजंतस्योपधालोपो भवतीति यथा चैतज्ज्ञापकं तथा तत्रैवोक्तमिति तत्रैवावधार्यं चकारः स्वरार्थ इति। अंतोदात्तार्थः ननु सिचो न कृत्वात् कथं चकारः स्वरार्थः इति कृते सांको भवति एवमपि प्रत्ययस्वरेणासिद्धं न सिध्यति नाप्राप्ते स्वरांतरे विधीयमानमागमानुदात्तत्वं प्रसज्य स्वरं बाधेत एवं तर्हि च्लेश्चित्वात्स्थानिवद्भावाच्चित्स्वरो भविष्यतीत्यत आह आगमानुदात्तत्वं हीति। चित्स्वरमपि बाधेतेति। स्थानिवद्भावकृतं ननु च परिभाषा हि लावीदिसूत्रे आगमानुदात्तत्वं स्यात् च्लेश्चित्वकरणमनर्थकं स्यात् एवं मन्यते च्लेश्चकारो मंत्रे घसादिसूत्रे सामान्यग्रहणे चरिता

॥च्लेः सिच्॥ ॥च्लेः सिजादेशो भवति। इकार उच्चारणार्थः चकारः स्वरार्थः अकार्षीत्। अहार्षीत्। आगमानुदात्तत्वं हि प्रसज्येत सिचश्चित्स्वरमपि बाधेतेति स्थान्यादेशे च च्लिश्चकारोनुबध्यते। स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः॥ ॥छ॥ ॥छ॥ ॥

र्थः अन्यथा निरनुबंधकत्वात् स्पेर्ग्रहणं स्यात् न लिटः तत्रत्र आमः इत्यत्र निरनुबंधकस्य च्लेरसंभवाच्च्लेरिति नानुवर्तेत तस्य परत्वाद् अंतरंगत्वाच्चेति वा दिगुरु ते षुपच्च्लुक्किकारयामि तस्य प्रत्ययलक्षणेन तिङ् तत्राह्वयः कार्यां चकारेति तस्य वृनिघातस्तस्माच्च्यानिवातः स्यात्तस्मादाम् इत्यत्र च्लेरित्यनुवर्त्तनीयं तस्य च तत्रानुवृत्तिः सर्वत्र सामान्यग्रहणे समुपपद्यते न तत् च्लेश्चकारस्य चरितार्थत्वात् स्थानिवद्भावात् सिचश्चित्स्वरमपि बाधेतेति संभावने लिङ् संभावयेत बाधनमित्यर्थः अनुबंधांतरेणापि सामान्यग्रहणाच्चकारानुरोधे न चित्स्वर एव भविष्यतीति शक्यते वक्तुमिति भावः। स्पृशमृशेति। स्पृश स्पर्शने मृश आमर्शने कृष विलेखने इत्येतेभ्यः कृते प्राप्ते तृप प्रीणने दृप हर्षविमोचनयोः आभ्यां पुषादित्वादङि प्राप्ते सिज्वापि पक्षे त्वनुज्ञायते। अस्पृक्षदिति। अत्र श्चादिषत्वे षढोः कस्सीति कत्वं॥ ॥

॥अस्राक्षीदिति॥अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति पक्षे अमागमः अकारस्य यण् एवं दृशेः अस्राक्षीत् इति आकारस्य वृद्धिः अमभावपक्षे अकारस्यैव वृद्धिः एवमुत्तरत्रा
पि॥ ॥शल इगुपधादनिटः क्सः॥ ॥शालं तो यो धातुरिगुपधस्तस्मादिति। ननु क्सेर्गुणनिमित्तत्वात् कृत एव क्ते लाघवस्यायामेव गुणः प्राप्नोतीति तत्रेगुपधादिति विशे
षणं न प्रकल्पते नैष दोषः विशेषणसामर्थ्यात् प्रागेव गुणाद्धक्तो भविष्यति। ननु च कृते पि गुणे भूतपूर्वगत्या विहितविशेषणाश्रयणे न वाक्सो भविष्यति कि
करणामिदानीं किमर्थं स्यात् क्तस्याचीति विशेषणार्थं सस्याचीत्युच्यमाने पुनः च दिह निक्सिकषिभ्यः सेवसोवसाः अत्रापि प्राप्नोति गुणादयो
ऽन्त्याल्विधिपरिकाली सर्वत्र कल्पान्न भविष्यति एवमपि वृक्षाणां विद्युत्स्विति में प्रसंगः तत्रान्यस्मिन्नेश्चे संनिधः तत्रात्मनेपदे सार इतिनेत देवं क्सो

॥अस्राक्षीत्· अस्राक्षीत्· अस्रक्षत॥अप्राक्षीत्· अमार्क्षीत्· अमृक्षत· अकार्क्षीत्· अक्राक्षीत्· अकृक्षत·
अतृपत· अत्राप्सीत्· अतार्प्सीत्· अदृपत· अद्राप्सीत्· अदार्प्सीत्॥ ॥शल इगुपधादनिटः क्सः॥ ॥शलन्तो यो
धातुरिगुपधस्तस्मादनिटः च्लेः क्सादेशो भवति· दुह· अधुक्षत· लिह· अलिक्षत· शल इति किं· अभेत्सीत्· अ
छैत्सीत्· इगुपधादिति किं· अधाक्षीत्· अनिट इति किं· अकोषीत्· अमोषीत्॥ ३१ ॥ ॥छ॥ ॥

लेंयोले च्लेरिति प्रकरणे धातुप्रत्ययानां ग्रहणं किं च लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये इत्यत्रापि सस्याचीत्यतः सस्येति निवर्तते तेन दुहादिषु प्रत्ययस्य सस्य सम्भवः सर्वत्र
पि तस्यैव ग्रहणं भविष्यतीत्येवं किल करणसामर्थ्यान्न गुणो न भवतीति स्थितं। च्लेरनिट इति यद्यपि च्लेः सिजादिभिरादेशो भवति तथापि तिक्विदप्यश्रवण
न्न सेट्त्वमनिट्त्वं वा तथापि दुह्ल इति स्थिते वक्तव्यं विषय इति सिचानभावं क्तेऽपि तावन्न भवति यावदस्यानिट्त्वं न ज्ञातं तत्र लकारस्येवेटः प्राप्नोतीति
षेधात्सेट्त्वमनिट्त्वं चानिस्यतइति विशेषणोपपत्तिः अधुक्षदित्यादि दादेर्धातोर्घः एकाचो बशो भष् अलिक्षदिति लिह आस्वादने हो ढः भिदिर् छिदिर्
रणे छिदिर् द्वैधीकरणे कुष निष्कर्षे मुष स्तेये॥ ३१ ॥ ॥

॥ ॥श्लिष आ॥ ॥श्लिषेर्धातोरिति श्लिष आलिंगन इत्यस्मान्नलुश्रिषुश्लिषुप्रुषुप्लुषु दाह इत्यस्मादालिंगनेऽप्यभावात् अनिट इति चाधिकारात्सा
नुबंधकत्वाच्च तत्र नियमार्थमेतदिति। ननु श्लिषिरयं पुषादिः तथा च प्रत्युदाहरणेऽङ् भवति तत तस्य पुषादिपाठात्सामर्थ्याङं बाधित्वा आलिंगने क्सः अ
न्यत्राङिति सिद्धमिष्टं सत्यं सिद्धं परस्मैपदे आत्मनेपदे त्वङभावादालिंगनेऽनालिंगने च पूर्वेण क्सः प्राप्नोति इष्यते च तत्राप्यालिंगने क्सोऽन्यत्र सि
च् तत्र नियमे सत्युपपद्यते स च नियमो नोपपद्यते विधेयभावात्। योगविभागात्सिद्धं श्लिष इत्येको योगः श्लिषश्च क्सो भवति किमर्थमिदं पुषाद्यङो बाध
नार्थं पर्येवं तर्ह्यङं बाधते तथा च्लिणमपि बाधेत समाश्लिक्षत् कन्यां देवदत्त इति पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति तत्रालिंगने अनालिं

॥श्लिष आलिंगने॥ ॥श्लिषेर्धातोरालिंगनक्रियावचनाल्लुङि च्लेः क्सादेशो भवति। आलिंगनमुपगूहनं परिष्वंगः
तत्र नियमार्थमेतत्। आलिक्षत् कन्यां देवदत्तः। आलिंगन इति किं समाश्लिषज्जतु काष्ठं॥ ॥छ॥ ॥

गने चाश्लिषः क्सो भवति इदमिदानीं किमर्थं नियमार्थमालिंगनादन्यत्र योगविभागसामर्थ्याद्यावत्यावती च क्सस्य प्राप्तिः सा सर्वा नियम्यते न त्वन
न्तरस्यैव विधिर्वा भवतीति श्लिष इति या प्राप्तिरङ्बाधनार्थीसैव एवमपि नियमो नोपपद्यते कथं श्लिष इत्येतदङ्बाधनार्थं न चैतदस्ति ताद्यङं बाधितुं
प्रभवति पुषादिपाठसामर्थ्यात्तत तस्मादङ्क्सयोः सर्वत्र विकल्पे प्राप्ते द्वितीयो योग आलिंगने क्स एव निसंधीयतामन्यत्राकृतानिदङ् भूय इत्येव मर्थः
स्यात्किं तर्हि उच्यते नियमो नोपपद्यत इति ननु तत्र भवतापि मुख्यांतरेण नियम एवोक्त एतावांस्तु विशेषः मया प्रत्ययनियम उक्त आलिंगन एव क्स इ
ति त्वया पुनरर्थनियम आलिंगने क्स एवेति सर्वथा नियमान्न मुच्यामहे तत्र लक्ष्यानुरोधाद्विधेयविभक्तिनिर्देशेन प्रधानत्वाद्वा प्रत्ययनियम एव भ
विष्यति॥ ॥छ॥ ॥छ॥ ॥

का०पद०
३३

॥नेटि॥ ॥ पूर्वेणोक्तेति शल इगुपधादित्यनेन। अङ् सिचो भवत इति। परस्मैपदेष्वन्यत्र सिजेव। अदर्शीदिति अ दृशोऽङ्गुणः। अद्राक्षीदिति सृजिदृशोर्झल्य
मकिति अमागमः। सिजि सत्यनन्तरं क्सस्य बाधनार्थं सिजेव कस्मान्न विहितः इरित्वसामर्थ्यादङ् पि भविष्यतीत्यसंतत्रापि इरस्वेति चकारः कर्तव्य इति ला
घवेनास्ति विशेषः॥ ॥णिश्रिद्रुस्रु॥ ॥चकारो विशेषणार्थ इति चङीत्यत्र अङो गृह्यमाने अस्य तिवाकिरव्यातिव्योङ् चिङ्गृदादिव्योङ् अत्रापि प्राप्नोति
यदि पुनरयं ङो विधीयते चकारः इको कर्तरि चे संप्रयोजनमस्य अशिश्रियदित्यादिः अत्र चङि धातुरूपं चङं तेनेतिप्रतिषेधे चङ्। अथ स्यगुणोऽस्याप्तिरिति प्र

॥नेटि॥ ॥पूर्वेणोक्तः प्राप्तः प्रतिषिध्यते। हलोधातोः प्रत्यये नेः क्सादेशो न भवति। अस्मिन्प्रतिषिद्धे इरितो वेत्य
ङ् सिचो भवतः। अदर्शत्। अद्राक्षीत्॥ ॥णिश्रिद्रुस्रुभ्यः कर्तरि चङ्॥ ॥णिजन्तेभ्यः श्रिद्रु धातोः णिञन्तेभ्यो वा
तुभ्यः श्रिद्रुस्रु इत्येतेभ्यश्च परस्य च्लेश्चङादेशो भवति कर्तृवाचिनि लुङि परतः। ङकारो गुणवृद्धिप्रतिषेधार्थः चकार ॥
श्चङीति विशेषणार्थः। अचीकरत्। अजीहरत्। अशिश्रियत्। असुस्रुवत्। कर्तरीति किं। अकारयिषातां क ॥ ८४ ॥
टौ देवदत्तेन। कमेरुपसंख्यानं। आणादय आई धातुके वेति यदा णिङ् नास्ति तदेन दुपसंख्यानं। अचकमत। णि ॥
ङ्पक्षे सिद्ध एव। णिङन्तेभ्यः शब्दो नोपसन्तापाद्यर्थः। अचीकमत। नाकमिष्ट सुखं ता निस्पृयुक्ते वउवारथे॥ अथ पक्षोपाषिणो ईत्ययेऽचीकमत भाषिणः

तिषेधः बङं तस्यतु विपमपेक्षलघूपधगुणः प्राप्नोति न च तस्यापि चङ्मेवङितमये स्यप्रतिषेधः किंकारणं क्ङिती ति निमित्तसप्तमीनेष दोषः अंतरंग
श्चि इङ् वडोऽन्तर्भूतचङपेक्षत्वात् बहिरंगो गुणः बहिर्भूतेतिवये सत्तातां अकारयिषातामिति एवं नाल्कर्मणि लुङ् द्विवचनमातां कमेरुप संख्यानमिति
णिनन्तुकमेर्णिङ् विहितः नच प्रकृत्यंतरं कमिः संभवति णिङं नानुसूत्रेणोव सि इंतत्राह आयादेय आयादय आर्द्धधातुके वेति यदा णिङ् नास्ति
णिङ्पक्षे सन्न्द्राव इति सवत्सूत्रेचङ् परो णिरित्य अयणात्तत्र हि सन्वल्लघुनि चङीति वक्तव्ये परग्रहणं व्यपवीद्यर्थं तेन णिस्पय रोर्घः अस

प०म०
३३

।।विभाषाधेट्।। ।।अङोऽप्यत्रविकल्पइति। जरसामित्यादिना अश्वदिति श्वयतेरः अश्वयीदिति सिंते श्यादिना सिचि वृद्धेः प्रतिषेधाद्गुणः। अधिषातामिति कर्मणि द्विवचनमात्तां स्थाघ्वोरिच्चेति किल्वे।। ।।गुपेः।। ।।यस्मादायप्रत्ययो नास्ति तत्रायं विधिरिति। सूत्रेकलस्योच्चारणाद्गुपगोपने गुपव्याकुलत्वइत्यनयो सुग्रहणं न भवति छंदसि दृष्टानुविधानात् दृशीने तु तयोरपि ग्रहणं। अजूगुपतमिति गुपूरक्षणे तस्य स्यमिपामिति घसकं तु जादीनां दीर्घोभ्यासस्य। अगो पामिति। उदित्वादिड्भावपक्षे झलो झलीति सिचो लोपः। अगोपायिष्टमिति आयप्रत्ययान्तात्सिच्।। ।।नोनयति।। ।।अर्दगतौ याचने चेति। अर्द हिंसायां

।।विभाषाधेट्श्व्योः।। ।।धेट्पाने टुओश्वि गतिवृद्ध्योः एताभ्यामुत्तरस्य च्लेर्विभाषा चङादेशो भवति। धेट् तावत् अद धत्। सिचपक्षे विभाषा घ्राधेट्इति लुक् अधात्। अधासीत्। श्वयतेः खल्वपि। अशिश्वियत्। अङोऽप्यत्र विकल्प इष्यते। अश्वत्। अश्वयीत्। कर्तरीत्येव। अधिषातां गावौ वत्सेन।। ।।गुपेश्छन्दसि।। ।।गुपेः परस्य च्लेश्छन्दसि विषये विभाषा चङादेशो भवति। यत्रापप्रत्ययो नास्ति तत्रायं विधिः इमान्मे मित्रावरुणौ गृहान जूगुपतं। अगौप्तं। अगोपिष्टं। अगोपायिष्टमिति वा भाषायां तु चङं तद्वर्जितानि शिष्टं रूपत्रयं भवति।। ।।नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः।। ।।ऊनय परिहाणे। ध्वन शब्दे। इल प्रेरणे। अर्द गतौ याचने च। एतेभ्यो धातुभ्यो णिजन्तेभ्यः परस्य च्लेश्चङ् प्राप्तश्छन्दसि विषयेन भवति। काममूनयीः। औनिनदिति भाषायां। मा त्वाग्निर्ध्वनयीत्। अदिध्वनदिति भाषायां। काममैलयीः। ऐलिलदिति भाषायां। मैनमर्दयीत्।

मित्यस्यापि ग्रहणायरिष्यं दृश्यते दर्शनमस्तिएम्रइति तत्रोनयतिश्चुरादिः ध्वनिरपि गर्वमानइति प्रागेतस्माद्दंताइत्यधिकारे चुरादिः पठितः घटादौ चापि पठ्यते एलयतिश्चुरादिः अर्दयतिर्हि तुमप्यंतः पूर्ववदिति णिश्रीत्यादिना ऊनयीतिरिति मध्यमपुरुषैकवचनं पूर्ववद्वृद्धौ प्रतिषिद्धायां गुणः नमाङ्योगइत्या डागमप्रतिषेधः मा त्वायतो जरितुः काममूनयीः इदं प्रतिसप्तमस्य मर्षे वचनं त्वायतस्त्वामिच्छतो जरितुः स्तोतुर्मम कामममि- प्रमा ऊनयीः ऊनं मा कार्षीरित्यर्थः प्रायेणानुतिबंतं पठ्यते हुताडागमं चेतदस्तत्र दृष्टं औनिनदिति णिपि चङि अजादेर्द्वितीयस्येति नशब्दस्य द्विर्वचनं प्रायेणानुदाहरणावदिदमपि निर्वर्तते पठ्यते। धनयीदिति तिपनमाङ्योगइत्यडागमप्रतिषेधः।। ।।

आर्ह्दिदिति। अजादेर्द्धितीयस्यन स्याः संयोगादयइतिद्रराब्दस्यद्विर्वचनं॥ ॥अस्यति॥ ॥वृञादेशोवेतिवाशब्दः समुच्चयेएवमुत्तरत्रापिपुषादित्वाद्ङमि
ङइति। परस्मैपदेषु। पर्यास्थतेति। उपसर्गादस्यत्यूह्योर्वावचनमितिमिसात्मनेपदं। अङि अस्यतेस्थुक॰ अवोचदिति। विवउम्। आख्यदिति। आतोलोपइटिच॥
॥लिपिसिचिग्रहितो। कात्रतिमग्र्रहणंमकारस्यरतिमभावः। समाहारद्वंद्वेतुनपुंसकत्वंस्यादितरेतरयोगेबहुवचनं॥ माघातोधातोरित्याकारलोपः।

आर्ह्दिदितिमाषार्थं॥ ॥अस्यतिवक्तिख्यातिभ्योऽङ्॥ ॥असुक्षेपणे॰ वचपरिभाषणे॰ ब्रूञादेशोवा॰ ख्याप्रक
थने॰ चक्षिङादेशोवा॰ एभ्यःपरस्यच्लेरङादेशोभवतिकर्तृवाचिनिलुङि॰ परतः॥ अस्यतेःपुषादिपाठादेवाङिसिद्धेपुन
ग्रहणमात्मनेपदार्थं॰ पर्यास्थत॰ पर्यास्थेतां॰ पर्यास्थन्त॰ वक्ति॰ अवोचत॰ अवोचतां॰ अवोचन्त॰ ख्याति॰ आख्यत॰
आख्यतां॰ आख्यन्त॰ कर्त्तरीतिकिं कर्मणिमाभूत्पर्यासिषातांगावौवत्सेन॥ ॥लिपिसिचिह्वश्च॥ ॥लिपउपदेहे॰ षिचक्षर
णे॰ ह्वेञ्स्पर्धायां॰ एतेभ्यश्चपरस्यच्लेरङादेशोभवति॰ अलिपत॰ असिचत॰ आह्वत॰ पृथग्योगउत्तरार्थः॥ ॥
आत्मनेपदेष्वन्यतरस्यां॥ ॥पूर्वेणप्राप्तेविभाषारभ्यते॰ लिपिसिचिह्वः आत्मनेपदेषुपरतश्च्लेरङादेशोभवतिअ
न्यतरस्यां॰ स्वरितञितइत्यात्मनेपदं॰ अलिपत॰ अलिप्त॰ असिचत॰ असिक्त॰ आह्वत॰ आह्वास्त॥ ३२ ॥ ॥

योगविभागउत्तरार्थइति। अस्यतिवक्तिख्यातिलिपिसिचिह्वइत्येकयोगेत्वस्यादिनामप्युत्तरत्रानुवृत्तिः स्यात्ततश्चतेभ्योप्यात्मनेपदेविकल्पःस्यात्। कृ॰प्र॰४
३५
॥आत्मनेपदेषु॥ ॥अलिप्तअसिक्तेति। झलोझलीतिसलोपः। लिङ्सिचावात्मनेपदेष्विति किल्त्वाद्गुणाभावः॥ ॥३२॥ ॥श्रीः॥ ॥

॥ ॥पुषादि॥ ॥एकेनैवादिशब्देन प्रत्येकसंबंधादेवसिद्धे द्वयोरुपादानं विंसप्रयोजनं। दिवाद्यंतर्गणा इति। पुषपुष्टौ प्रभृतशोषणा इत्येवमादिरागणसमाप्तेः यत्तु मध्ये
ष्णिह प्रीतौ ह्वादित्विति लकारणांतद्वा दिपरिसमाप्त्यर्थं एतज्ज्ञापयति ग्रहणमात्मनेपदार्थं पुषादित्वादि तिवान्तिकाकारवचनाद्धि सापते। न भ्वादिरिति पुषपुष्टौ रि
षुष्लिषु प्रुषु प्लुषु दाहे इत्येवमादिः अस्य यदि ग्रहणं स्यात् सुवाघनंतरं पाठाद्युतादीनां पृथग्ग्रहणं न कुर्यात्। क्र्याद्यंतर्गणो वेति। पुषपुष्टौ मुषस्तेय इत्येवमादिः
तत्र हि चलादय एव पठ्यंते तत्र यदितेतिनिघृष्टिताः स्युर्ल्दित एव तान्न कुर्यात् स्वरितेत्वादेः पठितेनैवासिद्धत्वात् अथ पुषादयो घुतादयश्च ल्दित एव कस्मान्न पठिताः
अहाकासां तेनथा पठितुं आदितामीदितामुदितां च तत्र भावात् तद्यथा पुष्पादिषु तावत् जिष्विदा गात्रप्रक्षरणे मिदि हर्षे शमु उपशमने विधा द्वाविति घुतादिषु

॥पुषादिद्युताद्य्लृदितः परस्मैपदेषु॥ ॥पुषादिभ्यो द्युतादिभ्य ल्दिद्भ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतो ऽङादेशो भ
वति· पुषादिर्दिवाद्यंतर्गणो गृह्यते न भ्वादिः क्र्याद्यंतर्गणः पुषः अपुषत्· द्युतादिः· अद्युतत्। अश्वितत्· ल्दितः गम्लृ· अ
गमत्। शल्लृ· अशकत्· परस्मैपदेष्विति किं· व्यद्योतिष्ट· अलोटिष्ट॥ ॥सर्त्तिशास्त्यर्तिभ्यश्च॥ ॥सृ गतौ· शासु अनु
शिष्टौ· ऋ गतौ· इत्येतेभ्यः परस्य च्लेर् अङादेशो भवति· सर्त्ति·॥ ॥श्रीः॥ ॥श्री४॥ ॥छ॥ ॥४॥ ॥

ष्विष्विदा वर्णात् जिमिदा स्नेहने त्रिष्विदा स्नेहविमोचनयोः स्नं सुधं सुभ्रं सु अवस्रंसने संध्वंस अवस्रंसने क्षमू सामर्थ्ये इति। अघुतदश्वितदिति घुट्ल्लुङि तिप परस्मै
पदं। अलोटिष्टेति लुट लुठ प्रतिघाते॥ ॥सर्त्तिशास्ति॥ ॥शासेरङादित्वाच्छपो लुक् इतरत्र निपातनात्। शासु अनुशिष्टाविति सर्त्तिशास्त्यर्तिभ्य इत्यादि परस्मैपदिभ्यो
साहचर्यादिति ग्रहणं न लाङः शासु इच्छायामिति आत्मनेपदी न इतिर्दीयते अगत्यामिति। अगतिप्रापणयोरिति भौवादिकः आसगताविति जौहोत्यादिकः
द्वयोरप्यत्र निर्देश इति केचित् वयं तु जौहोत्यादिकयोरेवगर्त्तिसर्त्त्योर्ग्रहणामन्यामहे॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

का॰१२॰ ।अस्मरदिति।ऋदृशोङि गुणः। अशिषदिति शासइदङ्हलोः शासिवसिघसीनां चेति षत्वं पृथग्योगकरणमात्मनेपदार्थमिति अन्यथा पुषादिद्युताद्यॢदित्सर्तिशास्त्यर्तिभ्यश्च इत्येकमेव योगं कुर्यात एवं हि पृथग्विभक्तिनिर्देशश्चकारश्च न कर्तव्यो भवति समर्ता इति सममोगमृच्छी त्यात्मनेपदं बहुलं छन्दस्यमाङ्योगेऽपीत्याडभावः

३५ छन्दः सत्वात्स्य प्रयोगस्य समन्वीयत समर्तमेनाः संकल्पाः अस्य समर्तं तथा भद्रिको मे समार्तं नम माभी दाः संकल्पाः यद्युप्रासतइति त्वप्युपागन्तइति कश्चिदाह भाष्यविरुद्धमिदं भाष्यकारेण ह्यसमोगमृच्छी त्यत्र मा समृषातां मा समृषतेति आत्मनेपदे सिजुदाहृत इति अत्राङः शासि साहचर्यादित्रिसस्योरेव ग्रहणमानशायोर्जे

।।असरत। शास्ति॰ अशिषत॰ अर्ति॰ आरत॰ पृथग्योगकरणमात्मनेपदार्थं समरत॰ चकारः परस्मैपदे विसिलनुकर्षणार्थः तथोत्त रत्रोपयोगं यास्यति।। ।।इरितो वा।। ।।इरितो धातोः परस्य च्लेरङादेशो वा भवति॰ भिदिर्॰ अभिदत॰ अभैत्सीत॰ छिदिर्॰ अच्छिदत॰ अच्छैत्सीत॰ परस्मैपदे विसिलेव॰ अभित्त॰ अच्छित्त॰।। ।।जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च।। ।।वेति वर्तते॰ जॄ वयोहानौ॰ स्तंभुः सौत्रो धातुः। म्रुचु म्लुचु गत्यर्थौ॰ ग्रुचु ग्लुचु स्तेयकरणे॰ ग्लुंचु षस्ज गतौ॰ टुओश्वि गतिवृद्ध्योः। एतेभ्यो धातुभ्यः परस्य च्लेर्वा अङादेशो भवति॰ अजरत॰ अजारीत॰ अस्तभत॰ अस्तंभीत॰ अम्रुचत॰ अम्रोचीत॰ अम्लुचत॰ अम्लोचीत। अग्रुचत॰ अग्रोचीत॰ अग्लुचत। अग्लोचीत॰ अग्लुंचीत॰ अश्वत॰ अश्वयीत॰ अशिश्वियत। ग्लुचुग्लुंच्वोरेकतरोपादानेऽपि रूपत्रयं सिध्यत्यर्थभेदात्तु द्वयोरुपादानं कृतं॰ केचित्तु वर्णयंति द्वयोरुपादानसामर्थ्यात् ग्लुंचेरनुनासिकलोपो न भवति अग्लुंचदिति।। ३४ ।।

हो॰ यास्कियोरिह ग्रहणं समोगमृच्छी सत्र तु मौवादिकस्याप्यर्तेरिह ग्रहणं तत्र भौवादिकेनार्तेः सिचउदाहरणमविरुद्धमिति।। ।।इरितः।। ।।अभित्तेति।

स्वरितेत्वादात्मनेपदं।। ।।जॄस्तंभुः।। ।।अस्तभदिति अनिदितामित्युपधालोपः। अम्रुचत एकोपादानेऽपि रूपत्रयं सिध्यतीति। कथं यदि तावद्ग्लुचिरुपादी राम॰

यते तस्मादङ्सिचोरग्लुचत अग्लोचीदित्येतद्द्वयं सिध्यति ग्लुंचेस्तु सिचि तृतीयमग्लुंचीदिति अथ ग्लुंचिरुपादीयते तत स्मादग्लुचत अग्लुंचीदितिरूपद्वयं ३५

सिध्यति ग्लुचेस्तु सिचि तृतीयमग्लोचीदिति किमर्थं तर्हि उभयोरुपादानमित्यत्राह अर्थभेदादिति केचिदित्यादि इदं भाष्यविरुद्धं भाष्यकारो हि अनेकार्थत्वाद्धातूनामर्थभेदेन प्रयोजनमुभयोपादानस्येत्यन्यतरोपादानं प्रत्याख्यातवान्।। ३४ ।।

॥ कृमृदृ ॥ ॥ अमरदिति असपेन परस्मैपदे ॥ ॥ चिण् ते ॥ ॥ सामर्थ्यादिति। धातोरात्मनेपदित्वात् परस्मैपदबहुवचनस्य स्थाने यस्तशब्दस्तस्य स्थानि
वासितिनिहितस्तस्या ग्रहणविषये असंभवः सामर्थ्यं उदपादीति चिणो लुक्। उदपत्सतेति। आत्मनेपदे घनतरलघ्वादेशः इहैवेति निहितस्तु त्रस्तान्यतरस्याग्र
हणात्॥ ॥ दीपजन ॥ ॥ जनी प्रादुर्भावे बुध अवगमने इति। जन जनने बुध बोधने इत्येतयोस्तु परस्मैपदिनोरिह ग्रहणं न भवति द्वाभ्यामिति। आत्मनेपदि
भिः साहचर्यात् तेन परस्मैपदिभ्यां कर्ममतिहारे आत्मनेपदैकवचने पि तशब्दे चिण् न भवति यदिवा परस्मैपदिनोरिह ग्रहणे आत्मनेपदिनोर्नस्यात् सानुबंधक

॥ कृमृदृरुहिभ्यश्छन्दसि ॥ ॥ कृमृदृरुहि इत्येतेभ्यः परस्य च्लेश्छन्दसि विषये अङादेशो भवति। शकलाङ्गुष्ठकोऽकरत्। अथो अमरत्।
अदरदर्थान्। पर्वतानारुहत्। अन्तरिक्षाद्दिवमारुहम्। छन्दसीति किम्। अकार्षीत्। अमृत। अदारीत्। अरुक्षत्॥ ॥ चिण् ते प
दः ॥ ॥ पदगतौ अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति तशब्दे परतः। सामर्थ्यादात्मनेपदैकवचनं गृह्यते। उदपादि सस्यम्। स
मपादि भैक्षम्। तइति किम्। उदपत्सातां। उदपत्सत॥ ॥ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्॥ ॥ तइति वर्त्तते। दीपी दीप्तौ।
जनी प्रादुर्भावे। बुध अवगमने। पूरी आप्यायने। तायृ सन्तानपालनयोः। ओप्यायी वृद्धौ। एतेभ्यः परस्य च्लेस्तशब्दे परतोऽन्यत
रस्यां चिणादेशो भवति। अदीपि। अदीपिष्ट। अजनि। अजनिष्ट। अबोधि। अबुद्ध। अपूरि। अपूरिष्ट। अतायि। अतायिष्ट। अ
प्यायि। अप्यायिष्ट॥ ॥ अचः कर्मकर्त्तरि ॥ ॥ अजन्ताद्धातोः परस्य च्लेः कर्मकर्त्तरि तशब्दे परतोऽन्यतरस्यां चिणादेशो भवति।
प्राप्तविभाषेयं। अकारि कटः स्वयमेव। अकृत कटः स्वयमेव। अलावि केदारः स्वयमेव। अलविष्ट केदा
रः स्वयमेव। अच इति किम्। अभेदि काष्ठं स्वयमेव। कर्मकर्त्तरीति किम्। अकारि कटो देवदत्तेन॥ ॥ ॥ छ ॥ ॥

त्वात्कर्त्तरि चायं विकल्पः भावकर्मणोस्तु चिण् भावकर्मणोरिति नित्यमेव चिण् भवति परत्वादिह कर्त्तरि त्यनुवृत्तेर्वा॥ ॥ अचः कर्म॥ ॥ कर्मकर्त्तरीति।
यत्कर्म भूत्वा कर्त्ता भवति तत्रेत्यर्थः प्राप्तविभाषेयमिति। कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदेशेन नित्यं चिणः प्राप्तेः अकारि कटो देवदत्तेनेति। अत्र शुद्धे कर्मणि चिण् भावक
र्मणोरिति नित्यमेव चिण् भवति। ननु चेह कर्त्तरीत्यनुवर्त्तिष्यते यद्येवं शुद्धे कर्त्तरि स्यात् कर्मणि तिवाक्यभेदेन कर्त्ता विशेषयिष्यते कर्मणि कर्त्तरीति नेत
देवं शक्यते लब्धुं कर्मणो युज्यमानेकर्त्तुर्निवृत्तिरेव स्यात् तच्च कारोपि क्रियमाणे कर्मणि चिण् भवति कर्त्तरि च भवतीत्यधिकरणयोरेव समुच्चयः स्यात् न सामानाधि

॥ ७ ॥

दुहश्च॥ ॥अप्राप्तविभाषेयं न दुहस्नुनमां यक्चिणाविति चिणः प्रतिषेधात् तत्र दुह्यिग्रहणं यक्प्रतिषेधार्थं चिणग्रहणं त्वाद्यर्थं। अदुग्धेति क्तस्याचि
लुग्वा दुह दिहेति क्सस्य लुक्॥ ॥नरुधः॥ ॥रुधिर आवरणे इति अन्वरोरुधकामः स एव तु ग्रहणं न भवति कर्तृस्थभावकत्वेन कर्मकर्तुरभावात्॥ ॥तयोनु
॥कर्मकर्त्तरीति तपस्तपःकर्मकस्यैवेति यत्र कर्मवद्भावो विहितस्तत्र भावकर्मणोरपीति अपिशब्दात् कर्मवत्कर्मणेति यत्र कर्मवद्भावो तिदिष्टस्तत्रापि भवति अत
सत्तापस इति। अस्यार्थं तपस्तपःकर्मकस्यैवेत्यत्र व्याख्यास्यति एवं व्यक्ति अन्ववातप्त पापेनेति। पूर्वं यस्तापं कर्मकृतं तेन पश्चान्तमो भ्याहतः स्यार्थः शुद्ध

॥ ॥दुहश्च॥ ॥दुह प्रपूरणे· अस्मात्परस्य ञ्जेश्चिण्यादेशो भवत्यन्यतरस्यां· अदोहि गौः स्वयमेव· अदुग्ध गौः स्वयमेव·
कर्मकर्त्तरीत्येव· अदोहि गौ गोपालकेन॥ ॥नरुधः॥ ॥रुधिर आवरणे· अस्मात्परस्य ञ्जेः कर्मकर्त्तरि चिण्यादेशो न
भवति· अन्ववारुद्ध गौः स्वयमेव· कर्मकर्त्तरीत्येव· अन्ववारोधि गौ गोपालकेन॥ ॥तयोनुतापे च॥ ॥नेति वर्त्त
ते· तप संतापे· अस्मात्परस्य ञ्जेश्चिण्यादेशो न भवति कर्मकर्त्तर्यनुतापे च· अनुतापः पश्चात्तापः तस्य ग्रहणं कर्म
कर्त्रर्थं· तत्र हि भावकर्मणोरपि प्रतिषेधो भवति· अन्वतप्त तपस्तापसः। अन्ववातप्त पापेन कर्मणा॥ ॥चिण्भावकर्म
णोः॥ ॥धातोः परस्य ञ्जेश्चिण्यादेशो भवति भावे कर्मणि च तशब्दे परतः भावे तावत्। अशायि भवता· कर्मणि अकारि कटो देवदत्तेन· अहारि भारो यज्ञदत्तेन· चिण्ग्रहणं विस्पष्टार्थं॥ ॥३५॥ ॥छ॥ ॥ ॥

कर्मणि लकारः पापेनेति कर्त्तरि तृतीया कर्माविवक्षायां तु शोकार्थं वा तपो भावे लकारः पापेनेति हेतौ तृतीया यद्वाभ्याहननार्थस्य तपेः कर्मस्थ राम०
भावस्य कर्मकर्त्ताविवक्ष्यते तदा कर्मवत्कर्मणेति सति देशात्तमनेपदं तदापि हेतौ तृतीया॥ ॥चिण् भाव॥ ॥चिण्ग्रहणं विस्पष्टार्थमिति। चिण ३६
ते परस्मैपदस्य तस्य तेश ञ्चवदनुवृत्तेः यद्यनुदीपजनेत्यादावमतरस्यां ग्रहणात् न रुधश्चेति प्रतिषेधविधावेवनिवृत्तं अन्यथा प्रतिषेधविधानमनर्थकं स्यात्
न च प्रतिषेधस्यानुवृत्तिलेशं का शङ्का पिपूर्वको हि प्रतिषेधः न च भावकर्मणोः केन चिच्चिणः प्राप्तिरस्ति॥ ३५ ॥ ॥छ॥ ॥ ॥

सार्वधातुके॥ ॥इहाशिषि लिङि लिट्चोंतरेणापि विकरणांसर्वेष्वेव धातुषु तिङामेवद्भावे भावकर्मकर्त्तारस्त्रयोऽपि प्रतीयंते भविषीष्ट लूणकृषीष्ट
बटः भूयात् क्रियात् बभूवे च चक्रे बटः बभूव चकारेति अन्तरेण इट्प्रत्यादौ कर्त्राद्विभक्तिङामभावे पि प्रतीयंते त्रयोऽप्यमी अशाप्यकारिणश्चेतिविषयेणासेनिधि
मात्रतः॥ अयोग्यानि भरिण्यादौ धातुमात्रे पि कर्तृधीः। तथाम्मति मइस्यादौ धातुभावे पि कर्तृधीः। एवं स्थिते भूयो विषयाभ्यामन्वयव्यतिरेकाभ्यां शब्दार्था
वसायः व्यभिचारस्य मिषु तु तस्मिंस्तस्मिं विषये तस्य तस्य शब्दस्य समर्थमिति कल्पयितुमुचितं न पुनः क्वचिद्व्यभिचारदर्शनेन सर्वत्रानाश्वासः तादृशो
वान्वयव्यतिरेकौ तिङामेवेति तेषामेव भावकर्मकर्तृषु वाच्याः सूत्रकारोऽथाह लः कर्मणि च भावे चाकर्मकेभ्य इति लादेशास्तु तिङः अतो पि तेषामेव
तेऽर्था इति मन्यमानस्त्वाह भावकर्मवाचिनि सार्वधातुके परत इति उत्तरसूत्रे च कर्तृवाचिनि सार्वधातुके परत इति। शप्यत इति अयस्त्रिङि ति। अथ यद्
क्वौ कर्त्तारौ बहवो वा तदा कथमास्यते भवद्भ्यां आस्यते भवद्भिः द्विवचनबहुवचने कस्मान्न भवतः भावे भेदाभावात् धात्वर्थो हि भावः कर्तृभेदे पि नावश्य

॥ ॥सार्वधातुके यक्॥ ॥भावकर्मवाचिनि सार्वधातुके परतो धातोर्यक्प्रत्ययो भवति। आस्यते भ
वता। शय्यते भवता। कर्मणि। क्रियते कटः। गम्यते ग्रामः॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥

धात्वर्थोऽभिधीयते यतः एकामेव क्रियामभिव्यक्ति बहुत्वप्रसाद्यत्वपि दृष्टमेते पचंतीति कर्मभेदोऽपिता दृशः पश्येकस्यां क्रियाव्यक्तोपचर्यंते तंदुला इति न काल
भेदे शब्दे समास्याः शिष्यत आस्यते। पाकौ पाका इति त्वत्र शब्दे साद्यैकशेषता अतस्य निवृत्त भेदा सर्वेव क्रियाख्याते विधीयते भुते रक्षकाभेदानां प्रविभा
गप्रकल्पनादेषु माख्यातेन भावस्वरूपातो भेदः प्रतीयत इति द्विवचनबहुवचनाभावः यत्र तु स्वरूपात्त्वभेदः तत्र भवत्येव यथा उष्ट्रासिका आस्य
तेहतशायिकाः शय्यंत इति उष्ट्रासिकोष्ट्रासिका इत्येवविलक्षणाः हताभ्यनानाप्रकारोरउत्ताना अवतानादि कीर्णके ह्याभिस्सनवस्थाइति तृल्य
स्मादाख्यातेवाच्यस्यापि भावस्यस्वरूपात भेदाभासात बहुवचनेऽवशाद्प्रयोगमंतरेणापि वेवार्थो वगतिर्भवितीति दयमर्थः पादश्सन्निहितानामनेक
प्रकाराणां शयनानिता दृशानि देवदत्तादिभिः क्रियंत इति केचित्त्वत्र कर्मणि लकारमिच्छंति उष्ट्रासिका हतशायिका लक्षणस्य भावस्य कोलभावाध्य
गंतव्या इति कर्मत्वात्तयथा गोदोहः सुप्यत इति॥

का·पट·
३७

।ककारो गुणवृद्धिप्रतिषेधार्थ इति भृज्ज्यत इत्यत्र वृद्धिप्रतिषेधः। यग्विधान इति। ननु च कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदेशादेव यक् सिद्धः किमुपसंख्यानेन तत्रा
ह चिण्प्रतिषेधार्थमिति। य एक कर्मवत्कर्मणेत्ययं शास्त्रातिदेशस्तदा तेन तेन शास्त्रेण कर्मकार्याणि भवन्ति तत्र कर्मणि यग्भवतीत्यस्यावकाशः भिद्यते कर्म पच्यते ओ
दन इति कर्त्तरि शबित्यस्यावकाशः भुङ्क्ते कर्त्ता भवति पचतीति कर्मकर्त्तर्युभयप्रसंगे परत्वाच्छबेव स्यादित्यर्थः तत्र कर्त्तर्युपसंख्यानं कर्तृत्वं न कर्तृत्वं न दुहस्नु
नमां यक्चिणाविति यक्प्रतिषेधो ज्ञापयति भवति कर्मकर्त्तरि यगिति कार्यातिदेशो तु तस्मिंस्तेनैव सूत्रेण भवन्यगेव परो भवति॥ ॥कर्त्तरि शप्॥ ॥

॥ककारो गुणवृद्धिप्रतिषेधार्थः यग्विधाने कर्मकर्त्तर्युपसंख्यानं चिण्प्रतिषेधार्थं यकः शपो बलीयस्त्वं क्रियते कटः
स्वयमेव· पच्यते ओदनः स्वयमेव·॥ ॥कर्त्तरि शप्॥ ॥कर्त्तवाच्चिनि सार्वधातुके परतो धातोः शप्प्रत्ययो भवति·
पकारः स्वरार्थः शकारः सार्वधातुकार्थः· भवति· पचति·॥ ॥दिवादिभ्यः श्यन्॥ ॥दिवु इत्येवमादिभ्यो धातु
भ्यः श्यन्प्रत्ययो भवति· शपोपवादः· नकारः स्वरार्थः शकारः सार्वधातुकार्थः· दीव्यति· सीव्यति॥ ३६ ॥

पकारिशप्॥ ॥पकारः स्वरार्थ इति। उपलक्षणमेतत् ङित्वप्रतिषेधार्थः। शपश्यनोर्नित्यमिति विशेषणार्थश्च शकारः सार्वधातुकार्थ इति। संज्ञापरे
ऽसार्वधातुकशब्दो न संज्ञिपरः सार्वधातुकसंज्ञार्थ इत्यर्थः कर्तृग्रहणं कर्मवत्कर्मणेत्यत्रोपयोगः इह तु सार्वधातुके शप् भवति श्यन् भवतीति सामा शम·
न्यविधाने विभाव कर्मणोऽप्यपवाद इति कर्त्तर्य्येव शबादयो भविष्यन्ति॥ ॥दिवादिभ्यः॥ ॥म्नाम्नमन्वेषण इति चुरादावदन्ते चात्मनेपदी पठ्यते तत्र ३७
मृगयत इति भवितव्यं दिवादिषु पठ्यतां मृग्यतीति साधुः कं ड्वादिषु वा मृगशब्दो द्रष्टव्यः॥ ॥ ३६॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥ ॥वा भ्राशभ्लाश॥ ॥उभयत्र विभाषेयं अनवस्थानार्थो भ्रमिः क्रमित्रसी चरित्वात्(?) त्रुटिस्तोदादिकः इतरे भौवादिकाः भ्राम्यतीति शमामष्टानां दीर्घः श्य
नीति दीर्घः भौवादिकस्य तु न भवति अशमादित्वात् क्रमः क्रमः परस्मैपदे ष्ठिवुक्लम्वाचमां शितीति क्रमे दिवादिपाठे चिंसे प्रयोजनं मे
स्तु पुषादिकार्यार्थः॥ ॥यसोनुप॥ ॥दैवादिक इति दिवादिपाठो गोप्यसोपसर्गार्थः। अनुपसर्गादिति किमिति· संयसश्चेत्येतत्सम एवोपसर्गान्नान्यस्मादि

॥वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः॥ ॥टुभ्राशृ भ्लाशृ दीप्तौ· भ्रमु अनवस्थाने· भ्रमु चलने· द्वयोरपि ग्रहणं· क्र
मु पादविक्षेपे· क्लमु ग्लानौ· त्रसी उद्वेगे· त्रुटी छेदने· लष कांतौ· एतेभ्यो वा श्यन्प्रत्ययो भवति· भ्राशते· भ्राश्यते· भ्लाशते· भ्ला
श्यते· भ्रमति· भ्राम्यति· भ्रमति· क्रामति· क्राम्यति· क्लामति· क्लाम्यति· त्रसति· त्रस्यति· त्रुटति· त्रुट्यति· लषति· लष्यति·॥ ॥यसो
नुपसर्गात्॥ ॥यसु प्रयत्ने दैवादिकः तस्मान्नित्यं श्यनि प्राप्ते अनुपसर्गाद्विकल्प उच्यते· यसोनुपसर्गाद्वा श्यन्प्रत्ययो भवति· य
स्यति· यसति· अनुपसर्गादिति किं· आयस्यति· प्रयस्यति·॥ ॥संयसः॥ ॥संयसश्च॥ ॥सोपसर्गार्थ आरंभः संपूर्वाद्वा यसे
र्वा श्यन्प्रत्ययो भवति· संयस्यति· संयसति॥ ॥स्वादिभ्यः श्नुः॥ ॥षुञ् अभिषवे· इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति· श
पोपवादः· सुनोति· सिनोति·॥ ॥श्रुवः शृ च॥ ॥श्रुवः श्नुप्रत्ययो भवति तत्संनियोगेन श्रुवः शृ इत्ययमादेशो भवति· शृणोति·
शृणुतः शृण्वंति·॥ ॥अक्षोन्यतरस्यां॥ ॥अक्षू व्याप्तौ भौवादिकः अस्मादन्यतरस्यां श्नुप्रत्ययो भवति· अक्ष्णोति· अक्षति·
॥ ॥तनूकरणे तक्षः॥ ॥तक्षू त्वक्षू तनूकरणे· अस्मात्तनूकरणे वर्त्तमानादन्यतरस्यां श्नुप्रत्ययो भवति· ॥ ॥

तिनियमार्थं भविष्यतीति भावः। आयस्यति प्रयस्यतीति तुल्यजातीयानां हलंतानामेव व्यावृत्तिः स्यादिति मन्यते। ॥संयसश्च॥ ॥इह समस्येवास्तु उपस
इत्यनुवर्त्तिष्यते समवैक्लव्यमित्यस्य ग्रहणाशंकानिवृत्त्यर्थं तु संयस इत्युक्ते एवं तर्हि समो यसः अनुपसर्गाच्चेत्यस्तु॥ ॥स्वादिभ्यः॥ ॥सिनोतीति॥ षिञ् ब
न्धने क्र्यादिपाठात्सिनातीत्यपि भवति। ॥तनूकरणे॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰प॰
३८

।अनेकार्थत्वादितिअत एव विशेषणोपादानादनेकार्थत्वंविज्ञायते प्रदर्शनार्थस्तु गणेधातूनामर्थनिर्देशः संतक्षतिवाग्भिः ॥ श्नम्प्रत्ययो भवतीति
।पयपि प्रत्ययसंज्ञायांप्रकृत्युपपदोपाधिविकारागमान्वर्जयित्वेत्युक्तंतथापि विधीयमानत्वेन प्राधान्यात् श्नवादि कृदर्थवत्वाच्छ्नमः प्रत्ययसंज्ञाभवतीति
भावः तेन श्नकारस्य प्रत्ययत्वादित्वादित्वादित्संज्ञाशयोयवादइतिदेशभेदेनोभयोः सत्यपि भेदेनाप्राप्ते तस्मिन्नास्य मध्यगत्वादेकार्थत्वाच्छ्यवादेत्वं विकर
णाहि सार्वधातुकस्य धातोश्चार्थाभिधाने सहाय तां प्रतिपद्यंते।शकारः श्नान्नलोप इति विशेषणार्थइति अथार्द्धधातुकसंज्ञामाभूदित्येवमर्थः कस्मान्नभवति
ससांहितस्यामनक्तिभनक्तिअतोलोपः स्यात् रुणद्धि भिनत्ति रुणाः स्यात् हिनस्ति तृणेढि इडागमः स्यात् नेड्वशिकृतीत्येतदपि नास्तिअकृत्वा हस्वमितं
तश्नमः पूर्वभागस्यानंगत्वान्नभविष्यतिकथमनंगत्वंयस्मात्प्रत्ययविधिरितिकोर्थः प्रत्ययेविधीयमानेयत्संचम्यानिर्दिष्टंधातोः प्रातिपदिकादितितदादि

॥ ॥अनेकार्थत्वाद्धातूनांविशेषणोपादानं तक्षतिकाष्ठं तक्ष्णोतिकाष्ठं तनूकरणादितिकिं संतक्षतिवाग्भिः ॥ ॥तुदा
दिभ्यः शः ॥ ॥तुदव्यथने इत्येवमादिभ्योधातुभ्यः शप्रत्ययोभवति शपोपवादः ॥शकारः सार्वधातुकसंज्ञार्थः तुदति नु
दति ॥ ॥रुधादिभ्यः श्नम् ॥ ॥रुधिर् आवरणे इत्येवमादिभ्योधातुभ्यः श्नम्प्रत्ययोभवति शपोपवादः मकारोदेशविध्य
र्थः शकारः श्नान्नलोप इति विशेषणार्थः ।रुणद्धि भिनत्ति ॥ ॥३७॥ ॥छ॥ ॥छ॥ ॥७॥ ॥

तस्मिन्प्रत्ययेपरतोंगमितिपञ्चात्रपंचम्यानिर्दिष्टं रुधादिभ्योधातुभ्य इति न तस्मात्प्रत्ययः यस्माच्चप्रत्ययः पूर्वभागात्स न तस्मिन्विधीयमानेयंचम्यानिर्दि
ष्टस्तस्माच्छ्नादितिविशेषणार्थश्च शकारः नान्नलोप इत्युच्यमानेयज्याचयतविच्छप्रच्छरक्षोनङ्प्रज्ञानांयत्नानामत्रापिप्राप्नोतिनामीतिदीर्घत्वे कृते
नादितिमपरे श्नाभावान्नभविष्यतीयरत्वाल्लोप एव प्राप्नोतीयत्नुअतोदीर्घोयञिसुपिचेतिदीर्घत्वंनचैतदत्रप्रवर्तते किं कारणं संनिपातलक्षणोविधिरनि
मित्तं तद्विघातस्येतिरुद्धा पिलहिनिस्यादृश्यायेतिकश्चायक्रमणादितिनिर्दिष्टाङ्गविष्यतिइहापित्तहियत्वानामितितस्मादेवनिर्देशात्सामान्यापेक्षया पम॰
ज्ञापनादीर्घोभविष्यति एवमपि तस्य पूर्वस्माद्विधौ स्थानिवत्वान्नशब्द एवायमितिनलोपः स्यादेवतस्माद्विशेषणार्थः शकारः कर्तमिः अथक्रियमाणे ३८
पिशकारेइहकस्मान्नभवतिविश्नानांप्रश्नानामितिलक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यग्रहणं ॥ ॥३७॥ ॥छ॥ ॥छ॥ ॥ ॥

॥ तनादिकृञ्भ्यः॥ ॥ तनोतीत्यादि। तनु विस्तारे षणु दाने क्षणु हिंसायां अन्यत्तनादिकार्यमिति तनादिकार्याविशेषो नियमस्यार्थः। व्यावर्त्यं दर्शयति तनादिभ्यस्तथासोरिति विभाषा सिचो लुङ् भवतीति न च सुलुग्विकल्पश्च तस्माद्वेति स्वादंग्यादिति लोपो भविष्यति न च विकल्पेन बधः विकल्प प्रति नित्यस्यासिद्धत्वात् तनादिभ्यस्सामर्थ्यादयवा दोषवचनप्रामाण्यादिति न्यायेनासिद्धत्वबाधाद्विकल्पेन नित्यस्य बाधः तनादिपाठस्य विकरणविधौ चरितार्थत्वात् विकल्पोऽपि तत्र अतथात्वादोषचरितार्थः प्रस्तुतक्रिममाणो कृञ्ग्रहणो तनादिषु कृञः पाठस्यानन्यार्थत्वाद्येन नाप्राप्ते न्यायेन विकल्पो नित्यविधिं बाधेत इदं हि कृञ्ग्रहणं विकरणविधौ तनादिषु पाठश्च चरितार्थो माविज्ञायीत्येवमर्थमेवस्यादिति कृञ्ग्रहणप्रत्याख्यानमेवन्याय्यं मन्यामहे॥ ॥धिन्विकृण्व्योः॥ ॥अतो लोपस्य स्थानिवद्भावा

॥ तनादिकृञ्भ्य उः॥ ॥ तनु विस्तारे इत्येवमादिभ्यो धातुभ्यः कृञश्च उप्रत्ययो भवति। शपोपवादः। तनोति। सनोति। क्षणोति। कृञः खल्वपि करोति। तनादिपाठादेव उप्रत्यये सिद्धे करोतेरुपादानं नियमार्थं अन्यत्तनादिकार्यं माभूदिति। तनादिभ्यस्तथासोरिति विभाषा सिचो लुङ् भवति। अकृत। अकृथाः॥ ॥धिन्विकृण्व्योर च॥ ॥इदितौ धिवि कृवि प्रीणनार्थौ। कृवि हिंसाकरणयोः। इत्येतयोरुः प्रत्ययो भवत्यकारश्चान्तादेशः। धिनोति। कृणोति। अतो लोपस्य स्थानिवद्भावाद्गुणो न भवति॥ ॥ क्र्यादिभ्यः श्ना॥ ॥डुक्रीञ् द्रव्यविनिमये इत्येवमादिभ्यो धातुभ्यः श्नाप्रत्ययो भवति। शपोपवादः। शकारः सार्वधातुकसंज्ञार्थः। क्रीणाति। प्रीणाति॥ ॥छ॥ ॥

गुणो न भवतीति। तेन प्रक्रियालाघवाय धिन्विकृण्व्योर्लोप एव नोक्त इति भावः लोपे हि गुणः स्यात् न च न धातुलोप आर्धधातुक इति निषेधः प्रत्ययसंनियोगशिष्टत्वेन लोपस्यानार्धधातुकनिमित्तत्वात्। ननु नुमनुषक्तयोर्ग्रहणं किमर्थं नुमि कृते अन्त्यस्य यथा स्यात् धिन्विकृण्व्योरित्युच्यमाने अन्त्येऽकृते। तत एव परो नुम प्रसज्येत अन्तस्यांतरंगं प्रत्ययसंनियोगेन विधानात् नुमागमस्तु बहिरंगः उप्रत्ययोत्पत्तेः प्रत्यये परतो विधानात्। ननु चान्तरंगस्य नुमत्वाव स्थायामेव भविष्यति न तिबादीनामंतरंगत्वात् तिबादिष्वेव तर्हि भविष्यति नित्यत्वेनात्वेन बाधनात् नुमागमस्तु शब्दान्तरप्राप्तेरनित्यः अंतरंगस्तर्हि नुमागमः तद्धि धातुग्रहणात् तद्धि धातुसंज्ञाप्रवृत्तिकालस्य नुम भविष्यति एवं तर्हि यथा स्यादित्येवमर्थं अन्यत्येति संभवात् कथमसंभवो यदिदानीमेवोक्तं तासेरिति लक्षणमनुनासिकलोपप्रतिषेधार्थमिति। न च त्रापि पक्षे नुम् विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्थमिति वचनादुपदेश एव नुम भविष्यति एवं तर्ह्यंतरंगत्वादेव प्राप्तस्य नुमो यन्तिर्देशः॥ ॥

णास्तुंमुस्तुंमु॥ ॥उदित्वप्रतिज्ञानादीति। एषा खुकारोनुनासिक इत्संज्ञकः प्रतिज्ञायते तस्य प्रयोजनमुदितो वेति क्त्वाप्रत्यये इड्विकल्पः यदि चैतद्विकरणावि
षयाण्येवैते स्युस्तन्नोपपद्यते तस्मादुदित्वेन प्रतिज्ञानात्सर्वार्थत्वं विज्ञायते सर्वप्रत्ययाः प्रयोजनमेषामित्यर्थः सर्वप्रत्ययशेषत्वमित्यर्थः॥ ॥हलश्नः॥ ॥
मुषाणमुषाणेति। लोट्। सिप् तस्य हिः क्र्यादिभ्य एश्ना तस्य शानच चकारः स्वार्थः अत्रसंनियोगपरिभाषया अनित्यत्वादतो हेरिति हेर्लुक् ननु श्ना प्रत्ययस्य
प्रकृतत्वात्तस्यैव शानजादेशो भविष्यति नार्थः श्न इतिस्थानिनिर्देशेनात आह श्नाइति स्थानिसादि श्ना देश इत्येषसंप्रत्ययोगमो यथा स्यादित्येवमर्थ इत्यर्थः

॥ ॥स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च॥ ॥आद्याश्चत्वारो धातवः सौत्राः स्कुञ् आप्रवणे एतेभ्यः श्नाप्रत्ययो भवति श्नु
श्च स्तभ्नाति· स्तभ्नोति· स्तुभ्नाति· स्तुभ्नोति। स्कभ्नाति· स्कभ्नोति। स्कुभ्नाति· स्कुभ्नोति· स्कुनाति· स्कुनोति· उदित्वप्रतिज्ञाना
त्सौत्राणामपि धातूनां सर्वार्थत्वं विज्ञायते नैतद्विकरणविषयत्वमेव॥ ॥हलःश्नः शानज्झौ॥ ॥हलन्तात्परस्य श्नाप्रत्ययस्य
शानजादेशो भवति हौ परतः· मुषाण· पुषाण· हल इति किं· क्रीणीहि· हाविति किं· मुष्णाति· श्न इति स्थानिनिर्देशः श्ना
देशसंप्रत्ययार्थः इतरथा हि प्रत्ययान्तरमेव सर्वविषयं विज्ञायेत॥ ॥३८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

असतितु तास्मिन् किं स्यादित्याह प्रत्ययान्तरमिति। अस्तु प्रत्ययान्तरं क्र्यादिभ्य इत्यनुवृत्तेस्तेभ्य एव हलन्तेभ्यो भविष्यतीति न कश्चिद्दोष इत्यत आह सर्वविषय
मिति अक्र्यादिविषयमपीत्यर्थः आद्यनुवृत्तिर्दुर्ज्ञानेति मन्यते। शानचः। शित्करणं नियमप्रयोजनं स्यान्नि वृद्धावेनैव सिद्धेः। उह्हि निमिदा स्नेहने दिवादिः अत्र
येन क्छेर् इत्यस्मात्तस्य शानजादेशः मिदेर्ग्गुण इति प्रतिषेधविषये विधीयमाने गुणो न भवतीति पुनः शित्करणेन सार्वधातुकमपि। दित्यस्यापि पुनः प्र
वृत्तेरिति के चित्तन्नेति न वयं यथैव मत्यथेन श्ना भवति एवं गुणविषये इकारो भविष्यति ३८

॥चोरयतिधातुग्रहणमनर्थकं यङ्ङि- घोधात्वधिकारादिति धातोरेकाचइत्यत्र ङि- धोयद्धातुग्रहणं तस्येहाधिकारादित्यर्थः परिहरति कृदुपपदसं
ज्ञार्थमिति एतदेवमावष्टे अस्मिन्निति अस्मिन्नेवेत्यवधारणं द्रष्टव्यं तद्दर्शयति पूर्वत्रमाभूतामिति अस्मिन्नस्मिन्नधिकारे धात्वधिकारे यत्सम्प्रत्यानि
कृदित्युपपदमित्येतावानर्थः स्यात् ततश्च पूर्वत्रापि स्यात् च्लि लुङि लुङः तउपपदे च्लि प्रति एवं कृत्संज्ञापि धातोर्विहितस्यातिङो भवतीति सर्वत्रा
पि स्यात् ततश्च करिष्यतीत्यत्र स्यप्रत्ययस्य कृत्संज्ञायां कृदन्तं प्रातिपदिकमिति प्रातिपदिकत्वे सति तिङोऽप्येकत्वेवचनग्रहणादेकवचनं स्या
चोत्सर्गत्वात्तोरुत्पत्तिः प्रसज्येत तस्मादस्मिन्धात्वधिकारे यथा स्यातां पूर्वत्रमाभूतामिति पुनर्धात्वधिकारः क्रियते ननु चाधिकारेणात्स्य चेति

॥धातुग्रहणमनर्थकं यङ्ङि- घोधात्वधिकारात्- कृदुपपदसंज्ञार्थं तु- अस्मिन्धात्ववतीये धिकारे यथा स्या
तां पूर्वत्र माभूतामिति- आर्द्धधातुकसंज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यं- धातोरित्येवं विहितस्य यथा स्यात् ए
हमाभूत् - लूभ्यां लूभिरिति॥ ॥छ॥ ॥

धात्स्येते प्रत्ययसंज्ञा वर्तन्ते पूर्वत्र भविष्यत इत्याशंक्य प्रयोजनं तत्सोऽह आर्द्धधातुकसंज्ञार्थं चेति कथं पुनरार्द्धधातुकसंज्ञायां द्वितीयधातुग्रहणं
स्योपयोग इत्यत आह धातोरित्येवं विहितस्येति लूभ्यां भित्तिरिति अत्रत्यस्यापि प्रातिपदिकत्वे धातुत्वमप्यस्ति एवमिह संज्ञाया धातुसंज्ञायाश्चानिवर्त
नात् ततश्च धातोरेवायं विहित इति आर्द्धधातुकसंज्ञा स्यादेवं यदि तु स्यामिधातोरित्यत्र धातुग्रहणं स्याद् द्वितीयस्यार्द्धधातुकसंज्ञार्थस्य स्थिलत्वम
ति ज्ञायेत अयमप्यधिकारः अको ऽक चेत्युवास रूपाविधिरयाधिकारेणामिरुक्तेन क्तादिभिः मिचः समावेशो न भविष्यति॥ ॥ ॥

॥तत्रोपपदं॥ ॥सप्तमीस्थमित्यस्यार्थमाह सप्तम्या निर्दिष्टमिति सप्तम्या विभक्त्योच्चारितमित्यर्थः सप्तम्यंतेन पदेन प्रतिपादितमिति वा अस्मिन् श्लोके सूत्रे सप्तमीशब्देन सप्तम्यंतमुच्यते सप्तम्यंतेपदे कर्मणीत्यादौ प्रतिपाद्यत्वेनास्थितं कुंभादिकमित्यर्थः प्रथमेतु पक्षे कर्मणीत्यादेर्यः सप्तम्या निर्देशः स एव कुंभमित्यादेरपि प्रयोगात्तस्य सप्तम्या निर्देशः यथा तस्यापत्यमित्यादौ तस्येति सामान्यं विशेषोपलक्षणार्थमिति तद्वदयमेव प्राथम्यं विशेषाणामपि भवतीत्यतद्दृष्टान्तोऽपि कुंभकार इति। अत्रोपपदत्वात्समासः कृदुत्तरपदप्रकृतिस्वरत्वं च भवति। स्थग्रहणमित्यादि सूत्रेषु सप्त

॥तत्रोपपदं सप्तमीस्थं॥ ॥तत्रैतस्मिन्धात्वधिकारे तृतीये यत्सप्तमीनिर्दिष्टं तदुपपदसंज्ञं भवति। वक्ष्यति। कर्मण्यण्। कुंभकारः। नगरकारः। स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थं इतरथा हि सप्तमी श्रूयते यत्र तत्रैव स्यात्। स्तम्बेरमः कर्णेजप इति। यत्र वा सप्तमीश्रुतिरस्ति सप्तम्यां जनेर्ड इति। उपसरजो मंदुरज इति। स्थग्रहणात्तु सर्वत्र भवति॥ ॥४६॥ ॥श्रीकृष्णायानमः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

सप्तम्या विभक्त्या निर्दिष्टमुच्चारणं सप्तम्यंतेन वा पदेन प्रतिपादनं तदेवं संज्ञां गमितिप्रतिपत्त्यर्थमित्यर्थः। ननु सप्तमीशब्देन साहचर्यात्सूत्रादिषु सप्तम्या निर्दिष्टं ग्रहीष्यते नार्थ एतदर्थेन स्थग्रहणेन तत्राह अन्यथा हीति मुख्यार्थसंभवे गौणस्याग्रहणात्सौत्रग्रहणं तत्सप्तम्या एव संज्ञा स्यात् तत्संज्ञा स्यात् संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात् न चासतः संज्ञिनः संज्ञा शक्या विधातुमिति यत्र सप्तमी श्रूयते तत्रैव स्यादित्यर्थः। स्तंबेरम इति स्तंबकर्णयोरपि जयोरित्यत्र तत्पुरुषे कृति बहुलमित्यलुकि यत्र वेति यत्र सूत्रे सप्तमीश्रुतिः सप्तमीशब्दस्य श्रवणमित्यर्थः अशब्दसंज्ञेति स्वरूपग्रहणप्रतिषेधात् अनुपपन्नम् वा दोषं सर्वथेष्टं न सिध्यतीत्यत आह स्थग्रहणात्विति स्थग्रहणे सति सौत्रसप्तम्युपलक्षितसंज्ञे न्यास॰ ४७
ज्ञाविधानात्सर्वत्र सिध्यतीत्यर्थः ४६ ॥

ननु च लब्ध्वर्थसंज्ञाकरणं तत्किमर्थं पूर्वसिंज्ञा क्रियत इत्यत आह गुरुसंज्ञाकरणमिति उ योच्चारितं पदमुपपदमित्येवमर्थमनुगतासंज्ञा अन्वर्थसंज्ञासमर्थप
रिभाषाव्यापारार्थमिति इह पदास्वार्थ इत्य लिंगात्मक त्रिकः प्रातिपदिकार्थस्तदा नान्तरेण विभक्तिं कर्माभिकरणाद्युपपद मुपपद्यत इत्यवश्यमुत्पाद्या
विभक्तिरिति पदविधित्वादेव सिद्धः परिभाषाव्यापारः पंचकपक्षे तु प्रातिपदिकस्यैव कर्माद्यभिधायित्वेन पदविधित्वाभावात्परिभाषाव्यापारो न स्यादि
त्यन्वर्थ्यासंज्ञया बलात्प्रवर्त्तते नैतदस्ति पंचकपक्षेपि विभक्त्युत्पन्नापदत्वे सत्येव प्रत्यय इति प्रतिपादनात्। ननु गतिकारकोपपदानां कृद्भिः सह समासवचनं
प्राक् सुबुत्पत्तेरिति वचनात्कथमुपपदस्य सुबंतत्वं सा विभक्तिर्भवान् उपपदमति ङि सत्र हि सुपेति तृतीयांतमेव निवृत्तं सुपिति प्रथमांतमनुवर्त्तत इत्यदोचा
म कथमपरथा चर्मकाराद्येनलोपादि स्यात्। पश्य कुंभंकरोतीति कटमिति। धातोरिति वर्त्तते कर्मादिशब्दाश्च संबंधशब्दाः तत एवं विज्ञास्याम यस्य धातोर्यत्क
र्मेति एवमपि महान्तं कुंभं करोतीत्यत्र प्राप्नोति न चाभवति महाकुंभकार इति भवति यदेतद्वाक्यं महान्तं कुंभो महाकुंभः महाकुंभं करोतीति यदा त्वेतद्वाक्यं म

॥ गुरुसंज्ञाकरणमन्वर्थसंज्ञार्थं अन्वर्थसंज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारार्थं पश्य कुंभंक
रोति कटमिति प्रत्ययो न भवति उपपदप्रदेशाः उपपदमतिङिति एवमादयः॥ ॥ श्रीकृष्णाय नमः॥

हान्तं कुंभं करोतीति तदा नेष्यते किं च स्यात् यत्र स्यात् कुंभशब्दः एककारशब्देन समासे कृते तदर्थ एकार्थीभावात् महत्त्वेन समासो न स्यात् अन्वर्थत्वादेव
संज्ञायाः समस्तानिर्दिष्टत्वेपि प्रकृतसर्थविशेषणानां तद्विशेषणानां च उ योच्चारितपदत्वाभावाद्दुपपदसंज्ञा न भवति अथ तत्र ग्रहणं किम
र्थं धात्वधिकारः प्रतिनिर्दिश्यते तत्रैतस्मिन्सतीयं धात्वधिकार इति नैतदस्ति प्रयोजनं अधिकारादप्येतत्सिद्धं इदं तर्हि प्रयोजनं सप्तमीस्थस्य प्रत्ययोत्पत्ति
प्रतिनिमित्तत्वं यथा स्यादिति कथं प्रत्यय इति वर्त्तते सप्तमीस्थमुपपदसंज्ञं भवति तत्र चोपपदे सत्येव प्रत्यय इति अथ कर्मणीत्यादिका सप्तमी तत्कुतो प्र
सुपपदे प्रत्ययप्रसंगः न कर्मणीत्यादिका सप्तम्यर्थापेक्षा तथा हि सत्यण् प्रत्ययस्याभिधेयं कर्म स्यात् यथा धः कर्मणीष्ट्रन्निति तथा चोपपदत्व
न प्रतीयेत अतो यथोक्तं संज्ञार्थमनुनासिकत्वं प्रतिज्ञायते तथार्थनिरपेक्षा केवलमुपपदसंज्ञाया लिंगं सप्तमी तथा च धातोरण् भवति कर्मणि चोपपदमि
त्येतावानर्थः स्यात् कर्मणः प्रत्ययोत्पत्तिं प्रतिनिमित्तत्वं न प्रतीयेत तस्मात्तदर्थं तत्र ग्रहणं किमिदानीं हेयं एव सायं ग्रंथः तत्रैतस्मिन्धात्वधिकार इति न वक्तव्यमे
हेय इति सोपस्कारस्तु भवति एतस्मिन्धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति तत्र च सति प्रत्ययः इति॥ ॥७ ७॥ ॥८॥ ॥

का·प८० ॥कृदतिङ्॥ ॥तिङ्वर्जित इति तिङ्क्षे· नञ्कृत्तिङ्क्षे नरहितः तिङोऽन्य इति यावत्। अतिङिति किमिति। इह क्रियमाणेऽप्ययं प्रतिषेधः स्वाश्रयामेव तिङः कृ
५८ त्संज्ञां बाधितुं प्रभवति न तु लकारस्य कृत्त्वात् स्थानिवद्भावेन प्राप्तां अनेन तस्य विधिर्वा भवति प्रतिषेधो वेति वचनादिति मत्वा प्रश्नः तिङ् भाविनो लकारस्यै
व कृत्संज्ञा प्रतिषिध्यते प्रतिषेधसामर्थ्यात् स्थानिवद्भावो न भविष्यतीत्युत्तरं चीयात् स्तूयात् स्तूयादिति ननु च ज्ञापकादेतत्सिद्धं यदयमकृत्सार्वधातुकयो
रित्यत्र कृत्सार्वधातुके प्रतिषेधं शास्ति तज्ज्ञापयति अकृदिति प्रतिषेधो न तिङः प्रभवतीति यदि स्यात् चीनुयात् स्तुनुयादित्यादौ सार्वधातुके पि कृत्प्रतिषे

॥कृदतिङ्॥ ॥अस्मिन्धात्वधिकारे तिङ्वर्जितः प्रत्ययः कृत्संज्ञको भवति· कर्तव्यं· करणीयं· अ
तिङिति किं· चीयात्· स्तूयात्· कृत्प्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः॥ ॥९३॥ ॥

यादेर्वृ दीर्घो न भविष्यति किं कृत्सार्वधातुकपर्युदासेन हलर्तहिं पठति ह्रस्वस्य पिति कृति तुगिति तुक्स्यात् तूदिति तुग्विधौ घालादेरित्यतो धातुग्रह
णमनुवर्त्स्यति एवमपि चिकीर्षति जिहीर्षतीत्यत्र प्राप्नोति शप अवधानान्न भविष्यति एकादेशे कृते नास्ति अवधानं एकादेशः पूर्वविधौ स्थानि राम४
वद्भवतीति अवधानमेव नात्र स्थानिवद्भावः प्राप्नोति परत्वात्तत्प्रयोगेन ग्रह्यते तस्मात् चिकीर्षतीत्यादौ तुक् स्यात् अतस्तिङोऽपि प्रतिषेधः कर्तव्यः किं ५८
च तिङं तस्य कृदंतं प्रातिपदिकमिति प्रातिपदिकसंज्ञायां पचेरन् नलोपः प्राप्नोति पपाच ब्राह्मणी राप्नोति सर्वस्मात् प्रत्ययस्वाद्युत्पत्तिः प्रसज्येत तत्तदेतर
स्मात् कृत्यार्थो इति तिङि तिप्रतिषेधादेव सिद्धं वीयादिसादौ ज्ञापकं नाश्रयितव्यमिति वृत्तिकारो मन्यते स्म॥ ॥९३॥ ॥७ ५१॥ ॥

॥वासरूपः॥ ॥असरूप इति पदच्छेदः अन्यथा लाघवे विशेषाभावात् संदेहार्थमसरूपो स्त्रियां वेति ब्रूयात् अपवादविषयेपि केषांचित्कृतां प्रवृत्तिर्यथा स्या
दित्येवमर्थमिदं वचनं यथोक्तं असरूपस्य वा वचनमुत्सर्ग एव बाधकविषये निवृत्त्यर्थमिति परिभाषा चेयं अस्मिन्धात्वधिकारव्यतिरेकेण। असरूपस्यापवादस्य
विधायकानि शास्त्राणि तच्छेषभूतानि तत्र तत्र वाचने क्रियमाणे गौरवं स्यादिति साधारणेन रूपेण परिभाष्यते तत्र च असरूप इत्यर्थं हि ज्ञात्रस्य विकल्पेन । स
रूपैवासरूपश्चाबाधित्वं किं विलक्षणापेक्षया । असरूपपदं चैतत्सापेक्षं प्रातियोगिनिः प्रतीतोऽभिन्नरूपत्वमसरूपत्वमिष्यते । केनचिद्धि किंचित्सरूपमसरूपं वा भवति
तत्र केनासरूपत्वमपेक्षायां स्वविधानवेलायां विधानवेलायां यः स्वस्मिन्विषये प्राप्तः स एव बुद्धिस्थः प्रतियोगी गम्यते अपवादविधानसमये चोत्सर्गस्ताम
पि विषयमवगाहमुपस्थितो कमान उपारूढो बुद्धो भवतीति तदपेक्षया भिन्नरूपोपवाद एवात्र एव चात्रासरूपो विवक्षित इत्याह असरूपोपवादः प्रत्यय इति एवं स्थितेय

॥वासरूपोस्त्रियां॥ ॥अस्मिन्धात्वधिकारे समानरूपः प्रत्ययोऽपवादो
वा बाधको भवति । स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा ॥ ॥४८॥ ॥

यथमुत्पत्तिविकल्पः स्यादपवादप्रत्ययो वा भवतीति । ततः स्वविषये कामं विकल्पस्तस्य लभ्यते । न तूत्सर्गः प्रवर्त्तेत तत्रातद्विषयो हि सः । उत्सर्गापवादशा
स्त्रयोर्हि प्रमितिमापरे पर्यवसिते पश्चात्पि मत्रे गप्रदेशे स्थितानपवादस्य पक्षे प्रवृत्तिं प्रतिबध्नाति अपवादशास्त्रेणाम्यः स्वीकृतो विषयस्तद्व्यतिरिक्त
विषयाश्रयमास्य शास्त्रस्य प्रमितिरित्यपवादस्याप्रवृत्तावपि नैवोत्सर्गस्य तस्मिन्विषये प्रमितिः प्रवृत्तिर्वेयिय घटेत तद्धितवत् न यथा दक्षस्यापत्यमत इञ् इति किंत्वि
निण्यत्रेत्यण् न भवति अपि तु वाक्यमेव भवति तस्य हेतोः समर्थानां प्रथमाद्वेति तदस्येन पक्षे प्रवृत्तिर्निरुध्यते न पुनरेकवाक्यतया प्राप्तिरेव विकल्पस्य
विते तथेहापीति अपवादाभावपक्षे प्रकृतिरेव केवलाऽभिधानायानुज्ञातास्याद्यथाग्नेश्चिदित्यादौ हिकबादिलोपे तदाह तत्रोत्पत्तिर्वाऽप्रसंगो यथा तद्धि
त इति तामिममुत्पत्तिविकल्पपक्षे दोषं दृष्ट्वा बाधकत्वं विकल्प्यत इत्याह वा बाधको भवतीति । उक्तं च सिद्धं त्वसरूपबाधकस्य वावचनादित्यसरूपो वा बाध
को भवतीति वक्तव्यमित्यर्थः ननु तत्र तत्रोच्यते प्रत्ययस्य क्रियापदं न श्रूयते तत्रास्तिर्भवतिपर इति तत्रासरूपो वेत्युक्ते भवतीत्येवाध्याहार्यो युक्तः न पु
नर्वा बाधक इति॥ ॥छ॥ ॥

नुच्यतेऽत्पत्तिविकल्पस्य प्रयोजनं केवलायाः प्रकृतेः प्रयोगः केवलाच प्रकृतिः स्वीयार्थमात्रमभिधातुमसमर्था किं पुनः कर्त्रादिकमभिधास्यतिप्रकृ
तिप्रत्ययसमुदाये हि प्रयुज्यमाने वयद्यति रेकाभ्यामयं प्रकृत्यर्थः अयं प्रत्ययार्थ इति व्यवस्थाप्यते अनुत्पन्नप्रत्ययात्तु प्रकृतिर्न किंचिदप्यर्थं गमयतिप्र
योगिपिहितस्यादुर्लभः परश्चेति नियमात् तद्धिते त्वनुत्पत्तिपक्षे स्वुत्सर्गप्रवृत्तिव्यतिरेकेणाप्रत्ययांतरमस्तिषष्ठी इह तु न तथेति सामर्थ्याद्धहिरंगामपि
बाधकत्वं विकल्प्यते नन्वपशास्त्रं शास्त्रेणा बाध्यते न पुनः कार्यं कार्येणानिदानोच्छेदे नैव हि निदानिनउच्छेदः शक्यते कर्तुं न हि प्रदीपे अनुच्छिन्ने तत्प्रकाश
उच्छिद्यते तत् किमुच्यते अपवादः प्रत्ययस्येति एवं तु वक्तव्यं अपवादशास्त्रमिति उच्यते सत्यमेवापवादशास्त्रस्यान्वगतमसारूप्यमव्यभिचारीति प्रत्यय
द्वारकं तदाश्रयणीयमित्यपवादप्रत्ययइत्युक्तं एवंभूतस्य प्रत्ययस्य विधायकं शास्त्रमित्यर्थः यद्वा प्रत्ययस्य बाधकत्वविकल्पसामर्थ्याच्छास्त्रमपि पक्षे
बाधकं भविष्यति अथवा वाह नैव वस्तुमात्रं दर्शितं यथा त्वयमर्थ उपपद्यते तथा सूत्रं व्याख्येयं तत्रेदं व्याख्यानं परिभाषेयमित्युक्तं तत्रैकपरिभाषावश्य
मिति पदमुपस्थापयति अस्मिन्धात्वधिकारे यत्रा सरूपोपवादप्रत्ययो विधीयते तत्रैवेत्युपतिष्ठते अधिकारे तु नेति किंकृतमवतिष्ठते इति दयास्तोर्विभाष
स्यादिवत् प्रमितिरेव विकल्परूपिता भवतीति ततश्च तद्देवोत्सर्गस्य प्रवृत्ति सिद्धिरिति। अथासरूपउत्सर्गप्रत्ययोपवादविषये वा भवतीति विज्ञायमाने को
दोषः न खलु कश्चिद्दोषः अपवादविकल्पे प्राप्ते विभाषा उत्सर्गविकल्पे त्वप्राप्तविभाषेति किं तु प्रातियोग्यपेक्षमसरूपपदमपवादमेव गोचरयतीत्युक्तं।
अस्त्रियामित्यत्र पक्षत्रयं संभवति अभिधेयसप्तमी वा स्यात् स्त्रियामभिधेयायां वाऽसरूपो न भवतीति स्त्रियामित्येवं वा विहितस्यासरूपस्य निषेधः स्यात्
स्त्रियामित्युच्चार्य यो विधीयते तेनेति स्त्रीग्रहणं वा स्वर्यते नाधिकारावगतिर्भवतीति स्त्रियां क्तिन्नित्यस्मिन्नधिकारे नेति तत्राद्ये पक्षे व्याशिक्षेपिकाव्यि
क्षेप्रीतिकविषये एवुल्त्वचौ न स्यातां द्वितीये तु कर्मकतिहारे एच स्त्रियांमावक्रोशीव्यावकुष्टिरिति णचो विषये क्तिन्न स्यात् तृतीयोरपि स्त्रियामित्युच्चा
र्यविधानात् इति ममाद्ययोः पक्षयोर्दोषदृष्टात्तृतीयपक्षमाश्रित्याह स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वेति केचिदाहुः अपवादप्रत्ययं वर्जयित्वेति वक्तव्ये
प्रत्ययं वर्जयित्वेति वचनं प्रत्ययमात्रपरिग्रहार्थं तेनोत्सर्गापवादयोर्द्वयोरपि स्त्र्यधिकारनिर्देशात्तयोरयं प्रतिषेधः किं सिद्धं भवति आसना आसास्त्र्यधिका
रविहितेनापि युचापवादेन अहलोऽयितः समावेशः सिद्धो भवति ब्रजस्तु क्तिनादिभिरनभिधानात्समावेश इति। अन्ये तु अपवादो वा बाधको भवतीति
प्रकृतत्वात्सरूपवात्र प्रत्यय इति व्याचक्षते तेन व्रजः क्तिन्नादिभिरसमावेशः आस्येत्यत्र कृत्यल्युटो न कृत्यमितिण्यतीति ४८ ॥ ॥ ॥

ण्वुलतृचौ वुत्सर्गा विति धातुमात्रे विधानात् इगुपधज्ञाप्रीकिरः क इत्यपवाद इति धातुविशेषे विधानात् किं पुनः प्रयोगगतमसारूप्यमाहोस्विदुपदेशगतं किं चातः प्र
योगे लादेशेषु प्रतिषेधः स्योपचः सिपत्र लुङः पि प्राप्नोति प्रयोगे ह्येव सरूपत्वात् लङ्ग्रनक्तलकारः प्रत्ययः लुङ्गणाशीदिति छन्दः प्रकरणेस्यत्र लुङ पि प्राप्नोति ज्ञापका
त्सिद्धं यदयं हशश्वतो लङ् चेति लिङ्विषये लङं शास्ति तज्ज्ञापयति न लादेशेषु वासरूपविधिरिति एवमपि ग्रामणीः श्रामनाय इति क्विलादि विषयेण णाद्योगः णा
द्यो न स्युः न हि क्विवाद्यः प्रयोगे रूपवन्तः लोपविधानात् तेषां तस्मादुपदेशगतमसारूप्यं यद्येवमनुबन्धभिन्नेषु विभाषाप्रसंगः कर्मण्यणपि सुपदेशे भिन्नरूपं प्रयो
गे तु समानं तत्राइगनुबन्धकृतमिति अनुबन्धानामनेकान्तत्वात् कृतमसारूप्यं नाश्रीयते तथा चोदीचां माङ इति अयमपोपि ङकारेत्संज्ञकेन त्वात् इमाहत मे
जं तत्सामिस्तात्लं प्रयुक्तं इति इध्मासो विभाषेति विभाषाग्रहणं चालिंगमसारूप्यस्य अन्यथा अनुबन्धकृतात् सारूप्यादेव द्विषये नोभविष्यतीति किं तेन इहेत्स

ण्वुल तृचावुत्सर्गो इगुपधज्ञाप्रीकिरः क इत्यपवादस्तद्विषये ण्वुल तृचावपि भवतः विक्षेपकः विलेखा विक्षिपः असरूप
इति किं कर्मण्यण् आतोनुपसर्गे क इत्यपवादः स नित्यं बाधकः एव भवति गोदः कंबलदः नानुबन्धकृतमसारूप्यं
अस्त्रियामिति किं स्त्रियां क्तिन्नित्युत्सर्गः अप्रत्ययादित्यपवादः स बाधक एव भवति चिकीर्षा जिहीर्षा ॥ ॥श्री ४॥ ॥

ल्युट् तुमुन् खलर्थेषु वासरूपविधिः प्राप्नोति हसितं छात्रस्य शोभनं हसनं छात्रस्य अत्र क्तल्युड्विषये घञपि प्राप्नोति तुमुन् इच्छति भोक्तुं अत्र इच्छार्थेषु लि
ङ् लोटाविति लोट् प्राप्नोति तुमुना च बाध्यते लिङ् तु लिङ् च तिङ्गनाऽ इवस्येव यद्येवमस्मादेव नियमाल्लोडपि न भविष्यतीति खलर्थे आतो युच ईषत्पानः अ
त्र खलपि प्राप्नोति ननु अधिकारेण भावे स्त्रियामिति प्रतिषेधादस्याप्रवृत्तिः परस्तात् इति विच्छिन्नत्वादेव न भविष्यति स्यादेतदेवं यद्यधिकारः स्यात् परिभा
षा त्वेषेत्युक्तं इष्यते च अधिकारः ततो यमपि वासरूपविधिः आसितव्ये भुक्ते आस्यते भोक्तुमित्यपि यथा स्यात् अन्यथा भोजनार्थत्वादासनस्य पौर्वकालत्वमव
गम्यते तुमर्थाधिकाराच्च भावेत्वात् प्रत्ययस्तत्रैव चलकार इति समानविषयत्वाद्वा बाधकाभावः स्यात् तथा कालो भोक्तुं कालो भोक्तुं कालो भोजनस्य तुमुना
ल्युटो बाधः स्यात् तस्मात्तत्राधिकारः परस्तादपि वासरूपविधिरेषितव्यः अर्हे कृत्यतृचश्चेत्यत्र कृत्यतृज्ग्रहणं ज्ञापकं अधिकारस्य परस्तादनिषेधापरिभाषे
ति तस्मात् क्तल्युट्तुमुन्खलर्थेषु प्रतिषेधो वक्तव्य एव ॥ ॥छ॥ ॥

का॰ पद॰ ॥कृत्याः प्राक्॥ ॥ण्वुलतृचावितिवक्ष्यतीतियोगात्प्राग्ण्वुलग्बहुलमित्यर्पतंव्यधिर्भवति अर्हे कृत्यतृचश्चेतिपृथक्कृतचोग्रहणात्यद्येवंप्राङ्-
५० ण्वुल इतिनवक्तव्यं कृत्या इत्येवास्तु तज्ग्रहणादेव ज्ञापकात्स्वरतोनुवृत्तिर्नभविष्यति योगापेक्षं च वक्तव्यं ण्वुलतृचावितिप्रागयोगात्प्राक् कृत्सञ्ज्ञाधिकार
इतिसत्संहृत्याख्लेतावदेवपठितंसूत्रकारेणाऽवृत्तिकारस्तु भाष्यपूर्वपक्षरूपेण पठितंसूत्रं प्रचिक्षेपयिचित्राङ्गिर्हहीः कृतिर्वृत्तिकारेण कृत्या इति बुद्धवच
नमनुक्रमसमुच्चयार्थंतेनकेलिमरउपसंख्यानमित्यादिनोपसंख्येयं भवति॥ ॥तव्यानीयौ॥ ॥वसेरितिवसनिवासे इत्यस्यग्रहणं नतु वस आच्छादने इत्यस्यतु

॥कृत्याः प्राङ् ण्वुलः॥ ॥ण्वुलतृचावितिवक्ष्यति प्रागेतस्माण्वुलसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः
कृत्यसंज्ञकास्तेवेदितव्याः तेनैवोदाहरिष्यामः कृत्यप्रदेशाः कृत्यैरधिकार्थवचने कृत्यानां कर्त्तरि वेत्येवमा
दयः॥ ॥तव्यानीयौ॥ ॥धातोरिति वर्त्तते॰ धातोस्तव्यत् तव्य अनीयर् इत्येते प्रत्यया भवन्ति॰ तकाररे
फौ स्वरार्थौ॰ कर्त्तव्यं॰ कर्त्तव्यं॰ करणीयं॰ वसेस्तव्यत् कर्त्तरि णिच्च वास्तव्यः॰ केलिमर उपसंख्यानं॰ पचेलिमा मा
षाः। भिदेलिमानि काष्ठानि॰ कर्मकर्त्तरि चायमिष्यते॰॥ ॥४८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ एम॰ ५०

ण्विकरणाच्चनयोरेवकृत्स्नकृत्स्वलर्थाः इतिवचनात्कर्त्तरिनप्राप्नोतीतिवचनात्गिहङ्कारार्थश्चवास्तव्य इतिसिद्धान्ततोवापुनरेषभविष्यतिवास्तुनिभवोवास्त
व्यः दिगादित्वाद्यत् अवास्तव्य इत्यत्रस्वरभेदोनास्ति कृलोके शत्रुजितिप्रदर्शितोदात्तत्वं तदेव यद्यतोऽश्वात्तदर्थ इत्यनेन न भविष्यति। केलिमर इति ककारो गुणवृद्धि
प्रतिषेधार्थः रेफः स्वरार्थः कर्मकर्त्तरि चायमिष्यत इति भाष्येतु पचेलिमा माषाः पक्तव्याः भिदेलिमाः सरला भेत्तव्या इति प्रुद्रे कर्मणि प्रदर्शितं॥ ४९ ॥

॥ गात्रचोपत॥ ॥अजग्रहणं किमिति पूर्वसूत्र एवपद्ग्रहणं कर्तव्यमिति प्रश्नः॥ यावतेत्यादि दूये हि यातवः अजंताहलंताश्चतत्रहलंतस्य तंवस्त्रतिश्र तः पारिशेष्यादंजंतादेवपद्गविष्यतीत्यभिप्रायः अजंतभूतपूर्वादपीति पूर्वंभूतोभूतपूर्वः सुपसुपेति तिसमासः अजंतश्चासौभूतपूर्वश्च अजंतभूत पूर्वः द्विःस्थितस्यमिति दीजोधाजश्चसनद्विर्वचनमसनिमीमाध्वित्यादिनाइस्सः स्यादीधातुरइतिनत्वं अत्रलोपोभ्यासस्येति स्वधित्सइति स्थितेअनुसन्न एगाईधातुकेवुद्विस्थएजातोलोपेद्रूतेसंयोगस्यथं हलंतइतिएवत्स्यादजहणात्तुभूतपूर्वमजंतत्वमाश्रित्यपद्भवतितेनयतोनावइस्यानुदात्तत्वात्यतितुतित्वरितं स्यात चिकीर्ष्यमिस्यादौतुएयघतोर्विशेषाभावः यतोनावइसत्रह्रिस्ववृद्धिवर्तितेयदालाईधातुकेपरतोलोपः तदैतदजग्रहणनकर्तव्यमेवतत्किशसीत्या दितत्किहसनेशसुहिंसायांचतेचदेयावनेयतीययत्नेजनीप्रादुर्भावेयतोनावइतिस्वरार्थंजनेर्यद्विधानंजन्यमितिरूपंतुएयतापिसिद्धंजनिहृह्योश्चेतिवृद्धि ॥

॥अचोयत॥ ॥अजंताद्धातोर्यत्प्रत्ययोभवति तकारपत्तोनावइतिस्वरार्थः गेयं येयं चेयं जेयं अजग्रहणंकिं याव ताहलंतात्मापतंवस्त्रतिअजंतभूतपूर्वादपियथास्यात दित्सयं धित्सयं तकिंत्रामिचतियतित्तनीनामुपसंख्यानं तकि तक्यं शसि शस्यं चति चत्यं यति यत्यं जनि जन्यं हनोवावधश्च वध्यं घात्यं॥ ॥पोरदुपधात॥ ॥पवर्गान्ताद्धातो रकारोपधाद्यत्प्रत्ययोभवति एयतोपवादः शपू शप्यं लभ लभ्यं पोरिति किं पाक्यं वाक्यं अदुपधादिति किं कोप्यं गो प्यं तपाकरणात्कालार्थं आप्यं॥ ॥शकिसहोश्च॥ ॥शक्लृ शकौ षह मर्षणे अनयोर्धात्वोर्यत्प्रत्ययोभवति

प्रतिषेधात्शंसिमपिकेविस्पर्धतितद्ध्वंनराशंसंनराशंसंचहनेवावधश्चेतिहंतेर्वायत्प्रत्ययोभवति तत्संनियोगेनचवधादेशः॥ शक्यं सह्यं॥ ॥ वध्यइतितद्धितोतोवायुनरेषभवि ष्यतिवधमर्हतीतिदंडादिभ्यइतियतयदितद्धितः समासोनप्राप्नोतिअपिवध्योमुसलवध्यइतिकृत्तिपुनःस तिकर्तृकरणेकृताबहुलमितिसमासः सिद्धोभवति॥ वास्यइतिहनस्तोविसमलोरितितत्वंद्वोहंतेर्मिणिन्वेषितिकुत्वं॥ ॥पोयत॥ ॥पासंवाक्यमिति चजोःकुघिएयतोरितिकुत्वंकोप्यंगोप्यमितिकुपकोपनेगुपमाकुलत्वे आप्यमिति आप्लृ आप्तौ एषुत्रिषुपतोनावइत्यायुदात्तत्वंनभवतितित्वरित एवतुभवति॥ ॥शकिसहोः॥ ॥शक्लृशक्तावितिअपलक्षणमेतत्शकविभाषितोमर्षणइत्यस्यापिग्रहणं षहमर्षणइतिननुषहशब्दसार्थइत्यस्येव परस्मैपदिनोनानुबंधकस्यग्रहणंशसंनेषदोषः प्रत्ययविधिविषयत्वादननुबंधकपरिभाषायास्तस्मादुभयोरपिग्रहणं अन्येतुकृत्सल्युटोबहुलमितिवृ

गदमदः॥ ॥अनुपसर्गे यम इति सूत्रे। अनुपसर्ग इति व्यत्ययेन पञ्चम्यर्थे सप्तमीति भावः। अत एवोपसर्गादस्मादनुपसर्गस्तस्मिन्ननुपसर्गे उपपद इत्यर्थो
न भवति एवं हि केवलेभ्यो न स्यात् वदः सुपि क्यप् चेत्यत्र च सुब्ग्रहणमनर्थकं स्यात्। अनुपसर्ग इति हि विहितेऽत्र नञिवयुक्तन्यायेनोपसर्गसदृश
स्य सुबन्तस्य ग्रहणं भविष्यतीति नियमार्थमिति। अनुपसर्गादेवेत्यकारस्यात् सोपसर्गान्माभूदिति कथं तर्हि तेन न तत्र भवेद्धि नियम इति प्रमादः यावो
पविनियम्यमिति पाठः एतेन इतिय लोपवर्यत इति व्याख्यातं चरेराङि चागुराविति। सोपसर्गार्थं वचनं। आचर्यो देश इति गन्तव्य इत्यर्थः उपनेता
गुरुः॥ ॥अवद्यपण्य॥ ॥अवद्यमिति निपात्यत इति वदेर्नञ्युपपदे वदः सुपि क्यप् चेति यत्क्यपोः प्राप्तयोर्यदेव यथा स्यात् गर्ह्य एव च यथा स्या

॥गदमदचरयमश्चानुपसर्गे॥ ॥गद व्यक्तायां वाचि। मदी हर्षे। चर गतिभक्षणयोः। यम उपरमे। एतेभ्यश्चानुपसर्गे
भ्यो यत्प्रत्ययो भवति। गद्यं। मद्यं। चर्यं। यम्यं। अनुपसर्ग इति किं। प्रगाद्यं। प्रमाद्यं। यमेः पूर्वेणैव सिद्धे नियमार्थं वचनं। च
रेराङि चागुरौ। आचर्यो देशः। अगुराविति किं। आचार्य उपनेता॥ ॥अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥
॥अवद्यपण्यवर्या इत्येते शब्दा निपात्यन्ते गर्ह्यपणितव्यानिरोध इत्येतेष्वर्थेषु यथासंख्यं। अवद्यमिति निपात्यते
गर्ह्यं चेत्तद्भवति। अवद्यं पापं। अनुद्यमन्यत्। वदः सुपि क्यप् च। पण्यमिति निपात्यते पणितव्यं चेत्तद्भवति। पण्यः कं
बलः। पण्या गौः। पाण्यमन्यत्। वर्येति स्त्रियां निपात्यते अनिरोधश्चेद्भवति। अनिरोधोऽप्रतिबन्धः। शतेन वर्या। सहस्रे
ण वर्या। वृत्यान्या। स्त्रीलिङ्गनिर्देशः किमर्थः। वार्या ऋत्विजः॥ ५० ॥ ॥

दित्युभयार्थं निपातनं। अवद्यं पण्यमिति। अवद्यं नार्हत्वात्। अनुद्यमन्यदिति गुरुनामादिति। उक्ता गर्ह्यं न भवत्यथ च वदनार्हमपि न भवति। अत्र सवेब
भजि यज्ञादित्वात् संप्रसारणं न लोपो नञः तस्मान्नुडचि पण्यं व्यवहर्तव्यमिति। निपातनस्य रूढ्यर्थत्वात्। पण्यशब्दस्यात्रैव रूढत्वात् उक्तं च धा
तुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनमिति पाण्यमन्यदिति स्तुत्यमित्यर्थः। वर्येति स्त्रियां निपात्यत इति
सूत्रे वृधादीनि अविभक्तिकानि पृथक् पदानि न तु द्वन्द्वः स्यज्जसन्तनिर्देश इति भावः शतेन वर्येति इह ङ्संभक्ताविति सर्वार्थं निपातनं तत्रैवानिरोधस्
भवात् कन्यान्येति हजवर्णोऽण्नि तु ऋत्विगादिनाम प्रकार्या ऋत्विज इति सुशास्त्रि स्यात्र हजो ग्रहणं वड्. सुखी। लिङ्गान्तरत्र एकलोपोऽपि देव

[illegible] ॥ ५० ॥

॥वह्यं करणं॥ ॥वहेर्धातोः करणे यत्प्रत्ययो निपात्यत इति अर्थव्याख्यानमेतत् वह्यमिति निपात्यते करणं चेद्भवतीति वक्तुं युक्तं॥ ॥अर्यः॥ ॥स्वा
मिन्यंतोदात्तत्वं चेति॰ अर्यो वैश्यः स्वामी च तत्र कथं उच्यते वैश्याख्यायामाद्युदात्तत्वं स्वाम्याख्यायामंतोदात्तत्वं तथा चार्यस्य स्वाम्याख्यायामिति फिट्सू
त्रे आख्याग्रहणं कृतं। आर्यो ब्राह्मण इति प्राप्तव्य इत्यर्थः॥ ॥उपसर्या॥ ॥उपपूर्वात्सर्त्तेरिति भौवादिकस्य जौहोत्यादिकस्य च सर्त्तेर्त्रिशास्त्र त्रिप

॥वह्यं करणं॥ ॥वहेर्धातोः करणे यत्प्रत्ययो निपात्यते॰ वहत्यनेनेति वह्यं शकटं॰ करणे इति किं॰ वाह्यमन्यत्॥ ॥अ
र्यः स्वामिवैश्ययोः॥ ॥ऋगतौ अस्मात्पतिप्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्रत्ययो निपात्यते॰ अर्यः स्वामी॰ अ
र्यो वैश्यः॰ यतोनाव इत्युदात्तत्वे प्राप्ते स्वामिन्यंतोदात्तत्वं च वक्तव्यं॰ स्वामिवैश्ययोरिति किं॰ आर्यो ब्राह्मणः॥ ॥
उपसर्या काल्या प्रजने॥ ॥उपसर्येति निपात्यते काल्या चेत्प्रजने भवति॰ उपपूर्वात्सर्त्तेर्यत्प्रत्ययः प्राप्तकाला काल्याः
प्रजनः प्रजननं प्रथमगर्भग्रहणं॰ गर्भग्रहणे प्राप्तकाला उपसर्या गौः॰ उपसर्या वडवा॰ काल्या प्रजन इति किं॰ उप
सार्या शरदि मधुरा॥ ॥अजर्यं संगतं॥ ॥अजर्यमिति निपात्यते संगतं चेद्भवति॰ जीर्यतेर्नञ्पूर्वात्संगते संगम
ने कर्त्तरि यत्प्रत्ययो निपात्यते॰ न जीर्यतीत्यजर्यं॰ अजर्यमार्यसंगतं॰ अजर्यं नो ऽस्तु संगतं॰ संगतमिति किं॰ अज
रिता कंबलः॥ ॥छ॥ ॥

श्चेति निर्देशात्सूत्रादुहिरपि लुका निर्देशः। प्राप्तकाला काल्येति तदस्य प्राप्तमिति वर्त्तमाने कालाद्यदिति यत् प्रजननं प्रजनः भावे घञ् जनिवध्यो
श्चेति वृद्धिप्रतिषेधः उपसर्या गौरिति। गर्भधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः वृषभोपगमनस्य प्राप्तकालेति यावत् उपसार्येति उपसरणी
या प्राप्यैवेत्यर्थः॥ ॥अजर्यं॥ ॥संगमने कर्त्तरीति सूत्रे संगतमिति नपुंसके भावे क्त इति दर्शयति कर्त्तरीति। तयोरेव क्तप्रत्यक्तत्वं लभ्यते इति भा
वे माभूदिति निपातनाश्रयणं तेन भावे संगतकर्तृके विषये भवति अजर्यं संगतं नेति। अजरितेति तृच॥ ॥छ॥ ॥छ॥ ॥

का॰ प॰ ५२

वदः सुपि ॥ ॥ अनुपसर्ग इति वर्त्तत इति सत्य छिन्नेत्यादौ सूत्रे वक्ष्यति उपसर्गग्रहणं ज्ञापकमन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति तच्चावश्यं
तथैवाश्रयणीयं सुप्यजातौ णिनिस्ताच्छील्ये अनुदके किं निसादावनुपसर्गग्रहणं मा भूदिति तत श्च नार्थ इहानुपसर्गग्रहणानुवृत्त्या सुबन्त उपपदे अनुपसर्ग इति य
घपि पूर्वं बहुव्रीहेः पंचम्यर्थे सप्तमीति व्याख्यातं इह तु विरोधाभावान्न सुरूपात्स्वार्थ एव सप्तमीति भावः ब्रह्मोद्यमिति भावे क्यप् पूर्ववत्संप्रसारणं ब्रह्म वेदः
तस्य वदनमित्यर्थः कथं पुनः सकर्मकाद्भावे कृत्यप्रत्ययः प्राप्नुवन्ति भावे चाकर्मकेभ्यः तयोरेव कृत्यक्तखलर्था इति वक्ष्यति न च कर्मविवक्षायां कर्मकर्मकं
त्वं ब्रह्मेति कर्मणः श्रुतत्वात् तस्मादुत्तरसूत्रादिह भावग्रहणमपेक्षणीयमित्याहुः ॥ ॥ भुवो भावे ॥ ॥ यत्तु नानुवर्त्तत इति पूर्वसूत्रे वानुकृष्टत्वा

वदः सुपि क्यप् च ॥ ॥ अनुपसर्ग इति वर्त्तते ॥ वदेर्धातोः सुबन्त उपपदे अनुपसर्गे क्यप् प्रत्ययो भवति चकाराद्यत् च·
ब्रह्मोद्यं· ब्रह्मवद्यं· सत्योद्यं· सत्यवद्यं· सुपीति किं· वाद्यं· अनुपसर्ग इत्येव· प्रवाद्यं ॥ ॥ भुवो भावे ॥ ॥ सुप्यनुपसर्ग
इत्यनुवर्त्तते· भवतेर्धातोः सुबन्त उपपदे ऽनुपसर्गे भावे क्यप् प्रत्ययो भवति· यत्तु नानुवर्त्तते· ब्रह्मभूयं गतः ब्रह्मत्वं ग
तः देवभूयं· देवत्वं भावग्रहणमुत्तरार्थं· सुपीत्येव· भव्यं· अनुपसर्ग इत्येव· प्रभव्यं ॥ ॥ हनस्त च ॥ ॥ सुप्यनु
पसर्ग इति वर्त्तते भाव इति च· हन्तेर्धातोः सुबन्त उपपदे ऽनुपसर्गे भावे क्यप् प्रत्ययो भवति तकारश्चान्तादेशः ब्रह्महत्या·
अश्वहत्या· सुपीत्येव· घातो वर्त्तते· णयत्तु भावे न भवत्यनभिधानात्· अनुपसर्ग इत्येव· प्रघातो वर्त्तते ॥ ५१ ॥

ननु तयोरेव कृत्यक्तखलर्था इति भावकर्मणोः कृत्या विधीयन्ते अनुपसर्ग इति चानुवर्त्तते अनुपसर्गश्च भवतिरकर्मक एवातः सामर्थ्याद्भावे भवि
ष्यति· ननु वशाप्यर्थः सकर्मक एव सत्यं व्यक्ति निर्देशात् प्राथम्यात् स्वसत्तार्थस्यैव ग्रहणं न च कालादिकर्मणि प्रसंगः अनभिधानात् तत्किमर्थं
भावग्रहणमित्यत्राह भावग्रहणमुत्तरार्थमिति हनस्त चेति सकर्मकादपि हन्तेर्भावे यथा स्यात् ब्रह्महत्या वर्त्तत इति कर्मणि मा भूत् यथा घातो वृषल
इति ॥ ॥ हनस्त ॥ ॥ ब्रह्महत्येति स्वभावतः स्त्रीलिंगत्वमस्य क्यबन्तस्य यथान्येषां भावे क्तसाधनानां नपुंसकत्वं छंदसि तु क्यबन्तस्यापि नपुंसकत्वमि
ष्यते सना देवदत्तस्य हत्या यज्ञिपि छंदसि च स्त्रियां विधिः क्तवाः अस्येव ब्रह्महत्यापेतत्तीयं प्रतिग्रहाणोति घातो वर्त्तत इति किं पुनः कारणं घुजप्रसुदाहि
यते न ण्यदित्यत आह णयत्तु भावे न भवतीति । कर्मविवक्षायामकर्मकत्वे सत्यपीति भावः सकर्मकात्तु भावे ण्यत् ततः प्राप्तिरेव नास्ति ॥ ५१ ॥ ॥

राम॰ ५२

॥एतेस्तु॥ ॥एतीति तिपा निर्देशः किमर्थं धातोर्ग्रहणं यथा स्यादिवर्णान्तस्य मा भूदिति अत्र चेण एव ग्रहणं नेङ्कोः तयोरधिपूर्वयोरेव प्रयोगादे
ती ति निर्देशानुपपत्तेः तथा च रक्षार्थं वेदानामध्येयं व्याकरणमिति भाष्ये यदेव प्रयुक्तः। केचित्तु णाव दिक इति वक्तव्यमिति वनादधीयामाते सप्तु
शाह इतेस्तुस इति ह्रस्वस्य तुक्। शिष्य इति। शास इदङ्हलोरितीत्वं शासिवसिघसीनां चेति षत्वं आङः शासु इच्छायामित्यस्यापि ग्रहणमपि शेषा
ततेना शास्यमिति धातुस्वरेण मध्योदात्तं पदं भवति एतेस्तु गतिकारकोपपदात्कृदिति अन्तस्वरितत्वं स्यात्। केचित्तु शासु अनुशिष्टावित्यस्यैव ग्र
हणमिच्छन्ति ओणृ अपकर्षणे इत्यादिरिह स्तुग्रहणस्यावकाशः आवश्यकाधिक्यायां स्तुत्य इति ओणृ अपकर्ष इत्यस्यावकाशः अवश्यलाव्यमिति
अवश्यस्तुत्य इत्यत्रोभयप्रसङ्गे परत्वात् ण्यत्स्यात् पुनः क्यब्ग्रहणात्क्यबेव भवति इह ग्रहणे वृञो ग्रहणमिष्यते न वृङ इति ज्ञापकात् यदयमीड

॥एतिस्तुशास्वृदृजुषः क्यप्॥ ॥सुप्यनुपसर्गे भाव इति निवृत्तं। सामान्येन विधानमेतत्। एति स्तु शास् वृ दृ जुष
इत्येतेभ्यः क्यप्प्रत्ययो भवति। इत्यः। शिष्यः। वृत्यः। आदृत्यः। जुष्यः। क्यबिति वर्तमाने पुनः क्यब्ग्रहणं बाधनार्थं
ओरावश्यके इति ण्यतं बाधित्वा क्यबेव भवति अवश्यस्तुत्यः। वृग्रहणे वृञो ग्रहणमिष्यते न वृङः। वार्या ऋत्विजः।
शंसिदुहिगुहिभ्यो वेति वक्तव्यं। शस्यं। शंस्यं। दुह्यं। दोह्यं। गुह्यं। गोह्यं। आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानं।
आज्यं घृतं। कथमुपेयं। एतेर्ड्यन्नेण॥ ॥छ॥ ॥

वं दृह शंसदुहां ण्यत इति वार्यः शत्रुस्याघुरान्तत्वं शास्ति तत्र चेङिवं द्रिभ्यां साहचर्यादात्मनेपदिनो वृङो ग्रहणं शंसिदुहीत्यादि शंसु स्तुतौ दुह
प्रपूरणे गुह संवरणे शस्यमिति कस्य क्ये उपधालोपः भाष्य एतदुपसंख्यानेन दृष्टं आङ्पूर्वादिति। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु आज्यमि
ति कृत्यल्युटो बहुलमिति कर्मणि अपूर्वविदुपधालोपः अथ कस्मादस्य त्वेवोपधालोपो नोक्तः कुत्वप्रसंगात् नित्वप्रसंगाच्च तस्मात्क्यबेव तए
षः यद्येवमवग्रहः प्राप्नोति आज्यमित्या अज्यमिति अवग्रहस्य तां को दोषः नाहि लक्षणेन पदकारा अनुवर्त्याः किं तु पदकारैर्नामिलक्षणम
नुवर्त्यं पदविच्छेदो हि पौरुषेयः संहितैव तु नित्या तथा वार्थनिश्चयाभावे नावग्रह्णाति यथा हरिवरति किं हरिशब्द इकारान्त उत हरिच्छब्दस्तकारा
न्त इति संदेहात् कथमित्यद्वितीय इकारो येभिभाषेत्वात्वबाधनार्थः ॥ एतु ॥ ति। इणएवेतद्रूपमिति मिमानस

का॰पद॰ ॥कृदुपधात्॥ ॥कृपिचृतीवर्जं पित्वे तिकृशस्तामर्थेच्चृतीहिंसाग्रथनयोः कृपेर्लत्वस्यासिद्धत्वादृकाराल्कारयोः सवर्णसंज्ञाविधानाच्चकृदुप
५३ धत्वं कृतसंशब्दनेरणदेव भवतीति। अनिसराय नाष्ठुरादय इति णिजभावपक्ष इति भावः। इदमेव चृतपरकरणो लिङ्गमनिसरणंयत्नाष्ठुरादय इति
णिजन्तात्कुणिलोपे कृते वा कृ नेचरिति स्वधिस्यामितिवघदेव भवतीत्याणिसर्गपति। पाणिभ्यां हन्पत इत्युपपद समासः पूर्ववत्कुत्वं स्तंसमवसर्ग्य
पत्रापि॥ ॥इविखनः॥ ॥दीर्घोच्चारणं किमर्थंन इच्चरवन इत्येवोच्येत दीर्घस्य ह्रस्वस्य गाज्ञा गुणो नास्ति विशेषः ह्रस्वादेशे षत्वं तु कोरसिद्ध इत्येका
देशस्यासिद्धत्वाद्भूसाश्रयस्तुकस्यादिति चेत नपरान्तपदाघोरेका देशस्तुग्विधावसिद्धः अन्यथात्र सेष्ठत्रमिति ज्ञावा दुगणस्यासिद्धत्वाच्छेचेति द्रु

॥कृदुपधाच्चाक्लृपिचृतेः॥ ॥ककारोपधाच्च धातोः क्यप प्रत्ययो भवति कृपिचृतीवर्जयित्वा· वृत्त· वृत्यं· वृ
धु· वृध्यं· अकृपि वृतेरिति किं· कल्प्यं· चर्त्यं· तपरकरणं किं· कृतसंशब्दने रायदेव भवति· कीर्त्यं· पाणौ सृ ज्येयं
हन्कः॥पाणिसर्गा॥ ज्जुः॥ समवपूर्वाच्च· समवसर्ग्या॥ ॥इविखनः॥ ॥खनेर्धातोः क्यप्रत्ययो भवति ईकार
श्चान्तादेशः· खेयं· दीर्घनिर्देशः प्रश्लेषार्थः तत्र द्वितीयइकारो येविभाषेत्यात्वबाधनार्थः॥ ॥५२॥ ॥

स्ताश्रयो नित्यस्तुकस्यादित्यत आह दीर्घनिर्देश इत्यादि एतेन ह्रस्वदृ पमत्र विधीयते न दीर्घ इति दर्शयति पूर्वं तु यथाश्रुताश्रयणो नोक्तमीकारश्चा
तादेश इति तत्रेति प्रश्लेषे सति येविभाषेत्यात्वबाधनार्थ इति अन्यथा येविभाषेत्यस्यावकाशः खायते खन्यते अस्यात्वकाशः यस्मिन्पक्षे आत्वं ना
स्ति आत्वपक्षे उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्यात एतच्च येविभाषेति विषयसप्तमीपक्ष उच्यते तदा हि यकारादौ बुद्धिस्थ एव भवदात्वमन्तरङ्ग रा॰म॰
अयं त्विकारः क्यप्सहविधानाद्बहिरङ्गः परसप्तमीपक्षे तु विषमेवेत्वमन्तरङ्गं परनिमित्तमनपेक्ष्यविधानात्॥ ॥५२॥ ॥छ॥ ॥ ॥ ५३

भृञः॥ ॥भृञः क्यप् स्यादर्थ इति एतेन क्रियाशब्दत्वं दर्शयन् संज्ञात्वमपाकरोति संपूर्वाद्विभाषेति असंज्ञायामेव सूत्रेणानेन प्रसक्तस्य क्यपोऽयं विकल्पः प्राप्तवि
भाषेत्यर्थः। संज्ञायां मित्वादिप्रतिषेधस्येति शेषः असंज्ञायामिति स एव प्रतिषेधस्य भार्या नाम क्षत्रिया इत्यत्र पुंसि दृष्टत्वाच्चरितार्थत्वान्न तेषु त्र कास्य भार्या शब्दः
सिध्यतीत्यर्थः। पुंसि च रितार्थे हि प्रतिषेधे स्त्रियां कथं भार्या भावृतम् ननु भार्या शब्दोऽपि संज्ञा अभिधीयमानापि हि भार्या भार्येत्युच्यते तत् कुतोऽस्य क्यप् प्रसंगः
न च भृञोऽनेन क्यपा भवितव्यमिति यस्तु संज्ञायामेव विधीयते संज्ञायां समजनिषदेत्यादिना न स्यात्र प्रसंगः न च तस्यापि प्रतिषेधसामर्थ्यात् स्त्रियां पुंसि
प्रतिषेधस्य चरितार्थत्वादिति चोद्यं उत्तरमाह स्त्रियां भावाधिकारोऽस्तीति। ननु संज्ञायां समजनिषदेत्यत्र वृत्तिर्भाव इति न स्मर्यते पूर्वक एवार्थो वि

॥भृञोऽसंज्ञायां॥ ॥भृञो धातोरसंज्ञायां विषये क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः। भर्तव्या इत्यर्थः। असंज्ञा
यामिति किं। भार्या नाम क्षत्रियाः। संपूर्वाद्विभाषा। संभृत्याः। संभार्याः। संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्य
ति। स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति॥ ॥मृजेर्विभाषा॥ ॥मृजेर्धातोर्विभाषा क्यप् प्रत्ययो भ
वति। ऋदुपधत्वात् प्राप्ते विभाषेयं। परिमृज्यः। परिमार्ग्यः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कार इति तथा समजेति तस्यामिति समज्या निषद्यंति तस्यामिति निषद्येत्यादि भवति तत्कथमिदमुच्यते स्त्रियां भावाधिकारोऽस्तीति नेदमपूर्वं चोद्यं
त्रिकार एव हि तत्र वस्तीति कथं तदुक्तं स्त्रियां भावाधिकारोऽस्तीति स्त्रियामिति प्रकरणे संज्ञायां समजेत्यादिनापि विधीयमाने भावस्याधिकारः अभिधे
यभावोऽपापमलक्षणो व्यापाणोऽस्ति शब्दशक्तिस्वाभाव्यात् भाव एव तेन क्यप् भवति न कर्मणि तेन भार्या प्रसिध्यतीति कर्मणीत्यभिप्रायः एकानुबंधक
ग्रहणे न द्व्यनुबंधकस्येति भृञ् भरणे इत्यस्यैव क्वचिद्विकरणेन ग्रहणे न तु भृञ् धारणपोषणयोरित्यस्य अतस्तस्मात् भृञ् भरणे इत्यस्माद्दीर्घान्ताद्भा
र्येति प्रसिध्यतीति परिहारांतरमथात्र संभवति॥ ॥मृजेः॥ ॥परिमार्ग्य इति मृजेर्वृद्धिः सर्वत्र कुत्वं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥राजसूय॥ ॥राज्ञा सोतव्य इति। अभिषिक्तः क्षत्रियो राजा तेन सोतव्यः अभिषवद्वारेण निष्पादयितव्य इत्यर्थः कर्मणि क्यप् दीर्घत्वं च निपात्यते। राज्ञा वा इह सूयत इति। अत्र पक्षे लतात्मकः सोमो राजा राजानं क्रीणन्तीत्यादौ दर्शनात् सुनोतिस्त्वत्राभिषवे अधिकरणे क्यप् निपातनरूपं यथा तेन ज्योतिष्टोमादौ न भवति पूर्वस्मिन्नपि पक्षे श्वमेधादौ वातिप्रसंगः सूसर्तिभ्यामिति न नु सर्तेरुत्वं सुवतेर्वा रुडागम इत्यभिधानादिकल्पोऽत्राभिप्रेत इति वा अर्थाभावाद् द्वन्द्वानुपपत्तेः भाष्यकारप्रयोगात्तु द्वन्द्वः प्रयुक्तं हि भाष्ये सूसर्तिभ्यां च सर्तेरुत्वं सुवतेर्वा रुडागम इति सर्तेरुत्वमिति दीर्घत्वं तु रपरत्वे सति हलि चेत्येव सिद्धं सुवतेर्वा रुडागम इति सुवतेरिति यंच मी सुवतेः प्रसवे अप इत्यर्थः रुडागम इति पाठे षष्ठी सरतीति आकाशे सुवतीति प्रेरणे तुदादिः कर्म

॥राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ ॥राजसूय·सूर्य·मृषोद्य·रुच्य·कुप्य·कृष्टपच्य·अव्यथ्य·इत्येते शब्दाः क्यपि निपात्यन्ते· राज्ञा सोतव्यः राज्ञा वा इह सूयते राजसूयः क्रतुः। सुसर्तिभ्यां क्यप्· सर्तेरुत्वं· सुवतेर्वा रुडागमः सरति सुवति वा सूर्यः· मृषापूर्वस्य वदतेः पक्षे यति प्राप्ते नित्यं क्यब् निपात्यते· मृषोद्यं· रोचतेऽसौ रुच्यः कर्तरि क्यप्· गुपेरादेः कत्वं च संज्ञायां· कुप्यं· गोप्यमन्यत्· कृष्टे पच्यन्ते कृष्टपच्याः कर्मकर्तरि निपातनं· न व्यथते अव्यथ्यः॥ ॥भिद्योद्ध्यौ नदे॥ ॥भिदेरुज्झेश्च क्यब् निपात्यते नदेऽभिधेये· उज्झेर्धत्वं च· भिनत्ति कूलं भिद्यः उज्झत्युदकं उद्ध्यः· नद इति किं· भेत्ता· उज्झिता॥ ॥पुष्यसिद्ध्यौ नक्षत्रे॥ ॥पुषेः सिधेश्चाधिकरणे क्यब् निपात्यते नक्षत्रेऽभिधेये· पुष्यन्त्यस्मिन्नर्था इति पुष्यः सिध्यन्त्यस्मिन्निति सिध्यः· नक्षत्र इति किं· पोषणं सेधनं ॥५३॥ ॥

णि लोकं प्रेरयतीत्यर्थः उदिते हि तस्मिन् क्रियासु लोकस्य प्रवृत्तिः कर्तृप्रत्ययेन कर्तरि निपातनं दर्शयति एवं रुच्याव्यथ्ययोरपि द्रष्टव्यं अत आह च सूर्यरुच्याव्यथ्याः कर्तरीति। कुप्यमिति संज्ञायामेतदिष्यते सुवर्णरजतमतिरिक्तस्य धनस्येयं संज्ञा सर्वत्रातिप्रसंगो निपातनाश्रयेणायं परिहार्यः कर्मकर्तरि निपातनमिति। अन्तोदात्तस्यार्थे तद्द्रष्टव्यं आह हि कृष्टपच्यस्यान्तोदात्तत्वं कर्मकर्तरि चेति शुद्धे तु कर्मणि कृष्टपाक्य इत्येव भवति॥ ॥पुष्यसिद्ध्यौ॥ ॥पुष्यन्त्यस्मिन्नर्था इति आहार्था इति शेषः सिध्यन्त्यस्मिन्निति अत्रार्था इत्यपेक्ष्यते पुष्यसिध्यशब्दौ पर्यायौ स्वरूपपरत्वात्तु सूत्रे द्वन्द्वः॥ ५३॥

॥ ॥विपूया॥ ॥विपूयो मुंज इति रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः॥ विनीयः कल्क इति कल्कशब्दोपमस्ति पिष्ट औषधे यस्मात् शुंठीसैंधवादीनाम्
कल्कः पेयो निःसंसर्वरोग क्षयायेति तैले घृते वा औषधे प्रक्षिप्येय इति ओषं तत्रापि वर्त्तते पापे च प्रसिद्धः तयोनकल्को ध्यय नेन कल्का स्स्यादेरहतु
प्रथमस्य ग्रहणमिति केचिद् विशेषणेति वयं तथा च माघः प्रयुंक्ते अविनीयं संभ्रमविकासिभक्ति भिरिति जित्य इति। बले नाकृष्टः। कृष्टसमीकरण
र्थस्य लंका ष्टं हालि रित्युच्यते॥ ॥पद्दास्वैरि॥ ॥आस्वैरिणीति ईरप्रेरणे स्वयमेवेरितुं शीलमस्या इति ताच्छील्ये णिनिः स्वाद्वीरैरिणोरिति वृद्धिः

॥विपूयविनीयजित्या मुंजकल्कहलिषु॥ ॥विपूय· विनीय· जित्य· इत्येते शब्दा निपात्यंते यथासंख्यं मुंजकल्कह
लिइत्येतेष्वर्थेषु वाच्येषु· विपूर्वात् पवतेर्नयतेश्च तथा जयतेर्यतिप्रासे कर्मणि क्यप्रियात्यते· विपूयो मुंजः॥ विपाव्यम
न्यत· विनीयः कल्कः विनेयमन्यत· जित्यो हलिः जेयमन्यत·॥ ॥प्रत्यपिभ्यां ग्रहेश्छंदसि॥ ॥प्रति अपि इत्येवं पूर्वा
द्ग्रहेः क्यप्रत्ययो भवति छंदसि विषये· मत्तस्य न प्रतिगृह्यं· तस्मान्नापिगृह्यं· छंदसीति किं प्रतिग्राह्यं· अपिग्राह्यं·॥
॥पदास्वैरिबाह्यापक्ष्येषु च॥ ॥पदे स्वैरिणी बाह्या पाक्ष्य इत्येवार्थेषु ग्रहेर्धातोः क्यप्रत्ययो भवति पदे तावत्· प्रग
ह्यं पदं यस्य प्रगृह्यसंज्ञा विहिता· अवगृह्यं पदं यस्यावग्रहः क्रियते· अस्वैरी परतंत्रः गृह्यकाइमे· गृहीनका इत्यर्थः
बाह्याणां· ग्रामगृह्या सेना· नगरगृह्या सेना ग्रामनगराभ्यां बहिर्भूतेत्यर्थः· स्त्रीलिंगनिर्देशात् अन्यत्र न भवति· पक्षे भ
वः पक्ष्यः वासुदेवगृह्याः अर्जुनगृह्याः तत्पक्षाश्रिता इत्यर्थः॥ ॥
बाह्यायामिति बहिर्भवा नहि मार्ष्टिलोपश्चेति यजादिलोपो यस्ये भवः पक्ष्यः दिगादित्वाद् यत् यस्य प्रगृह्यसंज्ञा विहितेति न नु यदावयवस्य द्विवचनादेः प्र
गृह्यसंज्ञा न तु पदस्य समसंयोगिक इत्ययं पदशब्दः प्रयुज्यते अनेनार्थ इति यद्वा प्रातिशाख्ये द्विवचनांतं पदमेव प्रगृह्यशब्दः प्रसिद्धः सन्निकर्षोऽत्र गृह्य
तेऽर्थः ग्रहणं अभावात् स्त्री इत्यादौ क्रियतापि कालेन व्यवधानात् यस्य सम च नामं निकृष्य ते अवगृह्य मिति समासे पूर्वपदं तेन हि पदकाले अवग्रहो
विच्छेदः गृह्यका इमे गृहीतका इत्यर्थ इति उभयत्रानुकंपायां कन् पंजरादिबंधेन परतंत्रीकृताः शुकादयः उच्यंते ग्रामगृह्येति शेषलक्षणायाः षष्ठ्याः

॥ ॥प्रमासः वासुदेवग्रहोस्यत्वनुकर्त्री ऽपि ख्याः ज्ञेयवखासमासः॥ ॥

का॰पद॰ ५५ ॥विभाषा॥ ॥वृष्यमिति वृषु सेचने॥ ॥युग्यं च॥ ॥पतत्यनेनेति पत्रमिति दाम्नीशसेत्यादिना करणे ष्ट्रन् तद्वहति रथयुगप्रासंगमिति प्रा
ग्दीव्यतीये नैव यत्ना सिद्धं स्वरे पि नास्ति भेदः क्यपि धातुस्वरः यत्यपि यतो नावइत्याद्युदात्तत्वं अयुग्यमित्यत्रापि न स्वरे भेदः यद्यतो श्वा तद्येकस्यो
कषायुज्यार्ग्यरियश्चेसु भयत्रोतो दात्तविधानात्॥ ॥अमाव॥ अमाशब्दः सहार्थे वर्त्तत इति। अमा सहस्त्याद्योर्दर्शनात्। तस्मिन्नुपपद इति उप
पदत्वमपि निपातनादेव अमेति वासममण्यत्तु कानिर्देशः तकारो च्चारणात्तत्कृतस्य क्यपस्त्या वन्निपातनेन भवति यदि तु परमप्रकृतस्यपतो
निपातनं स्यात्स्वरे दोषः स्यात्यत्तिस्तिव स्यात् ईयतो नावइत्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वे यिमएव स्वरो व तिष्ठेत ण्यति तु तत्त्वरितत्वम्

॥विभाषा कृवृषोः॥ ॥कृञो वृषश्च विभाषा क्यप्प्रत्ययो भवति· करोतेर्ण्यति प्राप्ते वर्षतेस्तु ऋदुपधत्वान्नित्ये क्यपि
विभाषारभ्यते· कृत्यं· कार्यं· वृष्यं· वर्ष्यं·॥ ॥युग्यं च पत्रे॥ ॥युग्यमिति निपात्यते पत्रं चेत्तद्भवति· पतत्यनेनेति प
त्रं वाहनमुच्यते· युग्यो गौः युग्योऽश्वः युग्यो हस्ती· युजेः क्यप् कुत्वं च निपात्यते· पत्र इति किं· योग्यमन्यत्॥ ॥अ
मावस्यदन्यतरस्यां॥ ॥अमाशब्दः सहार्थे वर्त्तते· तस्मिन्नुपपदे वसेर्धातोः कालेऽधिकरणे ण्यत्प्रत्ययो भवति तत्रा
न्यतरस्यां वृद्ध्यभावो निपात्यते·॥ ५४ ॥ ॥छ॥ ॥

वतितथायतामुक्ते अमावास्येत्यधिकरणे ण्यन्न प्राप्नोति कृत्यल्युटो बहुलमिति भविष्यति एवमप्युपपदसमासो न प्राप्नोति मयूरव्यंसकादित्वाद्भवि
ष्यति एवमपि गतिकारकोपपदात्कृदिति स्वरेण प्राप्नोति तथा अमावास्याया वेति ण्यन्तस्य यत्कार्यं तद्यदन्तस्यामावस्याशब्दस्य न स्यात् भिन्नत्वादिति पदं त
पक्षे सेषं दृष्ट्वाः प्रकृतस्यापि ण्यत एव निपातनमित्याह ण्यत्प्रत्ययो भवतीति किं तर्हि उच्यते ण्यत्प्रत्ययो भवतीति न पुनरयं प्रत्ययो निपात्यत इति सर्वमेवार्थः
निपातनात्क्यप्प्रत्ययो भवतीत्यर्थः अन्यतरस्यां वृद्ध्यभावो निपात्यत इति ण्यत्प्रत्ययो नित्यः वृद्ध्यभावस्तु पाक्षिक इत्यर्थः॥ ॥५४॥ ॥ एम॰ ५५

॥सहवसत इति संनिकृष्टौ वसत इत्यर्थः। यदुक्तं ण्यत्यमसो निपात्यत इति तत्रायं युक्त्याख्याह एकदेशविकृतस्यानन्यत्वादिति ण्यति त्यमावास्येति ख
तः प्राप्तं रूपं ह्रस्वभाववस्तुतस्ये वृद्धिका इति भावः यद्यप्येण्यति ह्रस्वोऽकृतां ण्यो पर्सेद्धः सोपि निपात्यते मए एवं ह्रस्वभाव उक्तः एवंश्लोके प्यवृद्धिता मिति किं
मत्र निपात्यत इत्याशंकायां श्लोकः अमावासोरित्यादि वृद्ध्यभावाभावकृतविशेषाश्रयो द्विवचननिर्देशः निपातयामीति एकस्यैवेति शेषः अमापूर्वयो

सहवसतोऽस्मिन्कालेसूर्याचंद्रमसाविति अमावास्या। अमावस्या। एकदेशविकृतस्यानन्यत्वादमावास्यायां वेत्यत्रामावस्या
शब्दस्यापि ग्रहणं भवति। अमावसोरहं ण्यतोर्निपातयाम्यवृद्धितां। तथैकवृत्तितातयोः स्वरश्च मे प्रसिध्यति॥ ॥छंदसि निष्ट
र्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥
॥निष्टर्क्यादयः शब्दाश्छंदसि विषये निपात्यंते यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धं। निष्टर्क्य इति कृतेश्छेदने
तस्मान्निस्पूर्वात्क्यपि आद्यन्तविपर्ययश्च निसश्च षत्वं निपात्यते। निष्टर्क्यं चिन्वीत पशुकामः। देवशब्दे उपपदे
ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च तुगभावः। देवहूयः। प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप्। प्रणीयः। उन्नीयः। उत्पूर्वाच्छिषेः क्यप्। उ
च्छिष्यं। मृङ् प्राणत्यागे। स्तृञ् आच्छादने। ध्वृ हूर्छने। एतेभ्यो यत्प्रत्ययः। मर्यः। स्तर्या स्त्रियामेव निपात्यते। ध्वर्यः। खनेर्यत्
खन्यः। एतस्मादेव ण्यत्। खान्यः। देवशब्दे उपपदे यजेर्यत्। देवयज्या स्त्रीलिंगे निपातनं। आङ्पूर्वात्पृच्छेः क्यप्। आपृच्छ्यः।
प्रतिपूर्वात्सीव्यतेः क्यप् षत्वं च। प्रतिषीव्यः। ब्रह्मण्युपपदे वदेर्ण्यत्। ब्रह्मवाद्यः। भाव्यः। स्ताव्यः। भवतेः स्तौतेर्ण्यत् आवादेश
श्च भवति। उपपूर्वस्य चिनोतेर्ण्यत्प्रत्यये आयादेशो। उपचाय्यपृडं। पृडे चोत्तरपदे निपातनमेतत्॥ ॥

वयोर्वसोर्ण्यतयोर्मध्ये एकस्य वृद्ध्यभावमहं निपातयामीत्यर्थः सूत्रकारेणैवमापन्नस्येतद्वचनं तथ्यासति किं सिद्धमित्यत्राह तथेति एकाचश्चितव
त्तिरेकदेशविकृतस्यानन्यत्वात् एतयोर्द्वयोरपि सिध्यतीत्यर्थः। स्वरश्च मे प्रसिध्यतीति एवं निपातयतो मम स्वरोपि सिध्यतीति व्याख्यातः स्वरः॥ ॥
छंदसि॥ ॥तुगभावश्चेति पदाज्जुहोतेस्तदेति भावः उपचाय्यपृडमिति मिडसुवेपृडउचरस्येतस्मादि गुणपक्षे लस्यागःकः उपचाय्यं चतस्ड चेति कर्म

॥ ॥ह॥ ॥श्रीः॥

का॰ प॰
५६

॥हिरण्येवेतिवक्तव्यमिति हिरण्यये मिथेय इत्यर्थः अस्यय मिति आद्यंत विपर्यासइत्यर्थः। एयदेकस्मादिति एकस्माद्धातोरायेत्प्रत्ययो निपात्यते तद
त्रेषु देशहृत्यादिषु चतुर्षु चतुर्भ्यो धातुभ्यः ऋ पूर्व निपात्यते उपसर्गभेदाल्लभ्यते भेदः द्वो मा शाविनि द्वाभ्यां धातुभ्यां द्वो भयो निपात्येते इत्यर्थः। एयद्धि
श्चिश्चनु रिति सूत्रं तमेतत्रक्रियम्पाहुतिनिगाचिवतुरेवारायण्डिधीयत इत्यर्थः॥ ॥अहलोः॥ ॥अवर्णान्तादिति। अन्ते स्तु ग्रहणं न भवति
हलामाहचारान्तिपरं कार्यमिति निर्देशात् ईडवदहङसदुहं स्यत इति लिंगाच्च॥ ॥ओरावश्यके॥ ॥अवश्यंभावआवश्यकमिति मनो
ज्ञादित्वाद्वुञ् अव्ययानां भमात्रे टिलोपः किं पुनरवश्यार्थवाचिन्युपपदे प्रत्यय आहोस्विदावश्यके द्योत्ये तत्राद्ये पक्षे उपपदे शक्ति तानाश्रयो
॥हिरण्य इति वक्तव्यं हिरण्या दन्यत्र उपपदेयत्प्र॰ मेव॰ निष्कर्षे यत्र यद्विधान्निसः षत्वं निपातनात्। एयदायादेशाइत्ये
तावुपचाय्ये निपात्यते॰ एयदेकस्माच्चतुर्भ्यः ऋ पूर्वचतुर्भ्यश्चयतो विधिः एयदेकस्मा घञ् द्वाभ्यां द्वो भयो एयद्धि
श्चनुः॥ ॥अहलोर्ण्यत्॥ ॥पंचम्यर्थे षष्ठी अवर्णान्ताद्धातोर्हलन्ताच्चण्यत्प्रत्ययो भवति॰ कार्यं॰ हार्यं॰ वाम्यं॰
पाक्यं॰॥ ॥ओरावश्यके॥ ॥अवश्यंभाव आवश्यकं॰ उवर्णान्ताद्धातोर्ण्यत्प्रत्ययो भवत्यावश्यके द्योत्ये॰ य
लोपवादः॰ लाव्यं॰ पाव्यं॰ आवश्यक इति किं॰ लव्यं॰ आवश्यके द्योत्यइति चेत्स्वरसमासानुपपत्तिः अवश्यला
व्यं॰ अवश्यलाव्यं॰ अवश्यपाव्यमिति॰ नैष दोषः मयूरव्यंसकादित्वात्समासः॰ उत्तरपदप्रकृतिस्वरेण पलः॰ क

नस्यापरलाव्यंपाव्यमितितस्माद्द्वितीयः पक्ष आश्रीयत इत्याह आवश्यके द्योत्य इति। स्वरसमासानुपपत्तिरिति उपपदस्य हेत्वेपपदसमासो लभ्य
ते गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं च षोसपश्चेत्वेतदुभयमपि न सिद्ध्यतीत्यर्थः अवश्यलाव्यमिति लुंपेदवश्यमः कृत्ये इति मलोपः घो
तितार्थस्याप्रिकृवितिप्रयोगो दृश्यते लाघवं प्रसज्यते न तेन सत्यवक्तव्यं लुंपेदवश्यमः कृत्ये इति वचनाद्देवद्योतिते अवश्यमः प्रयोग इति तस्या
वश्यकर्तव्याद्योचरितार्थत्वात् मयूरव्यंसकादित्वादिति। तस्याकृतिगणत्वादिति भावः उत्तरपदप्रकृतिस्वरत्वे चेति मयूरव्यंसकादिनिपातना
देव स्वरोऽपि भविष्यतीत्यपि शाकं वक्तुं॥ ५५ ॥ ॥ एम॰
५६

॥आसुयु॥ ॥युग्रमतीनां द्वंद्वेन आसुनोतेर्द्वंद्वः स्याङः सुनोतेरभिसंबंधस्तदाह आङ्पूर्वात्सुनोतेरिति ॥ सुग्रसर्वेष्वसर्यमित्यत्र अग्रहणं कृतमल्पस्वरो ब
हुलमिति पुरस्तान्निपातं मिश्राणां स्वरसंग्रहणं युक्तं बंधनस्य स्तनुमानुबंधकलादग्रहणं यतोपवादः इति अचोयत योरदुपधादिति यथा योगं प्राप्तस्य ण्य
मिति सूत्रे र्ष्युतुल्यपठितस्यापि पुरादौ व कलं मेन्नित्ये दर्शनमिति विवचना च्छिष्टप्रयोगा च यथायथ सर्थयस्य धीरस्य आदिवृद्ध्यातुलं द्रष्टव्यं ॥ आनाय्यः ॥ ॥
दक्षिणाग्निविशेषेति तेन घटादावप्यप्रसंगो नोद्भावनीय इति भावः निपातनाच्च रूढिरित्युक्तं हि रूढार्थं चान्निपातनमिति कुतः पुनरनित्यत्वमित्यत्राह तस्य चानित्यत्व
मिति नित्यमजागरणादिति मतं तमज्वलनादित्यर्थः ज्वलनमेव हि तस्य जागरणं दक्षिणाग्नावपि विशिष्ट एव दृष्यते न सर्वत्रैवेति दर्शयति यश्चेति योनि

॥आसुयुवपिरपिलपित्रपिचमश्च॥ ॥आङ्पूर्वात्सुनोतेः युवपिरपिलपित्रपिचम इत्येतेभ्यश्च धातुभ्यो ण्यत्प्रत्ययो भवति यतोपवादः आ
साव्यं यान्यं वाप्यं राप्यं लाप्यं अपत्राप्यं आचाम्यं अनुक्तसमुच्चयार्थश्चकारः दभि दाभ्यं ॥ ॥आनाय्योनित्ये॥ ॥आनाय्य
इति निपात्यते अनित्येभिधेये नयतेराङ्पूर्वस्य आयादेशो निपात्यते आनाय्यो दक्षिणाग्निः रूढिरेषा तस्मात् अनित्यविशेषे दक्षिणा
ग्नावेवावतिष्ठते तस्य चानित्यत्वं नित्यमजागरणात् यश्चायं गार्हपत्याद् आनीयेन सहैकयोनिस्तत्रैव तन्निपातनं न दक्षिणाग्निमात्रे तस्य
हि योनिर्विकल्प्यते वैश्यकुलादि वत्कृतोम्भ्राष्ट्राद्वा गार्हपत्याद्वेति आनाय्यो नित्य इति चेद्दक्षिणाग्नौ कृतं भवेत् एकयोनौ तु त
द्विधादानेयो यस्तथा भवेत् ॥ ॥प्रणाय्योऽसंमतौ॥ ॥अविद्यमाना संमतिरस्मिन्नित्यसंमतिः संमननं संमतिः संमततापूजा प्रणा
य्य इति निपात्यते संमताव भिधेये प्रणाय्यश्चोरः असंमत इति किं प्रणेयोन्यः यद्येवं कथमेतत् ज्येष्ठाय पुत्राय पिता ब्रह्म प्र
ब्रूयात् प्रणाय्याया तेवासिने नान्यस्मै कस्मैचनेति संमतिरभिलाषोप्युच्यते तदभावेन निष्काम तया असंमतोन्तेवासी भवति तस्मै
९९ निष्कामाय मोक्षार्थं यतमानायान्तेवासिने प्रणाय्याय ब्रह्म ब्रूयादिति युज्यते ॥ ॥

दृष्टमित्यत्रोभयत्र नवैश्यकुलादित्यादिना यो निर्विकल्पं दर्शयति आनाय्यो नित्य इति चेदित्यादि दक्षिणप्रसंग इति शेषः भवेदिति संभावने लिङ् निपात
नादेव संभाव्यत इत्यर्थः एकयोनाविति आहवनीयेन आनेयोस्य यथा भवेदिति यथा दवति तमित्यर्थो नेनोच दक्षिणाग्ना वस्तोमदित्यर्थ एवमक्तोस्य अर्थः ॥
॥प्रणाय्य ४॥ ॥असंमतावितिवहुव्रीहिरित्याह अविद्यमानास्य संमतिरस्मिन्निति संमतिश्चात्र संमननं प्रीतिविषयभावोपगमनं कर्मण्यपरोक्षवि
स्तेन संमतत्वापातः तथा सत्यसंमतेरिति निपातनप्रसंगात् तस्माद्वाद्वि बहुलादि समभिप्रायेणाह संमततां संमतिरिति संमतिरभिलाषोप्युच्यत इति भोगवि
षयोप्यादरः संमतिशब्देनोच्यते तन्निरोस्येत्यर्थः ॥ ॥

का॰ष्ट॰ ५७

॥ पाय्यसांनाय्य॥ ॥ मीयतेनेनेति मानं लक्ष्यत इति हविः निवसंत्यस्मिन्निति निवासः समिध्यमाना धार्यतेऽनयेति सामिधेनी माङो ण्यत्प्रत्यय इति करणोत्
तत्र आतो युक् चिण्कृतोरिति युक् मेयमन्यदिति भावः कर्मणोऽर्थे देवभवतीत्यर्थः सान्नाय्यमिति सम्यङ् नीयते होमार्थमग्निं प्रतीति कर्मणि ण्यत् हविर्वि
शेष इति। ऐन्द्रं दध्यमावास्यायामैन्द्रं पयो मावास्यायामिति विहितयोर्दधिपयसोः सोऽयं ण्यत् तादर्थ्यात् हविर्मात्रे प्रायुंक्त तमप्यमवलीढे साधु
सान्नाय्यमिति सिद्धिरिति। निचीयते ऽस्मिन्धान्यादिकमिति अधिकरणे ण्यत् धाय्येति धीयते ऽनया समिदिति करणे ण्यत् एवं च पुंकृत्वमग्निशेषस्येति प्रयोगा

॥ पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु॥ ॥ पाय्यादयः शब्दा निपात्यंते यथासंख्यं माने हविषि निवासे सामिधेन्यां चाभिधेयायां॰ पाय्य इति माङो ण्यत्प्रत्यय आदेः पत्वं च निपात्यते माने॰ पाय्यं मानं॰ मेयमन्यत्॰ संपूर्वान्नयतेर्ण्यदायादेशा उपसर्गदीर्घत्वं च निपात्यते॰ सान्नाय्यं हविः॰ संनेयमन्यत्॰ रूढिरेषा हविर्विशेष एवावतिष्ठते॰ निपूर्वाच्चिनोतेर्ण्यदायादेश आदेः कुत्वं च निपात्यते॰ निकाय्यो निवासः॰ निचेयमन्यत्॰ धेयेति धाञो ण्यत्प्रत्ययो निपात्यते सामिधेनी चेत्सा भवति॰ धाय्या सामिधेनी॰ धेयमन्यत्॰ सामिधेनीशब्दः ऋग्विशेषस्य वाचकः तत्र च धाय्येति न सर्वासां सामिधेनीनां ग्रहणं किं तर्हि काश्चिदेव॰ रूढिशब्दो ह्ययं यथा चासामिधेन्यामपि दृश्यते धाय्याः शंसति अग्निर्नेता त्वं सोमक्रतुभिरिति॥ ५६ ॥

जात्प्रभिधवद्रसादिकस्य किं तर्हि काश्चिदेवेति समिध्यमानवतीं समिद्धवतीं चान्तरेण विकृतिषु प्रक्षिप्यमाणा पृथुपाजा अमर्त्य इत्यादिकाः कथं पुनरस्य
विशेषो लभ्यत इत्याह रूढिशब्दो ह्ययमिति। अत एव निपातनाश्रयणमिति भावः रूढित्वमेव द्रढयति यथा चेति धाय्याः शंसतीति ज्योतिष्टोमे मरुत्वती
ये शस्त्रे विधानमेतत् सामिधेयनीग्रहणं प्रयोगविषयोपलक्षणार्थमिति भावः॥ ॥ ५६॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥

एस॰ ५७

॥क्रतौकुंड॥ ॥एयतिप्रकृतेयत्प्रत्ययांतः कुंडपाय्यशब्दो निपात्यत इत्युक्तं तत्रप्रयोजनमाह यतो नावइनीतियदुत्तरपदस्याद्युदात्तत्वं कुंडुत्तरप
दप्रकृतिस्वरेणाप्यएव स्वरः सिद्धो भवतीत्यर्थः॥ एयतितु स्वरितत्वं स्यात्॥ ॥अग्नौ॥ ॥अग्नाविति निज्वलने किं तर्हि तदर्थ इष्टकाचयनविशेषे तत्रैव रू
ढत्वात्। इह संपूर्वा चूहवितर्क इत्यस्मा दनेकार्थत्वा दूहोऽर्थे वर्तमा दुल्लंत्तलाण्यतिसमूह्यमितिस्मि द्धं तयाचसमूह्यं चिन्वीत पशुकामः पशवो वै पु

॥क्रतौकुंडपाय्यसंचाय्यौ॥ ॥कुंडपाय्यसंचाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये· कुंडशब्दे तृतीयांत उपप
दे पिबतेर्धातोरधिकरणे यत्प्रत्ययो निपात्यते युक् च· कुंडेन पीयते स्मिन् सोम इति कुंडपाय्यः क्रतुः यतो नाव इति स्वरः संपूर्वा
च्चिनोतेर्ण्यदायादेशो निपात्येते· संचीयते सोमः संचाय्यः क्रतुः। क्रताविति किं· कुंडपानं· संचेयः॥ ॥अग्नौ परिचाय्योप
चाय्यसमूह्याः॥ परिचाय्य उपचाय्य समूह्य इत्येते शब्दा निपात्यंते अग्नावभिधेये· परिपूर्वादुपपूर्वाच्चिनोतेर्ण्यदायादेशो नि
पात्येते· परिचाय्यः· उपचाय्यः· संपूर्वादूहेः संप्रसारणं दीर्घत्वं च निपात्यते· समूह्यं चिन्वीत पशुकामः· अग्नाविति किं· परिचे
यं· संवाह्यं॥ ॥चित्याग्निचित्ये च॥ ॥चित्यशब्दो ग्निचित्याशब्दश्च निपात्यते· चीयते सौ चित्यो ग्निः· अग्निचयनमेवाग्निचि
त्याभावे यकारप्रत्ययस्तुक् च निपात्यते· तेनांतोदात्तत्वं भवति· अग्नाविसेवचोयमन्यत्र·॥ ॥ण्वुल्तृचौ॥ ॥धातोरि
तिवर्त्तते· सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः· कारकः कर्ता· हारकः हर्ता· चकारः सामान्यग्रहणाविघातार्थः॥ तुमुं
इति· तुरिष्टमेयमिति·॥ ॥छ॥ ॥

रुषः पशूनेवास्पतत्समूहतीतिवत्यर्थेनो हिंग्राह्यात्समूह्यशब्दो निरुक्तः॥ ॥चित्याग्नौ॥ ॥चित्योग्निरितिकर्मणिण्यदयवादः क्यप्निपात्यतेते
नाद्युदात्तत्वं भवतिभावेयकारप्रत्यय इति· किमर्थं पुनरत्रापि भवेवून निपातितः एवं हि तु ङ्पात्योन भवतितत्राह तेनांतोदात्तत्वं भवतीति अग्नाविसे
वेतितत्त्वचित्यशब्दस्यैवविशेषणार्थं नाग्निचित्याशब्दस्य भावे निपातितत्वात्तदेतद् इतिं चेयमन्यदिति॥ ॥ ॥ ॥

का०प८०
५८

॥नंदिग्रहि॥ ॥आदिशब्दः प्रत्येकमभिसंबध्यत इति गणत्रयपाठादिति भावः॥ अपो दृश्यंते यथ्यंते इति तेग्रहणंतस्त्वचः॥ आयो दृसोतिबुआएध दृश्लेत्यर्थः किमर्थं पुनरयोदृश्यप्रत्ययविधानं शब्दतानंदनादीनां गणपाठदेव सिद्धं साधुत्वं उच्यते असत्यस्मिन्नष्टाध्याय्यां क्वचिदप्यनुपयोगाद् गणत्रयपाठो नार्थेक्ष्यवसीयेतनंदिग्राहीत्यादि दुणादिसमृद्धौ· वाम्छ शद्वे· मदीहर्षे· दुषवैकृत्ये· राधसाधसंसिद्धौ· वृधुवृद्धौ· शुभशुंभशोभार्थे·

॥नंदिग्रहिपचादिभ्यो ल्युणिन्यचः॥ ॥आदिशब्दः प्रत्येकमभिसंबध्यते॥ त्रिभ्यो गणेभ्यस्त्रयः प्रत्यया यथा संख्यं भवंति· नंद्यादिभ्यो ल्युः ग्रहादिभ्यो णिनिः पचादिभ्योच् नंदिग्रहिपचादयश्च न धातुपाठसंनिविष्टा गृह्यंते· किं तर्हि नंदनरमणादिष्वेवमादिषु प्रातिपदिकगणेषु अपोदृत्य प्रकृतयो निर्दिश्यंते· नंदिवाशिमदिदूषिसा धिवर्द्धिशोभिरोचिभ्यो ण्यंतेभ्यः संज्ञायां नंदनः वाशनः मदनः दूषणः साधनः वर्द्धनः शोभनः रोचनः स हितपिदमः संज्ञायां· सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रंदनः संकर्षणः सहर्षणः जना र्दनः मधुसूदनः यवनः विभीषणः लवणः निपातनात्णत्वं चित्तविनाशनः कुलदमनः इति नंद्यादिः ५७ एम०
५८

दृश्चदीमो· दूषणा इति दोषो णाविस्त्वं· सहितपीत्यादि· षह मर्षणे· तप संतापे· शमुदमु उपशमे· जल्पनइत्यादि· जल्पजल्पव्यक्तायां वाचि· रमुक्रीडा यां· दृपहर्ष विमोचनयोः क्रदिआह्वाने रोदने च· कृषविलेखने· हृषु अलीके· अर्द हिंसायां· जनमर्दयतीति जनार्दनः कर्मण्यपणिप्रामोति एवमुत्तरत्रा पिकर्मण्युपपदे द्रष्टव्यं· पुमिश्राणे· षूद क्षरणे· मधुर्नामासुरः तं सूदयतीति मधुसूदनः जिभीभये· णिविभियोहेतुभयेषुक लूञ्छेदने· णश अदर्श ने· दमु उपशमे· णयंतो चित्तं नाशयतीति चित्तनाशनः कुलं दमयतीति कुलदमनः ५७

ग्राहीत्यादि· ग्रह उपादाने· षह मर्षणे· तसु उपक्षये दसु च· भस भर्त्सनदीप्त्योः· तिष्ठतेरात्तोपुक्· मत्रि गुप्तभाषणे चुरादिः· मर्द हिंसायां· रक्ष
सादि· रक्ष पालने· श्रु श्रवणे· डुवप् बीजसंताने· ओलजी(?) व्रीडे· एषां निशब्द उपपदे णिनिः· याचीत्यादि· टुयाचृ याच्ञायां· व्यञ् हरणे· व्रज गतौ·
वद व्यक्तायां वाचि वस निवासे· एषां प्रतिषिद्धानां णिनिर्भवति प्रतिषिद्धार्थो नञ् समर्थः प्रतिषिद्धार्थता च नञ् पूर्वाणामव्ययेन प्रतिदर्शयति अया
चीत्यादि· पचादि विशब्दो पिति गर्भर्थि रसादो प्रतिषेधे दृष्टः याचादीनां तु विपूर्वाणां णिनिर्न दृश्यते इति नञ्पूर्वाणां णिनिर्विज्ञायते· अचामित्या
दि। अजन्तानां धातूनामचित्तकर्तृकाणां प्रतिषिद्धार्थानां णिनिर्भवति नाविषये चित्तमस्यास्तीति चित्तः स कर्ता येषां ते तथोक्ताः विशायी विषयीति· शीङ्

ग्राही· उत्साही· उद्दासी· उद्भासी· स्थायी· मंत्री· संमर्दी· रक्षः श्रुवपशां नौ· निरक्षी· निश्रावी· निवापी· निशायी· याचृ
व्याहृ संव्याहृ व्रजवदवसां प्रतिषिद्धानां· अयाची· अव्याहारी· अव्राजी· अवादी· अवासी· अचामचित्तकर्तृकाणां
प्रतिषिद्धानामित्येव· अकारी· अहारी· अविनायी· अविशायी· विशायी विषयी देशे· अभिभावी भूते· अभिभावी·
अपराधी· उपरोधी· परिभावी· परिभवी· इति ग्रहादिः॥ पच· वच· वपि· वद· चल· प· वट· चल· पत· नदट्· भषट्· प्लवट्·
चरट्· गरट्· तरट्· चोरट्· ग्राह· सूद· सरट्· देवट्· मेक· कोप· मेष· मेध· नर्त· व्रण· दर्श· सर्प· जारभरः श्वपचः॥ ॥

स्वपो विजन्तबंधके ह्रस्वाभावो निपातनात्· अभिभावी भूत इति अभिभूतवानभिभावी· अपराधी उपरोधी राध साध संसिद्धौ· रुधिर् आवरणे· परिभवी
परिभावीति पक्षे ह्रस्वाभावः· पचेत्यादि डुपचष् पाके· वच परिभाषणे डुवपि हस्वार्थः एवं वदिरपि· चल कंपने· पत्लृ गतौ· नदट् इति· नर्द अव्यक्ते शब्दे·
टकारो ङीबर्थः एवमुत्तरत्रापि· भष भर्त्सने· प्लुङ् गतौ च रावसर्थः· गृ निगरणे· तॄ प्लवनतरणयोः· चुर स्तेये· दिवु क्रीडादौ· सदिरुक्तार्थः जनवर्ये(?)
हानौ· मङ्(?) प्राणत्यागे· ष्मूष सहने· षिवु तन्तुसंताने· मिष स्पर्धायां· कुप क्रोधे· मिधृ मेधा हिंसयोः· व्रण गात्रचूर्णने चुरादिः· नृती गात्रविक्षेपे·
दृशिर् प्रेक्षणे· सृप्लृ गतौ· डुभृञ् धारणपोषणयोः· जारं बिभर्तीति जारभरः एवं श्वानं पचतीति श्वपचः अच्कादिषु श्वपाक शब्दस्य पाठस्य क्षेकर्मण्य
णपि भवति॥ ॥श्रू॥ ॥

का॰प॰
५९

॥पचादिराकृतिगणा इति। तत्संबंधिनि अचादिशब्दस्य प्रकारवचनत्वात् तथा च शिवशमरिष्टस्य करे इति कृञो च प्रत्ययः कृतः। घटेषु कर्मणि घटो घटीजि
तितथापङ्क्तानां यङो विवेचेति यङो मित्रलुक्‌त्विलुगुक्तः। भाष्ये चात्रापि सर्वधातुभ्यो वक्तव्य इत्युक्तं पचाद्यनुक्रमणं तु नदट् इत्यादौ अनुबन्धासंजनार्थं
कर्मोपपदानां इगुपधानां च बाधकबाधनार्थं दैवादिषु भयार्थं समस्तेषां तु प्रपंचार्थं द्रष्टव्यम्॥ ॥इगुपध॥ ॥इगुपधादीनां समाहारद्वंद्वे नपुंसकत्वेन
ह्रस्वप्रसंगात् इतरेतरयोगे द्वंद्वः अत्र पचेत्यसः यः पंचमीकत्वं च नंतत्र कृ शब्दस्य धात्वनुकरणात् लात्मक तिवदनुकरणं विभक्त्या विवक्षितं इति आतो लोप

॥पचादिराकृतिगणः॥ ॥इगुपधज्ञाप्रीकिरः कः॥ इगुपधेभ्यो धातुभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्ययो भव
ति। विक्षिपः। विलिखः। विबुधः। कृशः। जानातीति ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। देवमेवमेषादयः पचादिषु
द्रष्टव्याः॥ ॥आतश्चोपसर्गे॥ ॥आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे कप्रत्ययो भवति। णप्रत्ययस्यापवा
दः। प्रस्थः। सुग्लः॥ ॥पाघ्राध्माधेट्दृशः शः॥ ॥पा। घ्रा। ध्मा। धेट्। दृश् इत्येतेभ्यो धातुभ्यः शप्रत्ययो भवति। उत्पि
बः। विपिबः। घ्रा। उज्जिघ्रः। विजिघ्रः। ध्मा। उद्धमः। विधमः। धेट्। उद्धयः। विधयः। दृश उत्पश्यः। उपसर्ग इति केचिदनु
वर्तयन्ति। पश्यतीति पश्यः। जिघ्रतेः संज्ञायां प्रतिषेधः। व्याघ्रः ५८ ॥ ॥छ्॥ ॥छू॥ । ॥

इति च प्रिय इति प्रीञ् तर्पणे इत्यस्य इयादेशः। किर इति। कॄ विक्षेपे कीर् इति ह्वातोः पचादिषु द्रष्टव्या इति। यद्यपि अच् पित्वजादिवत् सर्वधातुभ्यो भवति तथापि स्म॰
प्रवाद बाधनार्थमेते पचादिषु द्रष्टव्या इत्यर्थः॥ ॥पाघ्राध्मा॥ ॥पा पाने। घ्रा गन्धोपादाने। ध्मा शब्दाग्निसंयोगयोः। धेट् पाने। दृशिर् प्रेक्ष ५९
णे। पारक्षणादित्यस्य तु लुग्विकरणत्वात् ग्रहणं उत्पिब इत्यादि। पाघ्रादिसूत्रेण पाघ्राध्माः पिबादयः आदेशाः। व्याघ्र इति अत्र आतश्चोपसर्गे इति कः
बतिः अत्र च ध्माघ्रादिभिरिति वचनं लिंगं ५८ ॥

॥अनुपसर्गात्॥ ॥अनुपसर्गादिति अन्ये एकवचनमित्याहुः अनुपसर्गेभ्य इति लिप उपदेहे विद्लृ लाभे आगामिना नुमा सनुम्कयोर्ग्रहणं तेन विघंतरा
णामग्रहणं धृञ् धारणे धृङ् अवस्थाने णिजन्तयोर्द्वयोरपि ग्रहणं पार तीर कर्मसमाप्तौ विद चेतनाख्याननिवासेषु चुरादिः ज्ञानाद्यर्थानामन्यतमो वा हेतुम
ण्णिजन्तः एजृ कम्पने णिजन्तः चिती संज्ञाने चुरादिः साति हेतुमण्णिजन्तः षह मर्षणे चुरादिः हेतुमण्णिजन्तो वा लिम्पः विन्द इति तुदादिभ्यः शः शे मुचादीनामिति नुम् धा
रणादिषु शव गुणाभावादेशाः नौ लिम्पेरिति छन्दसि तु धर्त्तो च विधर्त्ता च विधारय इति द इत्यतेश्च विन्द इति आकारान्तो दलाम्यशब्देनोच्यते॥ ॥ददाति॥ ॥
ददः दधः इति शपः श्लुः द्विर्वचनं श्नाभ्यस्तयोरातः इत्याकारलोपः दद दाने दध धारणे इत्येताभ्यामपि चेत् कृते ददः दधः इति सिद्धं ह्वाभ्यामपि णे कृते दायो धाय
इति इदं तु वचनं सार्थं अददः अदधः इति च का वशङ्का विसंतो दान्तं लं माभूत् न जस्थाने एव यथा स्यादिति॥ ॥ज्वलिति॥ ॥इति शब्द आद्यर्थ इति

॥अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च॥ ॥अनुपसर्गेभ्यो लिम्पादिभ्यः शप्रत्ययो भवति। लिम्पतीति लि
म्पः। विन्दतीति विन्दः। धारयतीति धारयः। पारयतीति पारयः। वेदयतीति वेदयः। उदेजयतीत्युदेजयः। चेतयतीति चेतयः। सातिः सौत्रो धा
तुः। सातयः। साहयः। अनुपसर्गादिति किं। प्रलिपः। नौ लिम्पेरिति वक्तव्यम्। निलिम्पा नाम देवाः। गवादिषु विन्देः संज्ञायां। गोविन्दः। अर
विन्दः॥ ॥ददातिदधात्योर्विभाषा॥ ॥ददातेर्दधातेश्च विभाषा शप्रत्ययो भवति। ददः। दधः। दायः। धायः। अनुपसर्गादित्येव। प्रदः।
प्रधः॥ ॥ज्वलितिकसन्तेभ्यो णः॥ ॥इति शब्द आद्यर्थे वर्तते। ज्वल दीप्तावित्येवमादिभ्यो धातुभ्यः कस गतावित्येवं पर्यन्तेभ्यो
विभाषा णप्रत्ययो भवति। अचोऽपवादः। ज्वलः ज्वालः। चलः चालः। अनुपसर्गादित्येव। प्रज्वलः। तनोतेर्णउपसंख्यानं। अवतनो

अनेकार्थत्वान्निपातानां उच्चावचेष्वर्थेषु निपतन्तीति निपाता इति निरुक्तकारो निपातशब्दं निराह ज्वलितीत्यविभक्तिको निर्देशः ज्वलादिभ्य इत्यर्थः कश्चि
त्तेषां तेषां नेकसन्तानां तत्र पेक समधात्व हृ इति पठन्ति तेषां मतेक सन्त ग्रहणं चिन्त्यप्रयोजनं न तु च ज्वल दीप्तावितिदिः पठ्यते घटादिषु परस्ताच्चतेषाम स्य
म्मि त्विशेषणे सन्देहः स्यात् किं पूर्वो ज्वलिरादिरुत पर इति अतः कसः समीपभूतेभ्यो ज्वलादिभ्य इति विशेषणमर्थवत् नैतन्मुच्यते पर्यन्तशब्दः समीपवच
नो बहुव्रीहौ तत्पुरुषे च कसेर्ग्रहणं न प्राप्नोति पूर्वत्र ज्वलता वा द्वावभिप्रेतेन इन्नन्त एव धातुरूपा दीयेत यद्युपदेशे नैव ज्वलनेर्ग्रहणं सिद्धं घटादिपाठश्चापि
संज्ञायां चरितार्थः इतरस्त्वचरितार्थ इति एवादिर्भविष्यति अचोऽपवाद इति तत्रापि सर्वधातुविषयत्वादिति भावः अमुचलन इत्यस्य ज्वलादिपाठः किम
र्थः याव तापचाघविभ्रम इति सिद्धं णोऽप्यतदेव रूपं नोदान्तोपदेशस्येति वृद्धिप्रतिषेधात् रहाभ्रम इति अचकावशङ्का विनिमित्ते माभूदिति॥ ॥ ॥

का॰पद॰ ॥श्याद्व्यधास्रु॥ ॥अनुपसर्गादिति निवृत्तमिति उत्तरसूत्रे पुनरनुपसर्गग्रहणात्॥ विभाषेति चेति निवृत्तमित्यपेक्ष्यते विभाषाग्रहणं ह्यनुपसर्ग
६० ग्रहणात्॥ विभाषेति चेति निवृत्तमित्यपेक्ष्यते विभाषाग्रहणं ह्यनुपसर्गग्रहणेन संबद्धं तत्सन्निवृत्तावस्यापि निवृत्तिः श्यैङ इति श्यैङ्ग्रहणात्तु निर्देशात् ततः शी
आत इत्यादिति शीङो यणादेशेन ग्रहणं न भवति व्याख्यानात् स इति प्रतीतावनारोहात्॥ आकारांतेभ्य इति एतेन अतेः अच्छंदूतानां मतिप्रभृती
नां अकारांतानां च ग्रहणं न भवतीति दर्शयति एतदपि व्याख्यानादेव अथ ताडने सुगतो आङ् पूर्वः संपूर्वश्च गतौ अतिपूर्वः बोतकर्मणि इह जहर

॥श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च॥ ॥अनुपसर्गादिति निवृत्तं विभाषेति च॰ श्यैङः आकारांतेभ्यो
धातुभ्यः व्यधेः आस्रु संस्रु॰ अतीण॰ अवस॰ अवहृ॰ लिह॰ श्लिषः श्वसइत्येतेभ्यश्च णप्रत्ययो भवति॰ स्त्रापतेराकारांत
त्वादेव सिद्धे प्रत्यये कवचनं बाधकबाधनार्थं॰ उपसर्गे कं बाधित्वा अयमेव भवति॰ अवश्यायः प्रतिश्यायः आत॰ दायः धायः॥
व्याधः आस्रावः संस्रावः अत्यायः अवसायः अवहारः॰ लेहः श्लेषः श्वासः॥ ॥दुन्योरनुपसर्गे॥ ॥दुनोतेर्नयतेश्चा
नुपसर्गाण्णप्रत्ययो भवति॰ दुनोतीति दावः नयतीति नावः॰ अनुपसर्गइति किं प्रदवः प्रणयः॥ ॥५९॥ ॥ ॥

णो अवपूर्वो लिह आस्वादने श्लिष आलिंगने श्वस प्राणने येत्र सोपसर्गाः तेभ्यः सोपसर्गेभ्य एव भवति शेषेभ्यस्त्वविशेषेण बाधकबाधनार्थमिति क्ना एस॰
तश्चोपसर्गे इति विशेषविहितः कः सामान्यविहितस्य णस्य बाधकस्तद्बाधनार्थमिदं एतेन नावश्यते रूपाण्यनं व्याख्यानं अवश्याय इति पूर्ववद्घञ्॥ ॥ ६०
दुन्योः॥ ॥दावइति वनवाह्निः कथं तत्रैव दवः इति नयति साहचर्यात्सानुबंधकस्य दुनोतेरिह ग्रहणं निरनुबंधकाद्द्रवतेः पचाद्यचि भविष्यति कारणास्या
धनो वा अन्दोरश्विस्रबंतः ५९ ॥ ॥

॥ ॥विभाषा॥ ॥अवस्थितविभाषा चेयमिति एतदेव स्पष्टयति जलचर इति भव इति भवत्येव न तु कदाचिन्न भवतीति भवो देवः संसारस्थभावाः पदार्थाः॥
॥गेहे कः॥ ॥गेह इति प्रत्ययार्थस्य कर्तुर्विशेषणं नोपपदं गृह्णतीति नास्य युक्त इति निर्देशात् द्विसाह गेहे कर्तरीति तात्स्थ्याद्दाराश्चेति गेहमित्यस्येत्यनेनेति न गौण
स्यापि गेहस्य ग्रहणमिति दर्शयति तत्र तत्रापि स्त्री रमतत्पश्च पर्णेन लभ्यते तत्र वेश्मनि पुल्लिंगो बहुवचनान्त एव गृहा न्हदाऊ वच्चन्नो को भवति गृहानुत्वपो
संकाशयते गृहानाद्धुर गृहपत्नी गृहा न सुमनसः प्रपघ इति न पुंसकलिंगोभिधेयवचनः एवं दारेष्वपि अन्ये तु गृह शब्दो वेश्मन्येव मुख्यः दारेषु गौण इति व
दंति तथा न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इति वेश्मन्येव मुख्यतां दर्शयति यथा हि निकारेण गौणं तथा दारेष्वपि मुख्य एवेति लक्ष्यते। ॥शिल्पि

॥विभाषा ग्रहः॥ ॥ग्रहेर्धातोर्विभाषा णप्रत्ययो भवति· अचोपवादः· ग्रहः· अवस्थितविभाषा चेयं· जलचरे ग्राह एव·
ज्योतिषि ग्रह एव· भवतेश्चेति वक्तव्यं· भवतीति भावः भवः॥ ॥गेहे कः॥ ॥ग्रहेर्धातोः कप्रत्ययो भवति गेहे कर्तरि· गे
हं वेश्म· तात्स्थ्याद्दाराश्च· गृह्णन्तीति गृहा दाराः· गृहाणि वेश्मानि॥ ॥शिल्पिनि ष्वुन॥ ॥धातोः ष्वुन्प्रत्ययो भवति
शिल्पिनि कर्तरि· नृतिखनिरञ्जिभ्यः परिगणनं कर्तव्यं· नृती गात्रविनामे· नर्तकः· खनु अवदारणे· खनकः· नर्तकी·
रंज रागे· रंजेरनुनासिकलोपश्च· रजकः रजकी·॥ ॥गस्थकन॥ ॥गायतेर्धातोस्थकन् प्रत्ययो भवति शिल्पि
नि कर्तरि· गाथकः॥ ॥ण्युट् च॥ ॥चकारेण थकन् अनुकृष्यते गायतेर्धातोर्ण्युट् प्रत्ययो भवति शिल्पिनि कर्तरि·
गायनः गायनी· योगविभाग उत्तरार्थः॥ ॥

नि॥ ॥पूर्वेणाण्साह व यति शिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणं नोपपदमित्याह शिल्पिनि कर्तरीति किं पादुकोत्पत्तिः शिल्पं तद्यस्यास्ति शिल्पी
नृतिखनीत्यादि एतद्वचनमेवं तेनाक्षाता आक्राय कुरसादौ न भवति रंजेरनुनासिकलोपश्चेति एतच्च ज्ञापकात्सिद्धं यत्ययं जनीन्द्ध ष्वप्रत्ययं जो मतान्वे
ति मित्संज्ञां शास्ति तज्ज्ञापयति रंजेरक्ङित्यप्यनुनासिकलोपो भवतीति॥ ॥गः स्थ॥ ॥गायतेरिति केगैरादेगमास्य ग्रहणोपविशेषणं इति गाङः नाति सत्या
भिग्रहणं प्राप्तं अनभिधानान्न भवति थकन्प्रत्ययो हि गायत्यर्थविषये न शिल्पिनमभिधातुं समर्थः॥ ॥ण्युट् च॥ ॥णकार ण्युगर्थः टकारो ङीबर्थः॥ यो
गविभाग उत्तरार्थ इति उत्तरसूत्रे ण्युट् एव नानुवृत्तिर्यथा स्यात् थकनो मा भूदिति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰पद॰
६१

॥हश्च॥ ॥जहातेरिति। ओहाक् त्यागे जिहीतेरिति ओहाङ् गतौ प्रायेण जिहीतेरिति पाठः सत्यपुक्तः श्निपः पिलादीत्वाभावात्। जहातेः ककारोत्रसा
मान्यग्रहणार्थः अन्यथा एकानुबंधकत्वात् स्यैव स्यात् अथ हाङ् इत्युच्येत एवमपि तस्य ग्रहणं न स्यात् तस्माद्द्वयोरपि ग्रहणं व्रीहिकालयोरिति कर्तृवि
शेषणं नोपपद्यं त्रिचतुर्थ्यं हि। यन्नस्यदामहायनोनाम्नेति वचनाद्रितिमन्त्राह व्रीहौ काले चेकर्तरीति जहत्युदकामिति कृत्वेति व्रीहौ हायन शब्दस्य प्रवृत्ति
निमित्तं दर्शितं जांगलदेशोद्भवाः केचिद्व्रीहयो हायना इत्याहुः। जिहते भावानिति भावाः पदार्थास्तान् जिहीते गच्छति परिच्छेदकत्वेन प्राप्नोतीत्यर्थः॥
॥पुसृल्वः॥ ॥पुसृल्व इतियं वृन्नाः स्थाने जस् ओः सुपीति यणादेशः साधुकारित्वं लक्ष्यत इति। प्रायः सहचरितत्वात् पुनः पुनरनुष्ठानं समभिहारः

॥हश्च व्रीहिकालयोः॥ ॥च्युकारेणाल्युडनुकृष्यते जहातेर्जिहीतेश्च ल्युट् प्रत्ययो भवति व्रीहौ कर्तरि काले च। हाय
नानाम व्रीहयो भवंति। जहत्युदकमिति कृत्वा। काले। हायनो नाम संवत्सरः जहाति भावानिति कृत्वा॥ ॥पुसृल्वः समभि
हारे वुन्॥ ॥प्रुङ् पुङ् गतौ सृ गतौ लूञ् छेदने इत्येतेभ्यो धातुभ्यः समभिहारे वुन् प्रत्ययो भवति। प्रवकः सरकः लवकः
समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते। साधुकारिणि वुन्विधानं। सकृदपि यः सुष्ठु करोति तत्र भवति बहुशोपि यो
दुष्टं करोति तत्र न भवति॥ ॥आशिषि च॥ ॥आशिषि गम्यमानायां धातुमात्राद्वुन् प्रत्ययो भवति। जीवतात् जीवकः
नंदतात् नंदकः भवतात् भवकः आशीः प्रार्थनाविशेषः स च क्रियाविषयः अमुष्याः क्रियायाः कर्त्ता भवेदित्येवमाशा
स्यते॥ ॥इति काशिकायां वृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः॥ ६० ॥

यश्च यां क्रियां पुनः पुनरनुतिष्ठति तस्य तत्र प्रायेण कौशल्यमुपजायते अतः प्रायः साहचर्यात्साधुकारित्वं लक्ष्यते लक्षणया तत्र वर्त्तत इत्यर्थः। पम॰
तेन किं सिद्धं भवतीत्याह सकृदपीति॥ ॥आशिषि च॥ ॥आशिषि गम्यमानायामिति निगद्यायां कर्तरि कृदिति कर्तुरेव वाच्यत्वात्। प्रार्थनाविशे ६१
षइति अप्राप्तस्याभिलषितस्य प्राप्तुमिच्छा प्रार्थना आशीः स चेत् क्रियाविषय इति। धातोरित्यधिकारात्तथा नोच्च क्रियावचनत्वात्। अमुष्याः क्रियाया
इति जीवनादिकायाः अनेन प्रयोक्तृधर्मत्वमाशिषो दर्शयति जीवतादिति आशिषि लोट् प्रयोगेणोदाहरणे आशिषं दर्शयति॥ ॥७॥ ॥इति श्री
हरदत्तमिश्रविरचितायां पदमंजर्यां तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः॥ ॥ ६० ॥ ॥ ७ ७ ॥ ॥ ॥ ॥ ११॥ ॥

॥ ॥कर्मण्यण्॥ ॥कर्मणीतीति नेदं स्वरूपग्रहणं अशब्दसंज्ञेति प्रतिषेधात् ननु चार्थस्येयं संज्ञा न शब्दस्य अशब्दसंज्ञेति नैवं विज्ञायते यतेः शब्द
स्य संज्ञा अशब्दसंज्ञेति किं तर्हि शब्दे संज्ञा शब्दसंज्ञेति अशब्दशब्देन शब्दानामनुशासनं व्याकरणमुच्यते अस्मिंश्चाधिकृते कृत्रिमाकृत्रिमयोः कृत्रिमस्यै
व ग्रहणमुक्तं तस्मात्पारिभाषिकस्य कर्मणो ग्रहणमंगीकृतं तस्यावांतरभेदमाह त्रिविधं कर्मेति ता एव तिस्रो विधा दर्शयति निर्वर्त्यं विकार्यं प्राप्यं चे
ति। यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यं यथा कुंभं करोति पुत्रं प्रसूत इति यस्य तु सत एव कश्चिद्विकारः क्रियते तद्विकार्यं स च विकारः
कचित्प्रकृत्युपमर्दः यथा काष्ठानि भस्म करोति सुवर्णं कुंडलं करोतीति क्वचिच्छ्लगम्यः व्रीहीन्प्रोक्षतीति अत्र प्रोक्षणेन व्रीहिषु कश्चिद

॥ ॥कर्मण्यण्॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ० ॥

तिरिति शयाज्जन्यत इति एतस्मादेव गम्यते एतावता च भेदेन संस्कार्यमेतत्कर्मेति चातुर्विध्यं मीमांसका मन्यंते क्रियाकृतविशेषाभावे तु प्राप्यं
कर्म यथा वेदमधीयते वर्षं पारयतीति। ननु च कर्तुरीप्सिततममित्येतदेव कर्म त्रिविधमन्यदप्यस्ति तथा युक्तं चानीप्सितमिति तच्च द्वि
धं द्वेष्यमितरच्च तथा अकथितं च एवंविधः कर्म च तथा अधिशीङ्स्थासां कर्मेति तदेवमवांतरभेदविवक्षायां सप्तविधं कर्म उक्तं च निर्वर्त्यं च
विकार्यं च प्राप्यं चेति त्रिधा मतं· तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितं· औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं॥ संज्ञांतरैरनाख्यातं यद्य
च्चाप्यन्यपूर्वकमिति· तत्किमुच्यते॥ ॥छ॥ ॥

॥ त्रिविधं कर्मेति। केचिदाहुः कर्तुरीप्सिततममेवात्र कर्म गृह्यते अस्मत्राणं न भवतीति। अन्ये त्वाहुः आदित्यं पश्यतीत्यादौ मा भूदित्येवमर्थं कर्मणि निर्वर्त्य-
माने विक्रियमाणे इति च कर्तव्यमित्याशंक्य वार्त्तिककारेणोक्तं कर्मणि निर्वर्त्यमाने विक्रियमाणे इति चेद्वेदाध्यायादीनामुपसंख्यानमित्यादि। तदनेन प्र-
दर्श्यते त्रिविधमपि कर्म गृह्यते न पुनः प्रार्थनं गृह्यत इति। न तु सूत्रान्तरोक्तं व्यावर्त्यते। तथा च द्विविधः कर्म चेत्यत्र समावेशस्य प्रयोजनमुक्तं मनसा देव-
इत्यत्र कर्मत्वादणः करणत्वात्तृतीयेति। एवं च हिमवच्छ्रावयः पर्वताधिवासः इत्याद्यपि यथादर्शनं भवतीति अनभिधानादिति तच्चानभिधानं यत्रासेहत्युक्तं

॥ त्रिविधं कर्म निर्वर्त्यं विकार्यं प्राप्यं च। सर्वत्र कर्मण्युपपदे धातोरण् प्रत्ययो भवति· निर्वर्त्ये· कुंभकारः न-
गरकारः· विकार्ये· कांडलावः शरलावः· प्राप्ये· वेदाध्यायः चर्चापारः· ग्रामं गच्छति आदित्यं पश्यति हिम-
वंतं शृणोतीत्यत्र न भवति· अनभिधानात्· शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्त-
व्यं· मांसं शीलयति मांसशीलः· मांसशीला· मांसकामः· मांसकामा· मांसभक्षः मांसभक्षा· कल्या-
णाचारः कल्याणाचारा· ॥ १ ॥ ॥

नन्वेवमन्यत्रापि यथालक्षणं भवत्येव तथा च पठति यथालक्षणमप्रयुक्त इति। शीलिकामी माहि शीलसमाधौ भक्ष अदने चुरादिः कमु कान्तौ णिङन्-
तः चर गत्यर्थः आङ्पूर्वः। णस्य णित्करणं चरेर्वृद्ध्यर्थं पूर्वपदप्रकृतिस्वरत्वं चेति। कृदुत्तरपदप्रकृतिस्वरस्यापवादः। मांसशीलेति। अत्र णिलोपे सति ङी-
ष्प्राप्तस्तेऽपि चिट्त्वात् कृतं भवतीत्येतच्चुताच्छीलिक एव णो भवति। मनेर्दीर्घश्चेति सप्रत्ययान्तो मांसशब्दः कल्याणशब्दो लघावन्ते द्वयोश्च बह्वषो
गुरुरिति मध्योदात्तः। अस्यायमर्थः। अन्ते लघौ परतो द्वयोश्चान्तयोर्लघ्वोः परतो बह्वषः शब्दस्य यो गुरुः स उदात्तो भवति बह्वषः इति बह्वच इत्यर्थः। अ-
पित्पचः पूर्वाचार्यसंज्ञा ॥ १ ॥ ॥

क्षिक्षमिभ्यां चेति । अत्रापि पूर्वपदप्रकृतिस्वरत्वं चेत्येव वाक्यभेदस्तु वेदितव्यः अर्थः इह यो मांसं भक्षयति मांसं तस्य भक्षो भवतीति तत्र भक्षयतेः कर्मण्ये
रञ्जंतस्य बहुव्रीहिणा सिद्धं एवमन्यत्रापि यः पुनराणं तस्य घञंतस्य बहुव्रीहिर्नार्थः एतेन ननु बहुभक्षः इत्यत्र बहोर्नञ्वदित्युत्तरपदांतोदात्तत्वं
प्राप्नोति एवं तर्हि भावे घञंतेन व्याधिकरणपदो बहुव्रीहिर्भविष्यतीति बहुषु भक्षो यस्य बहुभक्ष इति तत्रोत्तरपदार्थस्य बहुत्वाभावाद्बहुस्वेन भ
विष्यतीत्यसंज्ञ अणो बाधनार्थं तु वचनं । अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन यथा चादिभ्यश्च अनुपपदो कारस्तस्यावकाशः पचतीति प
चः कर्मोपपदस्यावकाशः काण्डलावः शरलावः ओदनपाचः इत्यत्रोभयप्रसंगे परत्वाद्यमेवाणा भवतीति तेनोपधाह्रस्वपदसमासश्च नित्यो
भवति अपि तु षष्ठीसमासो विकल्पितः स्यात् न च वाक्ये युगपद्द्विवक्षायां भवतु विप्रतिषेधः केवलेय यथ र्थे विवक्षिते अपि कर्तेयश्चा ओदनसंबं
धे विवक्षिते ओदनपचः पपि प्राप्नोतीति एकत्वात्प्रयोगस्य न हि तस्मिन्नेव प्रयोगे विवक्षितं चाविवक्षितं च कर्म भवतीति तस्मादोदनपचं इत्यसाधु

ईक्षिक्षमिभ्यां चेति वक्तव्यं · सुखप्रतीक्षः सुखप्रतीक्षा · बहुक्षमः बहुक्षमा ॥ ॥ ह्वावामश्च ॥ ॥ ह्वेञ् स्पर्द्धायां
शब्दे च · वेञ् तंतुसंताने · माङ् माने · इत्येतेभ्यः कर्मण्युपपदेऽण्प्रत्ययो भवति · कस्मात् यस्याऽपवादः · स्वर्गह्वायः ·
तंतुवायः धान्यमायः ॥ ॥ छ ॥ ॥

रेवगंगाधरः श्रीधरः वज्रधरः ह्रग्धरेति तु संज्ञाशब्दाः पदात्तज अपि सर्वधातुभ्य इति पक्षे तदापवादत्वादेव तस्याणो बाधकाः तथा इगुपधज्ञा
प्रीकिरः कः अनुपपदः तस्यावकाशः विक्षिपः विलिखः कर्मोपपदस्य स एवकाष्ठभेदः इत्यत्रोभयप्रसंगे परत्वादयमेवाण भवति तथा अनुप
संर्गाल्लिंपविंदेत्यनुपपदः शः तस्यावकाशः लिंपतीति लिंपः कर्मोपपदस्य स एव कुड्यलेपः इत्यत्रोभयप्रसंगे परत्वादयमेवाणा भवतिआ
तश्चोपसर्ग इति कोऽनुपपदः तस्यावकाशः सुग्लः सुम्लः कर्मोपपदस्य स एव गोसंदायः इत्यत्रोभयप्रसंगे परत्वादयमेवाण भवति ॥ ॥
ह्वावामश्च ॥ ॥ वेञ् तंत्विति ॥ ॥ वा गतिगंधनयोरित्यस्य ग्रहणं न भवति अकर्मकत्वात् भ्रमणार्थत्वात् सोऽस्य वृद्धिः शब्दः आवाति वातेस्त्वा वातु
भेषजमिति सोपसर्गस्य तु सकर्मकत्वेऽप्यग्रहणं एवं वीं वाणः सिद्धत्वात् वाता वांतीति शिशोरद्रो ति प्रयोगाश्च विसः अथापि केचित्कथंचित्सकर्म
कत्वं तथापि केत्रा साहचर्यात्मानुबंधकस्यैव वेञो ग्रहणं । माङः माङ् माने इति ङितो माङ्रूपस्योपलक्षणमेतत् तेन मेङः प्रणिदाने इत्यस्यापि ग्रहणं
माङ्माने इत्यस्य तु संभवनार्थस्याकर्मकत्वादग्रहणं ॥ ॥ छ ॥ ॥

॥आतोनुपसर्गेकः॥ ॥कविधौसर्वत्रप्रसारणिभ्योडो वक्तव्यः संप्रसारणभाजः प्रसारणिनः उपाव योह्वानौब्रह्मजिनात्ती तिब्रह्मज्यः सर्वत्रग्रहणा
न्नावरूपमिहैव आतश्चोपसर्गे आह्वः प्रह्वः केहि संप्रसारणप्रसंगः आह्वा अह्व इति स्थिते संप्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः प्रहुव इति प्राप्नो
ति एवं ब्रह्मज्य इति प्राप्नोति न नु संप्रसारणे कृते आतोलोप इटि चेत्यस्या निवृत्तावादियङुवङौ न भविष्यतः लोपो न सिध्यति अंतरंगत्वात् पूर्वत्वं प्राप्नोति
समानाश्रये च वार्णादांगं बलीय इति एवं तर्हि प्रागेव संप्रसारणादातोलोपो भविष्यति परत्वात् नित्यं संप्रसारणं कृताकृतप्रसंगित्वात् आतोलोपस्तु
नित्यः कृते संप्रसारणे पूर्वत्वेन बाधितेयस्य च अनिमित्तं लक्षणांतरेण विहन्यते न तदनित्यं तदेवं परत्वादातो लोपः ततः संप्रसारणं ततइयङुवङो प्रसक्ता
वाल्लोपस्यास्या निवृत्त्यानभविष्यतः अनुयोगादिष्ट आह्वः पूर्वत्वस्यापि विधिं प्रतिस्थानिवद्भाव आदिष्टाच्चेयोचः पूर्वइदानीमेव मुक्तं पूर्वमाल्लोपःय

॥आतोनुपसर्गेकः॥ ॥आकारांतेभ्योनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति। अणो
पवादः। गोदः। कंबलदः। पार्ष्णित्रं। अंगुलित्रं। अनुपसर्ग इति किं गोसंदायः। वडवासंदायः २

आत्संप्रसारणमिति एवं तर्ह्याकारलोपस्यासिद्धत्वादुवङ् न भविष्यति इहापि तर्हि जुहुवतुः जुहुवुः आल्लोपस्यासिद्धत्वादुवङ् प्राप्नोति आभी
यमसिद्धत्वमनित्यमिति अत्र न भविष्यति अथवा संप्रसारणाच्चाङः परांतादित्यत्र एङ इति योगविभागः संप्रसारणादेङि परतः पूर्वपरयोः पूर्वमे
कादेशो भवतीति किमर्थमिदं न संप्रसारणाच्चेत्येव सिद्धं ज्ञापनार्थं यत्र संप्रसारणात्परएङ् संभवतीति तत्रादेच उपदेशेऽशितीत्यात्वं न भवतीति यदि
स्यात् पूर्वत्वेन तस्य निवृत्तिविधानमनुपपन्नं स्यात् तेन जुहुवतुरित्यत्रानैमित्तिकत्वेनांतरंगमप्यात्वमकृत्वा एङ्नादेवलिटि विहिते संप्रसार
णं पूर्वत्वं च न स्यादिति वक्तव्यं नासिद्धत्वमिति सिद्धमिष्टं आह्वः प्रह्वः ब्रह्मज्यः इत्यत्राकारांतलक्षणः प्रत्ययो नाम स्यात्त्वे भवितुमर्हतीति पूर्वमात्वे
ततः प्रत्ययः आल्लोपः संप्रसारणं असिद्धत्वादियङुवङोरभावः॥ २॥

॥सुपिस्थः॥ ॥सुपीतिन सप्तमीबहुवचनस्य ग्रहणं किं तर्हि प्रत्याहारस्य सुपिति इदं तं पदं सुप आत्मनः काच् सुपो धातुप्रातिपदिकयोः अव्ययादाप्सुपः
सा देतस्मै ऋद्धिहत्वात् द्वाभ्यां पिबतीति ननु दृष्टेश बद्धिपादयः ततश्चाहितमप्यनुपचार्थमाश्रित्य कर्मोपपदे एव कः करिष्यते नैतदेवं द्वाभ्यां पि
बतीत्यादेरवार्थे एव प्रसंग भवतीय पीत्यादौ नैव सुपत्नोस्तं भवेत् मा भवत्या मसमासः कल्पनायामप्रयुक्तत्वात् यत्रत्वसंतमसंभवः युक्तानि ते वृत्ताः कल्पनायां याति
लपायिकादौ अनेन भावे यथा स्यादिति आरंभसामर्थ्यात्रावदयं कर्त्तुरपकृष्यते न चान्यो निर्दिश्यते अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवंतीत्या
र्यष्ठधात् तो भाय एवं नतु ववर्थक विधानमिति भावे कः सिद्धः सत्वं नित्यसमासार्थं तु वचनं अन्यथा पाशिकः षष्ठीसमासः स्यात् नित्य एव तु

॥सुपिस्थः॥ ॥सुबंत उपपदे तिष्ठतेर्धातोः कप्रत्ययो भवति॰ समस्थः॰ विषमस्थः अत्र योगविभागः कर्त्तव्यः सुप्या
कारांतेभ्यो धातुभ्यः कप्रत्ययो भवति॰ द्वाभ्यां पिबतीति द्विपः॰ पादपः॰ स्थः॰ स्थ इत्यस्य पिकप्रत्ययो भवति॰ किमर्थमिदं क
र्म्मणि पूर्वयोगः॥ अनेन भावे यथा स्यात्॰ आखूनामुत्थानं॰ आखूत्थः॰ इतउत्तरं कर्मणि सुपीति च द्वयमप्यनुवर्त्तते तत्र
सकर्मकेषु धातुषु कर्मणि सेत दुप्पतिष्ठते न्यत्र सुपीति॥ ॥तुंदशोकयोः परिमृजापनुदोः॥ ॥तुंदशोकयोः कर्मणि
उपपदयोः परिमृजापनुदोर्धात्वोः कप्रत्ययो भवति॰ तुंदपरिमृज आस्ते॰ शोकापनुदः पुत्रो जातः॰ आलस्यसुखाहरणा
योरिति वक्तव्यं॰ अलसस्तुंदपरिमृज इत्युच्यते॰ तुंदपरिमार्ज एवान्यः॰ सुखस्याहर्त्ता शोकापनुदः॰ शोकापनोद एवा
न्यः कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं॰ मूलानि विभुजतीति मूलविभुजो रथः॰ नखमुचानि धनूंषि नखमुचानि

पपदसमासो भवति तथा चाखूनामुत्थानमित्यस्वपदेन विग्रहः कृतः घवजर्थकविधानमित्यत्र स्यग्रहणं कर्तृवर्जिते कारकेपि यथा स्यादिति॥ ॥
तुंदशोकयोः॥ ॥तुंदपरिमृज इति मृजेरजादौ संक्रमे इत्यत्र यासि विधिस्तदादि विधिवत्सिद्धः आस्यग्रहणं पुत्रो जाताद्विपापिग्रहार्थं तेन खर्व दृशिवृद्धि
वेनाजादावके वृद्धिर्भवति। आलस्य इत्यादि आलस्येगम्यमाने सुखोत्पादने च प्रत्ययः इत्यर्थः। तत्र सामर्थ्यादलसे कर्त्तरि सुखस्य चाहर्त्तरि प्रत्ययो भ
वतीत्युक्तं भवति शोकापनोदस्यास्य इति यः संसारानित्यताद्युपदेशेन शोकमेवमकेवलमपनुदतीति न तु सुखमुत्पादयति स शोकापनोदः मूलवि
भुजादिभ्य इति तादर्थ्ये एषा चतुर्थी मूलविभुजादिसिद्ध्यर्थमित्यर्थः आकृतिगणश्चायं तेन महीध्रकुध्रशिरोरुहादि सिद्धं भवति॰॥ ॥ ॥

का॰ पद॰ ६४ काकगुहा इति काके भ्यो गूहितव्या इति कर्मणि कप्रत्यय इष्यते अतो घञर्थे कविधानमित्यत्रेदं द्रष्टव्यं॥ ॥प्रे दाज्ञः॥ ॥ददातेरिति उपलक्षणमेत
त् गामादाग्रहणेष्वविशेष इति सर्वेषामेव दारूपाणां ग्रहणमिष्यते। ज्ञा नातेश्चेति जनेस्तु ल्लोपे नायं निर्देशो न भवति खनो घ च हन्श्च वध इत्यादौ ध
तु निर्देशे अल्लोपस्याकरणात्। प्रेणोपसृष्टादिति। प्रशब्देनोपसर्गेणासंबद्धादित्यर्थः अनुपसर्ग इति चानुवर्तते तेन केवलेन प्रेणोपसृष्टादित्यर्थः तत

॥काकगुहास्तिलाः कौमोदते कुमुदं॥ ॥प्रे दाज्ञः॥ ॥सोपसर्गार्थ आरंभः· रम्बुदः ज्ञोकाः दातेर्ज्ञानातेश्च धा
तोः प्रेणोपसृष्टात् कर्मण्युपपदे कप्रत्ययो भवति· अणोऽपवादः सर्वप्रदः· पथिप्रज्ञः· प्रइति किं गोसंदायः॥ ॥स
मि ख्यः॥ ॥सोपसर्गार्थ आरंभः· संपूर्वात् ख्यातेरेतस्माद्धातोः कर्मण्युपपदे कप्रत्ययो भवति· गांसंचष्टे गोसंख्यः·
पशुसंख्यः॥ ॥गापोष्टक्॥ ॥कर्मण्यनुपसर्ग इत्यनुवर्तते· गायतेः पिबतेश्च धातोः कर्मण्युपपदे अनुपस
र्गे टक् प्रत्ययो भवति· कस्यापवादः· शक्रं गायति शक्रगः· सामगः· शक्रगी· सामगी· सुरासीध्वोः पिबतेरिति वक्त
व्यं· सुरापः· सुरापी सीधुपः सीधुपी· सुरासीध्वोरिति किं· क्षीरपा ब्राह्मणी· पिबतेरिति किं· सुरां पाति इति सुरापः·
अनुपसर्ग इत्येव· शक्रसंगायः· सामसंगायः· बहुलं छन्दसीति वक्तव्यं· या ब्राह्मणी सुरापा भवति नैनां देवाः पति एस॰
लोकं नयंति· या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयंति॥ ३॥ ६४

श्च गोसंप्रदाय इत्यणेव भवति॥ ॥गापोः॥ ॥गापतेरिति गामादाग्रहणेष्वविशेष इति गाङो लुग्विकरणस्यापि ग्रहणं प्राप्तं पिबतिसाहचर्या
त्तु न भवति सामगीति। कटः कित्त्वादातो लोपः टित्त्वान्ङीप् सुरासीध्वोः पिबतेरिति वक्तव्यमित्यत्र पिबतेरिति लुग्विकरणो लुग्विकरणापस्मि
ष्टालभ्यस्यैवार्थस्य कथनमुपपादपरिगणनं तु वाचवतिकमेव· क्षीरपेति स्त्रियामेव विशेषात् स्त्रीलिंगमुदाहृतं॥ ३ ॥ ॥ ॥

॥ ॥हरतेः॥ ॥अच्प्रकरणइति लिंगविशिष्टपरिभाषयैव दृतिग्रहणेन दृतीग्रहणेऽपि सिद्धे दृतीग्रहणं परिभाषाया अनित्यत्वज्ञापनार्थं सू
त्रग्राह एवान्य इति यः सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव भवतीत्यर्थः॥ ॥वयसि च॥ ॥संभाव्यमानं चेति तेनाप्रत्ययिकवचग्रहणेऽव
यसि गम्यमाने कवचहर इति भवतीति भावः॥ ॥आङि॥ ॥पुष्पाद्याहरण इत्यादिना ताच्छील्यमुदाहरणे दर्शयति। स्वाभाविकीति स्वभा

॥हरतेरनुद्यमनेऽच्॥ ॥हरतेर्धातोरनुद्यमनेऽर्थे वर्त्तमानात्कर्मण्युपपदेऽच्प्रत्ययो भवति। अणोऽपवादः। उद्य
मनमुत्क्षेपणं। अंशहरः। रिक्थहरः। अनुद्यमन इति किं। भारहारः। अच्प्रकरणे शक्तिलांगलांकुशयष्टितोमर
घटघटीधनुष्षु ग्रहेरुपसंख्यानं। शक्तिग्रहः। लांगलग्रहः। अंकुशग्रहः। तोमरग्रहः। घटग्रहः। घटीग्रहः। धनु
र्ग्रहः। सूत्रे च धार्यर्थे। सूत्रग्रहः। सूत्रं धारयतीत्यर्थः। सूत्रग्राह एवान्यः॥ ॥वयसि च॥ ॥वयसि गम्यमाने
हरतेर्धातोः कर्मण्युपपदेऽच्प्रत्ययो भवति। अणोऽपवादः। उद्यमनार्थोऽयमारंभः। कालकृता शरीरावस्था यौवना
दिर्वय उच्यते। यदुद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयति तत्रायं विधिः॥ अस्थिहरः श्वा। कवचहरः क्षत्रि
यकुमारः॥ ॥आङि ताच्छील्ये॥ ॥आङ्पूर्वाद्धरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति ताच्छील्ये गम्यमाने। ता
च्छील्यं तत्स्वभावता। पुष्पाहरः। फलाहरः। पुष्पाहरणे स्वाभाविकी फलनिरपेक्षा प्रवृत्तिरस्येत्यर्थः। ताच्छील्य इति
किं। भारमाहरतीति भाराहारः॥ ॥अर्हः॥ ॥अर्ह पूजायां अस्माद्धातोः कर्मण्युपपदेऽच्प्रत्ययो भवति। अ
णोऽपवादः। स्त्रियां विशेषः। पूजार्हा ब्राह्मणी। गंधार्हा माल्यार्हा॥ ॥

वभवा स्वाभाविकी अध्यात्मादिः स्वर्णवीणादिषु पठ्यते जरादिविधिष्व तत्रेष्यते भाष्यकारप्रयोगात्तु द्वारादिकार्याभावः स्वार्थिक स्वाभाविक
शब्दौ भाष्ये प्रयुक्तौ। अन्यादिवर्णा फलानपेक्षेति। कथं पुनः फलमनपेक्ष्य तत्र प्रवर्त्तते न हि स्वभावः पर्यनुयोगमर्हति॥ ॥छ॥ ॥

का॰प॰ ९५

॥स्तंबकर्ण॥ ॥रमेरकर्मकत्वादिति॥ ननु व्याङ्परिभ्यो रमः॥ उपाच्चेत्यत्रोदाहृतं देवदत्तमुपरमतीति एवं मन्यते अनुपसर्ग इति वर्त्तत इति जपेश्च शब्दकर्मकत्वादिति मंत्रं जपतीत्यादौ तत्रैव प्रयोगदर्शनात् कर्म न संभवतीति केवलस्य रमेर्जपेश्च कर्णोपपदत्वात् अकर्मकमिति भावः॥ सूचकः पिशुनः॥ स्तंबेरम इति तत्पुरुषे कृति बहुलमित्यलुक्॥ कर्णेजपिता मशक इति उपांशु शब्दयितेत्यर्थः॥ ॥शमि धातोः॥ ॥धातुमात्रादिति

॥स्तंबकर्णयो रमिजपोः॥ ॥स्तंबकर्ण इत्येतयोः सुबंतयोरुपपदयोर्यथासंख्यं रमिजपोर्भवति॥ रमेरकर्मकत्वाज्जपेः शब्दकर्मकत्वात्कर्म न संभवतीति सुपीत्येतदिहाभिसंबध्यते॥ हस्तिसूचकयोरिति वक्तव्यं॥ स्तंबेरमते स्तंबेरमो हस्ती॥ कर्णे जपतीति कर्णेजपः सूचकः॥ हस्तिसूचकयोरिति किं॥ स्तंबे रंता॥ कर्णेजपिता मशकः॥ ॥शमि धातोः संज्ञायां॥ ॥शम्युपपदे धातुमात्रात्संज्ञायां विषये अच्प्रत्ययो भवति॥ शंकरः॥ शंभवः॥ धातुग्रहणं किं॥ यावता धातोरिति वर्त्तत एव॥ शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थं॥ शंकरा परिव्राजिका॥ शंकरा नाम शकुनिका तच्छी-

रम॰ ९५

मात्रग्रहणेनापवादविषयेपि विधानं भवतीति दर्शयति॥ शंकर इति ऐहिकमामुष्मिकं मोक्षाख्यं च सुखं करोतीति शंकरः॥ धातुग्रहणस्य प्रयोजनं दर्शयन्मात्रग्रहणप्रतिपादितमेवार्थं स्पष्टीकरोति शमि संज्ञायामिति॥ अस्मिन्सूत्र इत्यर्थः॥ असति धातुग्रहणे शमि संज्ञायामित्यस्यावकाशः शंभवः शंवद इति कृञो हेतुताच्छील्य इत्यस्यावकाशः श्राद्धकर इति शंकर इत्यत्रोभयप्रसंगे परत्वाट्टः स्यात् धातुग्रहणसामर्थ्यादजेव भवति कुं नाम्ना उक्तत्वाचार्ये मन्यते एतेः शब्दकर्मण एतद्रूपं ष्ठेरित्यादित्वाट्टकारस्य ककार इति तन्मते धातुग्रहणं विस्पष्टप्रयोजनं॥ ॥४॥ ॥ ॥

॥अधिकरणे॥ ॥पार्श्वादिष्विति। अनधिकरणार्थमिदं तत्रिसहेण स्पर्शयति पार्श्वाभ्यामिति। दिग्धसहशाय इति दिग्धेन सह शेते इत्य चिकृते मयूरव्यंस
कादित्वात्समासः दिग्धसहशयोऽपि पूर्ववत्सकारादिः तत्सोपपदसमासः अत्र मूर्द्धशय इति अवनतो मूर्द्धायस्य अत्र मूर्द्धा अधोमुखः शेत इत्यर्थः गिरौ डश्छन्द
सीतिपदच्छन्दसीत्युच्यते कथं गिरिशमुपचचार प्रत्यहं सा सुकेशी आरोपितं यद्गिरिशेन पश्चादिति निरंकुशाः कवयः अन्ये त्वाहुः इहयोगिरौ शेते गिरि

॥अधिकरणे शेतेः॥ ॥सुप्युपपदे शेतेर्धातोरधिकरणे सुबन्ते उपपदे अच्प्रत्ययो भवति। खे शेते खशयः॥
गर्तशयः। पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यां शेते पार्श्वशयः। उदरशयः। दिग्धसहपूर्वाच्च। दिग्धेन सह शेते दिग्धसहश
यः। उत्तानादिषु कर्तृषु। उत्तानः शेते उत्तानशयः। अवमूर्द्धा शेते अवमूर्द्धशयः। गिरौ डश्छन्दसि। गिरौ शेते गिरिशः।
॥ ॥चरेष्टः॥ ॥अधिकरण इति वर्त्तते। चरेर्धातोरधिकरणे सुबन्ते उपपदे टप्रत्ययो भवति। कुरुषु चरतीति कुरुचरः।
मद्रचरः। कुरुचरी। मद्रचरी। प्रत्ययान्तरकरणं ङीबर्थं॥ ॥भिक्षासेनादायेषु च॥ ॥अनधिकरणार्थ आरम्भः। भि
क्षासेनादायेषु सुबन्तेषूपपदेषु चरेर्धातोष्टप्रत्ययो भवति। भिक्षाचरः। सेनाचरः। आदायचरः॥ ॥छ॥ ॥

लसास्तीति लोमादिषु दर्शनाच्छप्रत्ययः तथा चात्रैव गर्तादिकं तडिलोपे इति न च लोमादिदिग्धपिच्छं दोग्रहणमस्तीति न भाषायामपि गिरिश इति
भवति एवं बहुलानि वृंदशुपाठे प्रयुपयन्तो भवति गिरौ शेत इति गिरावस्त इत्यर्थः॥ ॥भिक्षासेना॥ ॥भिक्षाचर इति चरतिरत्र तत्पूर्वके अर्जने व
र्त्तते चरणेन भिक्षामार्जयतीत्यर्थः। सेनाचर इति सेनां प्रविशनुमतेः। आदायचर इति। आदाय गच्छतीत्यर्थः भक्षयतीति वा कथं सहचरः सहचरी
तिपचादिषु चरटिति पठ्यते सुप्सुपेति समासः॥ ॥छ॥ ॥

का·प८
६६

॥पुरोऽग्रतो॥ ॥अग्रे इत्येतेष्विति एतेन अग्रशब्दस्यैकारान्तत्वं निपात्यत इति दर्शयति एतच्च अग्रेशब्दस्य परनिपातनादेव विज्ञायते अन्यथा अग्रतो घटं तमि
ति पूर्वनिपातः स्यात् किमर्थं पुनरेकारान्तत्वं निपात्यते यावता सप्तम्या अलुकाप्यग्रेसर इति सिद्ध्यत्येव यदा तर्ह्यग्रं सरतीत्यग्रेण सरतीति वा विग्रहस्तेन दा
प्यग्रेसर इत्येव यथा स्यात्· कथं पूर्वं तदग्रसरणादिति कुम्भसारमिति कृत्स्नेष्वेव कूलमिति समर्थनीयं॥ ॥कृञो हेतु॥ ॥करोतेर्धातोरिति। प्रसिद्धतर
त्वाद्धनुबन्धस्याप्यस्यैव ग्रहणं न तु कृञ हिंसायामित्यस्येति भावः आनुलोम्ये च गम्यमान इति। एतेन हेत्वादीति नोपपदानीति दर्शयति। एतच्च शब्दाभि
धानोदीयत्रशानुग्रहणात् कृञो हेत्वादिषु टप्रतिषेधार्थात् ज्ञायते उपपदत्वे हि शब्दोपपदे टप्रत्ययस्याप्राप्यमानत्वादानर्थक्यं स्यात् अतो नैषामुप

॥पुरोऽग्रतोऽग्रेषु सर्त्तेः॥ ॥पुरस् अग्रतस् अग्रे इत्येतेषूपपदेषु सर्त्तेर्धातोष्टप्रत्ययो भवति· पुरः सरतीति पुरःसरः· अ
ग्रतः सरः· अग्रेसरः॥ ॥पूर्वे कर्त्तरि॥ ॥पूर्वशब्दे कर्तृवाचिन्युपपदे सर्त्तेर्धातोष्टप्रत्ययो भवति· पूर्वः सरतीति पूर्व
सरः· कर्त्तरीति किं· पूर्वं देशं सरतीति पूर्वसारः॥ ॥कृञो हेतुताच्छील्यानुलोम्येषु॥ ॥कर्मण्युपपदे करोतेर्धातो
ष्टप्रत्ययो भवति हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने· हेतुरैकान्तिकं कारणं· ताच्छील्यं तत्स्वभावता· आनुलोम्यम
नुकूलता· हेतौ तावत्· शोककरी कन्या· यशस्करी विद्या· कुलकरं धनं· ताच्छील्ये· श्राद्धकरः· अर्थकरः· आनुलोम्ये·
प्रेषकरः· वचनकरः· एतेष्विति किं· कुम्भकारो नगरकारः॥ ५ ॥ ॥

पदत्वं नापि प्रत्ययार्थत्वं कर्त्तरि कृदिति परस्य बाधप्रसंगात् न चासति विरोधे बाधा युक्ता हेतुरैकान्तिकं कारणमिति। एकान्तशब्दो विनयादिषु द्रष्ट
व्यः नियतमव्यभिचारीत्यर्थः एतेन लौकिकस्य हेतोर्ग्रहणमिति दर्शयति न हि केवले ह्यत्र प्रयोजककर्त्तर्यसंभवतीति॥ ॥भावः॥ न तु लौकिके नापि
हेतुना कर्तृविशेषणमयुक्तं अव्यभिचारात् न हि कर्त्तुर्निमित्तत्वमस्ति सत्यं पुनर्हेतुशब्दोपादानादैकान्तिकत्वमाश्रीयते अन्यथा निमित्तमात्र
मुपादीयेत अनुकूलता आराध्यचित्तानुवर्त्तनं। यशस्करी विद्येति। अत। कृकमीसादिनोक्मिर्दनीयस्यमत्वं॥ ॥५॥ ॥छ॥ ॥

राम॰
६६

॥ दिवाविभा॥ ॥ यथायोगमितितत्र दिवाशब्दोऽह्नीति सप्तम्यंतस्यार्थे वर्त्तत इति तस्य कर्मत्वानुपपत्तेः सुपीत्यनेनाभिसंबंधः शेषाणां तु कर्मणीत्यनेन यदि तु दोषा भस्म महद्दिवा भस्मा रात्रिरितिवद्वृत्तिविषये कर्मत्वमप्युपगम्येत तदा दिवाशब्दस्यापि कर्मणीत्यनेन संबंधः सकारस्येति भाःशब्दस्य प्रत्ययसंनियोगे नमस्कारो निपात्यते तस्माद्भास्करः इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः अथवा सकारस्य विसर्जनीयजिह्वामूलीयौ न भवतः कुतः निपातनात् तास्करोतीति सूत्रे सकारोच्चारणमेव निपातनं कारकर इति कर एव काः प्रज्ञादित्वात् स्वार्थे ण अनंतका इति अनंतकशब्देन नञ्समासे ष्येत तद्रूपं भवति

॥ दिवाविभानिशाप्रभाभास्करांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु॥ ॥कर्मणि सुपीति च द्वयमप्यनुवर्त्तते तत्र यथायोगं संबंधः दिवादिषूपपदेषु करोतेष्टः प्रत्ययो भवति अहेत्वाद्यर्थ आरंभः दिवाशब्दोऽधिकरणवचनः सुपीत्यस्य विशेषणं दिवा करोति प्राणिनश्चेष्टायुक्तानिति दिवाकरः विभां करोतीति विभाकरः निशाकरः चित्रकरः क्षेत्रकरः संख्या एककरः द्वि प्रभाकरः भास्करः सकारस्य निपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः कास्करः अंतकरः अनंतकरः आदिकरः बहुकरः नांदीकरः किंकरः लिपिकरः लिबिकरः बलिकरः भक्तिकरः कर्तृकरः चित्रकरः क्षेत्रकरः संख्या एककरः द्विकरः त्रिकरः जंघाकरः बाहुकरः यत्करः तत्करः धनुष्करः अरुष्करः किंयत्तद्बहुषु कृञोज्विधानं किंकरा यत्
तत्करा बहुकरा अथवा अजादिषु पाठः करिष्यते॥ ॥

स्वरे हि दोषः स्यात् सति शिष्टोऽप्ययं स्वरः यदं सक्तिस्वरः प्रसज्येत इष्यते ह्याति कारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं बहुकरः इति बहुशब्दो वैपुल्यवचनः संख्यावचनस्य तु संख्याग्रहणेनैव सिद्धं लिपिलिपि शब्दौ पर्यायौ अहस्करः इति अहन् शब्दे सुपीति रेफः पूर्ववत्सत्वं धनुष्करः अरुष्करः इति नित्यं समासे तु तरपरस्य सेति षत्वं किंयत्तद्बहुषु कृञोज्विधानमिति वार्त्तिकं नसूत्रस्य बाधितत्वात् स्याभावाद्वादिषु समत्र किंकरी त्वसाधुरित्याहुः क्वचिद्दृष्टः अथवा पचादिषु पाठः करिष्यत इति तत्रायमर्थः इह किमादिभ्यष्टाप्यमनीयपचादिष्वेव किंयत्तद्बहुषु

का॰पद॰ ६७

॥कर्मणि॥ ॥कर्मणीतिस्वरूपग्रहणमिति॰ अनुवृत्तेनकर्मणीत्यनेनविशेषणात्॰ कर्मनिर्देशइतिकर्मनिपातस्यनिवृत्त्यर्थमयंभृत्यादि
ष्वप्यस्मिन्सर्थः॥ ॥स्तंबशकृतोः॥ ॥स्तंबकरितिनिलात्कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदस्याद्युदात्तत्वंभवति॥ ॥हरतेः॥ ॥पशोकर्तरीतिए
तेनप्रत्ययार्थस्यकर्तुः पशुर्विशेषणं नतुतस्यवाधकइतिदर्शयति धातोर्हिप्रत्ययविधानात्तदर्थस्यपेनसंबंधस्तत्रयोग्यप्रत्ययोभवितुमर्हतियथा

॥कर्मणिभृतौ॥ कर्मणीतिस्वरूपग्रहणं॰ कर्मशब्दउपपदेकर्मवाचिनिकरोतेष्टप्रत्ययोभवतिभृतौगम्यमानायां॰
भृतिर्वेतनंकर्मनिर्वेशः॰ कर्मकरोतीतिकर्मकरः॰ भृत्यइतिकिं कर्मकारः॥ ॥नशब्दश्लोककलहगाथावैरचाटुसूत्र
मंत्रपदेषु॥ ॥शब्दादिषूपपदेषुकरोतेष्टप्रत्ययोनभवति॰ हेत्वादिषुप्राप्तः प्रतिषिध्यते॰ शब्दकारः॰ श्लोककारः॰
कलहकारः॰ गाथाकारः॰ वैरकारः॰ चाटुकारः॰ सूत्रकारः॰ मंत्रकारः॰ पदकारः॥ ॥स्तंबशकृतोरिन्॥ ॥स्तंबश
कृतइत्येतयोः कर्मणोरुपपदयोः इन्प्रत्ययोभवति॰ व्रीहिवत्सयोरितिवक्तव्यं॰ स्तंबकरिर्व्रीहिः॰ शकृत्करिर्वत्सः॰
व्रीहिवत्सयोरितिकिं॰ स्तंबकारः॥ शकृत्कारः॥ ॥हरतेर्दृतिनाथयोःपशौ॥ ॥दृतिनाथइत्येतयोः कर्मणो
रुपपदयोः इन्प्रत्ययोभवति॰ व्रीहिवत्सयोरितिवक्तव्यं॰ स्तंबकरिर्व्रीहिः॰ शकृत्करिर्वत्सः॰ व्रीहिवत्सयोरितिकिं
स्तंबकारः॥ शकृत्कारः॥ ॥हरतेर्दृतेःपशौकर्तरिइन्प्रत्ययोभवति॰ दृतिहरिःपशुः॰ पशाविति किं दृतिहारो राम॰ ६७
नाथहारः॥ ॥६॥ ॥

तदर्थस्यचक्रियायाःसाधनेनसंबंधः पशुशब्दस्तुचतुर्थ्याज्जातीयंवस्तुस्वरूपेणावच्छेदेनशक्तिमद्रूपेणानंतरांशक्तिरूपेणैतिनियमश्चार्थः स्वरूपेणप्रत्य
यार्थोभवितुमर्हतीतियुक्तमुक्तं पशौकर्तरीति एवं सर्वत्रप्रत्ययार्थविशेषणोऽद्रष्टव्यं ६॥ ॥७॥ ॥८॥ ॥९॥ ॥

॥ ॥फलेग्रहिः॥ ॥उपपदस्यैकारान्तत्वमिति छन्दस्यकारान्तत्वमपि दृश्यते यो वनस्पतीनां फलग्रहिरिति सकुक्षिंभरिश्चकारेण समुच्चेतव्यः
॥ ॥छन्दसि॥ ॥वनषणसंभक्तौ विजिगाणोसहयरितयोर्भावाद्द्विकयोरेवग्रहणं न तु वनु याचने षणु दाने इति तनादिकयोरिति भावः अत्र सा
हचर्यमेव हेतुः निरनुबन्धकत्वं च व्रश्चवनिमिनिविप्रत्ययनुतिसत्रं वनतीति विवक्षायामिन प्रत्ययः तदन्ताद्द्वितीयैकवचनं गोषणिमिति। गां सनती
ति विग्रहः पथिरक्षीति यथा मत्स्येत इति विग्रहः हविर्मथीति हविर्मथयः तेषां हविर्मथीनां॥ ॥एजेः खश्॥ ॥एपन्तादिति एजत्वरूपमिकानिर्दे

॥फलेग्रहिरात्मंभरिश्च॥ ॥फलेग्रहिः आत्मंभरी इत्येतौ शब्दौ निपात्येते· उपपदस्य एकारान्तत्वं इन प्रत्ययश्च ग्रहेर्निपा
त्यते· फलानि गृह्णातीति फलेग्रहिर्वृक्षः आत्मनश्चावस्य पदस्य मुमागमः इन् प्रत्ययश्च भृञो निपात्यते· आत्मानं बि
भर्ति आत्मंभरिः· अनुक्तसमुच्चयार्थश्चकारः कुक्षिंभरिः उदरंभरिः॥ ॥छन्दसि वनसनरक्षिमथां॥ ॥वन षण संभ
क्तौ· रक्ष पालने· मथ विलोडने· एतेभ्यः कर्मण्युपपदे छन्दसि विषये इन् प्रत्ययो भवति· ब्रह्मवनिं त्वा क्षत्रवनिं· गो =
सनिं· पथिरक्षी स्याम तनो· हविर्मथीनां·॥ ॥एजेः खश्॥ ॥एजृ कंपने· इत्यस्मात् ण्यंतात् कर्मण्युपपदे खश् प्र =
त्ययो भवति· खकारो मुमर्थः· शकारः सार्वधातुकसंज्ञार्थः· अंगमेजयति अंगमेजयः· जनमेजयः· खश्प्रकरणे वा छि
तशुनीतिलशर्द्धेषु अजधेट्तुदजहातीनामुपसंख्यानं· वातमजा मृगाः· शुनिंधयः· तिलंतुदः। शर्द्धंजहा माषा

ज्ञो न भवति खशः शित्करणात् तत्र सार्वधातुकत्वे सति शप् अभ्यासादिति न चैजेः प्रकृत्यंतस्य शपि सत्यसति वा विशेषोऽस्ति न चैवमिहार्थत्वे संभव
ति केवलोत्तरार्थत्वं पुक्तं खित्करणं मुमर्थमिति अरुर्द्विषदजन्तस्येति खित्कार्योपलक्षणमेतत् शुनिंधयः नाडिंधयः नासिकंधय इति स्तनंधय
यस्येति इस्वत्वमपि प्रयोजनं शकारः सार्वधातुकार्थ इति सार्वधातुकसंज्ञार्थ इत्यर्थः गातशुनी त्यादि वाता दिषु यथा संख्यमुपपदेषु अजादि
भ्यो धातुभ्यः खश्प्रत्ययो भवतीति शर्द्धंजहा इति ओहाक् त्यागे जुहोत्यादित्वाच्छपः श्लौ द्विर्वचनेऽभ्यासस्य पोरन्तरस्याकारलोपः॥ ॥ ॥

का॰प॰
९९

नासिका॥ ॥नासिकंधम इति याघ्रादिसूत्रेण धमादेशः तच्चेतरस्मिन्नायथासंख्याभावहेतुमाहतच्चेतन यथासंख्याभावलक्षणं कार्यं स्यते नचमास्वात्त्वरणं मूलत्वेन सूत्रकारस्याप्यत्र किंचिदस्तिप्रेतमिसेतावत्तत्वर्णते तेनैतन्न नोत्स्नीयंउत्तसूत्रवत्समसेकमभिसंबंधः कस्मान्नभवति विपर्ययोवा कस्मान्नभवनीतिस्तनंधयतीति अत्रैव ङी विष्यतेनान्यत्रेलाकुः॥ ॥नाडीमुष्ट्योः॥ ॥ घ्वरिंधमः खरिंधमश्च नि घरीच्चटः खरीग

॥नासिकास्तनयोर्ध्माधेटोः॥ ॥नासिकास्तनयोः कर्मण्योरुपपदयोर्ध्माधेटोर्धात्वोः खश् प्रत्ययो भवति॰ यथासंख्यमत्रनेष्यते॰ स्तने धेटः॰ स्तनंधयः॰ नासिकायां तु ध्मश्च धेटश्च॰ नासिकंधमः॰ नासिकंधयः॰ तच्चेतन्नासिकास्तनयोर्भिन्नविभागात्समभिचारविज्ञानात्त्वत्त्वात्सपूर्वनिपातनात्लभ्यते॰ धेटष्टित्वात् स्त्रियां ङीप्प्रत्ययो भवति॰ स्तनंधयी॥ ॥नाडीमुष्ट्योश्च॥ ॥नाडीमुष्टिरित्येतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश्प्रत्ययो भवति अत्रापि ध्मातस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नं तेन संख्यातानुदेशो न भवति नाडिंधमः॰ मुष्टिंधमः॰ नाडिंधयः॰ मुष्टिंधयः॰ अनुक्तसमुच्चयार्थश्चकारः॰ घटिंधमः॰ घटिंधयः॰ खरिंधमः॰ खरिंधयः॰ वातंधमः॰ वातंधयः॥ ॥उदिकूले रुजिवहोः॥ ॥रुजो भंगे॰ वह प्रापणे॰ एताभ्यामुत्पूर्वाभ्यां कूले कर्मण्युपपदे खश्प्रत्ययो भवति॰ कूलमुद्रुजतीति कूलमुद्रुजो रथः॰ कूलमुद्वहः॥ ॥वहाभ्रे लिहः॥ ॥ वहाभ्र इत्येतयोः कर्मणोरुपपदयोः लिहेर्धातोः खश्प्रत्ययो भवति॰ वहं लेढीति वहंलिहो गौः॰ अभ्रंलिहो वायुः॥७॥ रा॰स॰
९९

ङीजातिलक्षणो ङीप्रत्ययोरित्यस्येयंतिस्त्वयरिमाणावचनःवावरादेन दृष्टः॥ ॥उदिकूले॥ ॥यत्र प्रसेकमुपपदत्वमिच्छतितत्र समुदायात्सप्तमीमुच्चारयति यथा नाडीमुष्ट्योरिति इह तु विपर्ययः कृतः तस्मादुदीति सप्तमी कूल इति त्वर्थनिर्देशे सेनोपपदसंज्ञायां लिंगं तत्र च तेप्राग्धातोरिति उच्छब्दस्य धातोः प्राक्प्रयोगः ततः पूर्वः कूलशब्दः तदेतद्दर्शितं उत्पूर्वाभ्यां कूले कर्मण्युपपद इति॥ ॥७॥ ॥ ॥

॥३३॥३२॥

।। ।।परिमाणे।। ।।परिमाणशब्दः काष्ठादिनिर्मितप्रस्थादौ वर्त्तते न तस्य विक्लेदद्रव्यवाचिनाम्पचिना पचिना कर्मत्वेनान्वयः अतो न स्वरूपग्रहणं
किन्तर्हि तद्विशेषाः प्रस्थादयो गृह्यन्ते तेषां च परिमाणोपमेये व्रीह्यादौ च वर्त्तते तत्र परिमाणनिष्ठानां न पचिनान्वय इति परिमेयनिष्ठे धातुप्रत्ययः नेति
हि परिमाणवाचित्वं। न परिमाणाभिधायिनो परिमेयप्रस्थादिशब्दस्य प्रवृत्तेः।। ।।मितनखे च।। ।।नखं पचतीति पचिस्त्रतायववचनः।। ।।विध्वरु
षोः।। अरुन्तुद इति अरुर्द्विषदजन्तस्य मुमिति चकारात्सरोर्मुमहंयोगान्तस्य लोपः।। ।।असूर्य।। ।।असूर्यम्पश्या इति पाठे दृशि तत्र णप्रत्ययदेशः

।।परिमाणे पचः।। ।।परिमाणं प्रस्थादि तस्मिन् कर्मण्युपपदे पचेः खश्प्रत्ययो भवति। प्रस्थं पचति प्रस्थंपचा स्थाली।
द्रोणंपचः खारिंपचः कटाहः।। ।।मितनखे च।। ।।मितनखयोः कर्मणोरुपपदयोः पचेः खश्प्रत्ययो भवति। अपि
मितंपचा ब्राह्मणी। नखंपचा यवागूः।। ।।विध्वरुषोस्तुदः।। ।।विध्वरुस् इत्येतयोः कर्म
ण्युपपदयोः तुदेर्धातोः खश्प्रत्ययो भवति। विधुंतुदः अरुंतुदः।। ।।असूर्यललाटयोर्दृशितपोः।। ।।असूर्यललाट
योरुपपदयोः यथासंख्यं दृशितपोर्धात्वोः खश्प्रत्ययो भवति। असूर्यम्पश्या राजदाराः। ललाटंतपः आदि
त्यः असूर्य इति गम्यमर्थोऽसमासोऽयं दृशिना नञः संबन्धात्। सूर्यं न पश्यन्तीति। गुप्तिपरं चैतत् एवं नाम गुप्ता यत्परिहा
र्यं दर्शनमपि सूर्यं न पश्यन्तीति।। ।।उग्रंपश्येरम्मदपाणिंधमाश्च।। ।।उग्रंपश्य इरम्मद पाणिंधम इत्येते शब्दा निपात्य
न्ते। उग्रं पश्यतीति सुग्रं पश्यः। इरया माद्यतीति इरम्मदः पाणयो धमायन्ते येष्विति पाणिंधमाः पन्थानः।। ।।छ।। ।।

गुप्तिपरं चैतदिति यदेतद्वचनं असूर्यम्पश्या राजदारा इति एतद्गुप्तिप्रधानं तेन सत्यपि सूर्यदर्शनप्रयोगो न विरुध्यत इति भावः गुप्तिपरत्वमेव प्रकटयति ए
वं नामेति।। ।।उग्रंपश्य।। ।।उग्रंपश्यतीति क्रियाविशेषणमेतत्।। इरम्मद इति इरमदो हर्षो दीर्घाद्यभावो निपातनात् इरा उदकं
पाणिंधमाः पन्थान इति ते पुनर्ये षु गच्छद्भिः सर्पादिभयनिवारणाय पाणयो ध्मायन्ते।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।

॥प्रियवशे॥ ॥चकारः खचिदुक्तस्त इति विशेषणार्थ इति वेदितव्यः सुकमाने एजेः खश् अंगमेजयः जनमेजयः अत्रापि प्राप्नोति एकानुबंधकग्रहणे
न मनुबंधकस्येत्यत्र न भविष्यति इह तर्हि कुलात् खः कुलीनः यस्येति लोपाय निवृत्तये द्रूपः स्यात् तत्र धातुप्रत्ययस्य ग्रहणं तस्य करणा साहचर्यात् न सर्व
प्रचिंतप्रयोजनं नश्च कारः मत्स्यपान रुकरणा मुकमार्थमिति द्विषंतपः स्तन्धकः खणि लोपो यथा स्यात् तोशायमा भूदिति पघेवमुक्तं कैव कर्त्तव्यं इह करणे किं प्रयो
अन्येभ्योपि भवतीति ज्ञापनार्थं तन्नामः सुप्युपसंख्यानमिति न वक्तव्यं भवति मितंगम इति अ सं ज्ञार्थमिदं ज्ञायां तुरागमश्चेति व समासेनैव सिद्धं॥
द्विषत्परयोः॥ ॥द्विषंतप इति मुम्मिसंयोगांतलोपः द्विषत्कस्य को निर्देश इति नत्रैकेन द्विषच्छ इति विशेष्यते तकारेणेतो यो द्विषच्छ इति सोत्र लाक्षिर्देः

॥प्रियवशे वदः खच्॥ ॥प्रियवश इत्येतयोः कर्मण्युपपदयोर्वदेर्धातोः खच्प्रत्ययो भवति॰ प्रियंवद इति प्रियंवदः वशंवदः चका
रः खचिदुक्तस्त इति विशेषणार्थः खकारो मुमर्थः मत्स्यपाने तारुकरणा मुक्तार्थं खच्प्रकरणे गमेः सुप्युपसंख्यानं॰ मतंगमो हस्ती॰ मे
तंगमा हस्तिनी॰ विहायसो विह च॰ विहायसा गच्छतीति विहंगमः॥ खच्च डिद्वा वक्तव्यः विहगः विहंगमः॰ उवा विहायसो विहादे
शो वक्तव्यः विहगः॥ ॥द्विषत्परयोस्तापेः॥ ॥द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्धातोः खच्प्रत्ययो भवति॰ तपदाहे चु
रादिः तपसंतापे भूवादिः द्वयोरपि ग्रहणं॰ द्विषंतं तापयति द्विषंतपः परंतपः द्विषत्परयोरिति द्वितकारको निर्देशः तेन स्त्रियां
न भवति॰ द्विषतीं तापयतीति द्विषतीतापः॥ ॥वाचि यमो व्रते॥ ॥वाक्शब्दे कर्मण्युपपदे यमेर्धातोः खच्प्रत्ययो भवति
व्रते गम्यमाने॰ व्रत इति शास्त्रितो नियम उच्यते वाचंयम आस्ते॰ व्रत इति किं॰ वाग्यामः॥ ॥८॥ ॥

णस्य विशेषणस्य परनिपातः तेन स्त्रियां न भवतीति॰ अन्यथा लिंगविशिष्टस्य परिभाषया स्यादेव प्रसंग इति भावः॥ ॥वाचि यमः॥ ॥शास्त्रित इति शा
स्त्रशब्दाद्विधाने धातुर्थेणि च तदंतात्कर्मणि क्तः शास्त्रे विहितः शास्त्रेणावा शास्त्रितः नियम इति संकल्पविशेषः वाचंयम इति वाचंयमपुरंदरौ चेति पू
र्वपदस्यामंतत्वं तत एव तद्धि निपातनात् प्रयोभविष्यति व्रतादन्यत्रापि तद्धि प्राप्नोतीति तत्रैव व्रतग्रहणं करिष्यते वाचंयमो व्रते पुरंदरश्चेति तदेतच्चिंत्य प्रयो
जनं एतेन पुरंदरो व्याख्यातः वाग्याम इति यो शब्दादिना वाचं यच्छति तत्राणेव भवति॥ ॥८॥ ॥९॥ ॥ ॥ ॥

॥ पूःसर्वयोः॥ ॥ दारिदारणात् स्वस्य प्रहरणां न द्भयेद् उः आदरे स्तत पो ॥ सुपदेशाः अर्थं संज्ञार्थे सहि ग्रहणां संज्ञायांतु वक्ष्यति । सर्वंसहो राजेति । सर्वं
संपारयितुं समर्थ इत्यर्थः॥ ॥ मेघर्त्ति॥ ॥ करोतेरिति कृणोतेस्तु पूर्ववद्ग्रहणां शिङ्कं इत्यपि छंदसि दृष्यते शिवएकोध्येयः शिवंकर इति
॥ ॥ आशिते ॥ ॥ अत्र सुपीत्युपतिष्ठते इतिन तु कर्मणीति भवतेरकर्मकत्वात सोपस्थानस्यार्थात् चप्रत्यवान भवितमम नभिधानादिति भा
वः आशितशब्देऽपि मधाभोजनं उक्तमासङ्. पूर्वादनिवृत्तितेकर्मणि कर्त्रीति क्तप्रत्ययो नोपपद्यते आशितः कर्त्तेति यस्मादुदात्तत्वविधानात्तेय

॥ पूःसर्वयोर्दारिसहोः॥ ॥ पुर सर्व इत्येतयोः कर्मण्युपपदयोर्यथासंख्यं दारिसहोर्धात्वोः खच् प्रत्ययो भवति· पुरंदरय
ति पुरंदरः सर्वंसहो राजा भगवद्दारेरिति वक्तव्यं· भगंदरः॥ ४१॥ सर्वकूलाभ्रकरीषेषु कषः॥ सर्व कूल अभ्र करीष इत्येतेषु
कर्मस्वपपदेषु कषेर्धातोः खच् प्रत्ययो भवति· सर्वंकषति सर्वंकषः खलः· कूलंकषा नदी· अभ्रंकषो गिरिः· करीषंक
षा वात्या॥ ४२॥ मेघर्त्तिभयेषु कृञः॥ ॥ मेघ ऋति भय इत्येतेषु कर्मसूपपदेषु कृञः खच् प्रत्ययो भवति· मेघंकरः· ऋतिं
करः· भयंकरः· उपपदविधौ भयादिग्रहणात् तदन्तविधिं प्रयोजयति· अभयंकरः॥ ४३॥ क्षेमप्रियमद्रेऽण् च॥ ॥ क्षेम प्रिय मद्र
इत्येतेषु कर्मस्पपदेषु करोतेरण् प्रत्ययो भवति चकारात् खच्च क्षेमकारः· क्षेमंकरः· प्रियकारः· प्रियंकरः· मद्रकारः· मद्रंकरः·
वेति वक्तव्ये अण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थं॥ ४४॥ आशिते भुवः करणभावयोः॥ ॥ अत्र सुपीत्युपतिष्ठते· आशित
शब्दे सुबन्त उपपदे भवतेर्धातोः करणे भावे चार्थे खच् प्रत्ययो भवति· आशितो भवत्यनेनन्नम् आशितंभव ओदनः· भावे०
आशितस्य भवनम् आशितंभवं वर्त्तते·॥ ४५॥ ॥

स्तु धोत्वगतिप्रत्यवसानार्थेभ्य इति भावकर्माधिकरणेषु क्तः न तदंतो गृह्यते अनभिधानादित्याहुः॥ अन्ये त्वशोर्ण्यन्तात् अयोऽपि कर्मणि क्तप्रत्यये
कृतेय आशितशब्दः स गृह्यते एवमाशितः कर्त्तेति यस्मादुदात्तत्वं तत्राधिप्रयोज्य एव भूतपूर्वगत्या कर्त्ता जीनेगतिबुद्धिप्रत्यवसानार्थेति अणौ क
र्तुर्णौ कर्मसंज्ञाविधानात् तथा च कृषन्निष्फाल आशितंकरणोऽन्नीति आघुदात्तस्याग्रहो न दृश्यते कर्त्रग्रहणं तु तत्र भावनिवृत्त्यर्थमिति॥ आशि
तंभाव ओदन इति यावन् नोदनेनातिथ्यादिराशितो भवति सत्त्ववमुच्यते॥ ॥

॥संज्ञायां॥ ॥संज्ञावशादिलादिशत्रुंतपत्स्वादौयत्रकर्मार्थानुगमस्तत्र कर्मणीतिसंबध्यतेयत्रतुनरथंतरमित्यादौतत्रसुपीति। अरिंदमइति। अरंतमो वितरार्थेऽरिः सकर्मकोभवति॥ ॥गमश्च॥ ॥गमश्च॥ ॥योगविभागउत्तरार्थइतिउत्तरत्रगमेरेवानुवृत्तिर्यथास्यान्मृतॄप्रभृतीनांमाभू त्॥ ॥अंतात्यंत॥ ॥अनुबंधकरणसामर्थ्यादितिअवणार्थत्वड्डकारेणभवतिपादस्यपदाज्यातिगोपहातस्वितिकृतटिलोपस्यडप्रसंगात

॥संज्ञायांभृतॄवृजिधारिसहितपिदमः॥ ॥कर्मणीतिचसुपीतिचप्रकृतंसंज्ञावशाद्यथासंभवंसंबध्यते·भृ·तॄ·वृ·जि·धारि· सहि·तपि·दमइत्येतेभ्योधातुभ्यःसंज्ञायांविषयेखच्प्रत्ययोभवति·विश्वंभरा·वसुंधरा·रथंतरंसाम·पतिंवराकन्या·शत्रुंजयोह स्ती·युगंधरःपर्वतः·शत्रुंसहः·शत्रुंतपः·अरिंदमः·संज्ञायामितिकिं·कुटुंबंबिभर्तीतिकुटुंबभारः॥४६॥ ॥गमश्च॥॥ गमेर्धातोःसुप्युपपदेसंज्ञायांविषयेखच्प्रत्ययोभवति·सुतंगमोनामयस्यपुत्रः·सौतंगमिः। योगविभागउत्तरार्थः॥४७॥ ॥अंतात्यंताध्वदूरपारसर्वानंतेषुडः॥ ॥संज्ञायामितिनानुवर्त्तते·अंत·अत्यंत·अध्वन्·दूर·पार·सर्व·अनंत·इत्येतेषुकर्मसूपप देषुगमेर्डप्रत्ययोभवति। अंतगः·अत्यंतगः·अध्वगः·दूरगः·पारगः·सर्वगः। अनंतगः। डकारष्टिलोपार्थः·डित्यभस्या प्यनुबंधकरणसामर्थ्यादिति·डप्रकरणेसर्वत्रपन्नपोरुपसंख्यानं·सर्वत्रगः·पन्नगः·उरसोलोपश्च·उरसागच्छतीत्युरगः· सुदुरोरधिकरणे·सुखेनगच्छत्यस्मिन्निति सुगः·दुर्गः·निरोदेशे·निर्गोदेशः। अपरआह·डप्रकरणेऽन्येष्वपिदृश्यतइति· स्त्र्यगारगः·ग्रामगः·गुरुतल्पगः॥४८॥ ७ ॥ ॥

स्यनिर्देशात्·अत्यंतानंतग्रहणमनर्थकंअंतशब्दोत्रगृह्यतेतेनकर्मणोविशेषणात्तदंतविधिर्भविष्यति उपपदविधौतुनसर्वत्रतदंतविधिः उपपदविधौतदादिग्रहणमितिनियमात्पन्नंपतितंमथागच्छतीतिपन्नगः सुदुरोरधिकरणइतिकर्मणिखल्वेवभवतिसुगमोदुर्गमइति। अन्यत्रापिदृश्यतइति। एवंचसूत्रमपिप्रपंचार्थं॥ ॥७॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥

॥आशिषि॥ ॥दारावितिदारुशब्दइत्यर्थः शद्रुयेक्षयाएुल्लिंगत्तादविधानार्थवचनमप्यकर्मण्यणित्येवसिद्धः अंतग्रहणं विस्पष्टार्थमलोत्पसे
त्येवसिद्धे॥ ॥कुमारः॥ ॥सुप्यजातावितिसिद्धेः ताच्छील्यार्थमिदंवचनंशिरसः शीर्षभावार्थंच॥ ॥लक्षणे॥ ॥लक्षणावतीतिएतेनाई श्रा

॥आशिषिहनः॥ ॥डइतिवर्त्तते· आशिषिगम्यमानायांहंतेर्धातोः कर्मण्युपपदेडप्रत्ययोभवति· तिमिंघ्नात्ति
मिहः· शत्रुघ्नः· आशिषीतिकिं· शत्रुघातः· दाराआहनोणंतस्यचटः संज्ञायां· दाराबुपपदेआङ्पूर्वाद्धंतेरणप्रत्ययोभ
वतिअंतस्यचटकारआदेशोभवतिसंज्ञायांविषये। दारुआहंतिदार्वाघाटः· चार्वाघाटः· आङ्पूर्वाद्धंतेर्दारावुपपदेअ
ण अंतस्यचटकारादेशः।चार्वाघाटः।चार्वाघातः। कर्मणिसमिच· कर्मण्युपपदेसंपूर्वाद्धंतेरणप्रत्ययः अंतस्यचवा
टकारादेशः।वर्णान्संहंतिवर्णसंघाटः वर्णसंघातः पदसंघाटः पदसंघातः॥ ॥अपेक्लेशतमसोः॥ ॥अपपूर्वाद्धंतेः
क्लेशतमसोः कर्मणोरुपपदयोर्डप्रत्ययोभवति· क्लेशापहः पुत्रः तमोपहः सूर्यः अनाशीरर्थआरंभः॥ ॥कुमा
रशीर्षयोर्णिनिः॥ ॥कुमारशीर्षयोः कर्मणोरुपपदयोर्हंतेर्धातोर्णिनिप्रत्ययोभवति· कुमारघाती· शीर्षघाती·
निपातनाच्छिरसः शीर्षभावः॥ ॥लक्षणेजायापत्योष्टक्॥ ॥हंतेर्धातोर्जायापत्योः कर्मणोरुपपदयोर्लक्षणे
वतिकर्त्तरिटक्प्रत्ययोभवति· जायाघ्नो ब्राह्मणः पतिघ्नी वृषली· अथवालक्षणेघोत्सेटक्प्रत्ययः॥ ॥छ॥ ॥

घचप्रत्ययणंतोलक्षणात्संबन्धइतिदर्शयतिएतच्चसूत्रारंभादेवावसीयतेकेवलेहिलक्षणेउत्तरेणैवसिद्धःप्रत्ययः।जायाघ्नोब्राह्मणइत्यस्मिंस्ति
लकालकादिजायामरणलिंगमस्तिसतांहंतीतिगौणोव्यवहारः एतेनपतिघ्नीव्याख्याता आगमहनेत्युपधालोपः टित्वान्ङीप्॥ ॥छ॥ ॥

का॰ प्र॰
७१

॥अमनुष्य॥ ॥अमनुष्यशब्दो रक्षः पिशाचादिषु रूढ इति पूर्वमुक्तमिह तु मनुष्यादन्यः सर्व एव गृह्यते। ननु यथा पूर्वसूत्रे लक्षणग्रहणं
प्रत्ययार्थस्य कर्तुर्विशेषणं एवमिहाप्यमनुष्यग्रहणं भविष्यतीति नार्थः कर्तृग्रहणेन अमनुष्यस्तु अमानेउपपदत्वमपि विज्ञायेत तस्मा
त्कर्तृग्रहणं रूढजपशब्दो मूलविभुजादिषु द्रष्टव्यः॥ ॥शक्तौ हस्ति॥ ॥विषेण हस्तिनं हन्तीति। न चशाप्यशक्तस्य कर्तृत्वानुपपत्तेरस्येव

॥अमनुष्यकर्तृके च॥ ॥अमनुष्यकर्तृके धात्वर्थे वर्तमानाद्धन्तेर्हन्तेः कर्मण्युपपदे टक्प्रत्ययो भवति। जायाघ्न
स्तिलकालकः पतिघ्नी पाणिरेखा। वातघ्नं तैलं। श्लेष्मघ्नं मधु। अमनुष्यकर्तृके इति किं आखुघातः शूद्रः इह कस्मा
न्न भवति। चौरघातो हस्ती कृत्यल्युटो बहुलमिति बहुलवचनाद्दण् भविष्यति॥ ॥शक्तौ हस्तिकवाटयोः॥ ॥
शक्तौ गम्यमानायां हस्तिकवाटयोः कर्मणोरुपपदयोर्हन्तेष्टक्प्रत्ययो भवति। मनुष्यकर्तृकार्थोयमारम्भः
हस्तिनं हन्तुं समर्थः हस्तिघ्नो मनुष्यः। कवाटघ्नश्चोरः। शक्ताविति किं विषेण हस्तिनं हन्ति हस्तिघातः॥ ॥पाणि
घताडघौ शिल्पिनि॥ ॥पाणिघताडघशब्दौ निपात्येते शिल्पिनि कर्तरि वाच्ये। पाणिताडशब्दयोः कर्मणो
रुपपदयोर्हन्तेष्टक्प्रत्ययो भवति तस्मिंश्च टिलोपो घत्वं च निपात्यते। पाणिघः ताडघः शिल्पिनीति किं पाणि
घातः ताडघातः राजघ उपसंख्यानं। राजानं हन्तीति राजघः॥ १० ॥ ॥

राम॰
७१

शक्तिः सत्यं शक्तिग्रहणं सामर्थ्यात्सकर्षविज्ञानादन्यनिरपेक्षस्वबलेनैव हन्तुं या शक्तिः सा गृह्यते तद्दर्शयति हस्तिनं हन्तुं समर्थः हस्तिघ्नो मनु
ष्य इति एवं च हस्तिनं हन्तुमात्रावधीन सामर्थ्ययोगाद्धस्तिघ्नस्तु अनेकं याद्यति प्रविशन्त इति कपाटशब्दं व्युत्पादयति कवाटमिति तु प्रसिद्धः
तत्र तः पचाद्यच् कवडू चौष्ण्या इति योगविभागात्को कवाटेशः॥ १०॥ ॥

॥ ॥ आढ्यसुभग॥ ॥ आढ्यादिष्विति। अनेनाढ्यादीनामुपपदत्वं दर्शयति। करणे कारक इत्यनेनापि करणस्य प्रत्ययार्थत्वं अर्थेवं कस्मान्न विज्ञा
यते करणे उपपदे आढ्यादिषु कर्तृष्विति उच्यते अर्थे च्व्यर्थेष्वच्वाविति वचनात् आढ्यादिशब्दाः स्वरूपप्रधानाः न च शब्दानां कर्तृत्वमुपपद्यते तेन तु कर
णवाचिनः करोतिनिमित्तमाढ्यशब्दः तत्र ज्ञातस्यापि कर्तृत्वं संभवति एवं तर्हि आरभ्यमाणानन्तर्यान्नाश्रीयते च्व्यर्थेष्वच्वाविति तत्पुरुषो बहुव्रीहिर्वा अच्व्यन्त
इत्यर्थः प्रत्येकं संबध्यते एकवचनं। कथं पुनश्च्व्यर्था अच्व्यन्ता भवन्तीत्याह च्वेर्विकल्पेन विधानादिति। आढ्यंकरणमिति ख्युनः खकारो मुमर्थः लिं
गविशिष्टपरिभाषया स्त्रीलिङ्गेष्वाढ्यादिषूपपदेषु ङ्याद्यर्थश्च नकारः स्वरार्थः योरनादेशः अभ्यञ्जयन्तीत्यर्थ इति। अनेकार्थत्वाद्धातूनां तेनाभ्य

॥ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्॥ ॥ आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु
करोतेः करणे ख्युन् प्रत्ययो भवति। च्वेर्विकल्पेन विधानात् द्विविधाश्च्व्यर्थाः च्व्यन्ता अच्व्यन्ताश्च तत्र च्व्यन्ताः पर्युदस्यन्ते। अना
ढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणं। सुभगंकरणं। स्थूलंकरणं। पलितंकरणं। नग्नंकरणं। अन्धंकरणं। प्रियंकरणं। च्व्यर्थेष्वि
ति किं आढ्यं तैलेन कुर्वन्ति। आढ्यमभ्यञ्जयन्तीत्यर्थः प्रकृतेरविवक्षायामभूततद्भावेऽपि प्रत्युदाहरणं भवति। अच्वावि
ति किं आढ्यीकुर्वन्त्यनेन। ननु च ख्युना मुक्ते ल्युडेव भवति तत्र ल्युटः ख्युनश्च विशेषो नास्ति किं प्रतिषेधेन। एवं तर्हि प्रति
षेधसामर्थ्यात् ख्युनि सति ल्युडपि न भवति। तेन ल्युडप्यत्र समर्थ्यतः प्रतिषेधः॥ ॥

गनाढ्यः सन्नाढ्यः क्रियत इति अभूततद्भावाभावः भवतु वा भूततद्भावः तथापि युक्तमेव चेदं प्रत्युदाहरणमित्याह प्रकृतेरविवक्षायामिति। प्र
कृतिरेव परिणामित्वेन यत्र विवक्ष्यते यथा तं तवः यत्र भवतीति तदा च्विप्रत्ययः तथा च वार्त्तिकं प्रकृतिविवक्षाग्रहणं चेति प्रकृतिः कार्य
स्य पूर्वावस्था अच्वाविति किमिति। अस्य च समासेऽभिप्रायः। आढ्यीकरोतीति ननु चेति ल्युडत्र भवितव्यमिति। करणाधिकरणयोश्चेति न च ल्यु
टः ख्युनश्च विशेषोऽस्तीति ल्युडिति तावदाढ्यीकरणमिति तिरूपं स्वरोऽपि लित्स्वरेणोपरस्यैवोदात्तत्वं ख्युनः अपि नित्स्वरेणाद्युदात्तत्वं स्त्रियामयमप्य
स्ति विशेषः ख्युनन्तस्य मुमित्यादि स्वत्वं मुम् चानयोः यस्य विधीयते अन्ताश्चामयं ऊर्ध्वादिषु ग्रहणस्ये निनिपातत्वात् स्त्रियामप्युभयत्र ल्युडाणञि
स्यादिनां ङीप् भवति अतो रूपे स्वरे च नास्ति विशेषः॥ ॥

॥उत्तरार्थश्चेति उत्तरसूत्रे खिष्णुच्खुकञ्भ्यां प्रयुक्ते त्वजादि भिभविता इत्याप्तिरिति शेषः कथं तर्हि पूर्वमुक्तं प्रतिषेधसामर्थ्यादिति अस्मिन्सूत्रे
प्रतिषेधसामर्थ्यादिति भावः केवलोत्तरार्थत्वे हि तत्रैवाच्चाविति ब्रूयात् यथा वक्ष्यते इह किं चित्त्रयोऽर्थः इति। भाष्ये तूत्तरार्थत्वमेव स्थितं॥ ॥कर्त्तरि भु
वः॥ ॥कर्तृग्रहणं करणनिवृत्त्यर्थं पुनरुत्तरार्थं वा खकारो मुमर्थः चकारः स्वरार्थः ञकारो वृद्ध्यर्थश्च किमर्थो खिष्णुचि कारादिः क्रियते न खिष्णुचि पि से
वोच्येत तत्राप्यमप्यर्थः स्यादित्यर्थः खकारो न कर्त्तव्यो भवति प्रत्ययस्वरेणैव सिद्धं। केनेसृणी मिकारादित्वं सिध्यति तत्राह उदात्तत्वादिति भवति रयमुदा
त्तः तस्योदात्तत्वादिड् खिष्णुजि। नञ्त्स्विति न जरतिर्यं च मीतज उत्तरस्य खिष्णुजे तस्य स्वरं सि अर्थमित्यर्थः यथा यामिकारादिर्नक्रियेत ततः सम

॥उत्तरार्थं च प्रतिषेधः क्रियते॥ ॥कर्त्तरि भुवः खिष्णुच्खुकञौ॥ ॥आढ्यादिषु सुबन्तेषु च्व्यर्थेष्वच्वौ
तेषूपपदेषु भवतेर्द्धातोः कर्त्तरि कारके खिष्णुच्खुकञौ प्रत्ययौ भवतः आढ्यंभविष्णुः आढ्यंभावुकः
सुभगंभविष्णुः सुभगंभावुकः स्थूलंभविष्णुः स्थूलंभावुकः पलितंभविष्णुः पलितंभावुकः नग्नंभ
विष्णुः नग्नंभावुकः अन्धंभविष्णुः अन्धंभावुकः प्रियंभविष्णुः प्रियंभावुकः कर्त्तरीति किं करणे मा
भूत् च्व्यर्थेष्वित्येव आढ्यो भविता अच्वावित्येव आढ्यीभविता उदात्तत्वाद्भुवः सिद्धमिकारादित्वं खिष्णु
चः नञ्स्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ११ ॥

पीरिकृ सोके ष्णुच् वार्विर्दिपश्चेत्स्य ग्रहणं न स्यात् अस्य च कारभागात् अथास्यापि चकारः क्रियेत एवमपि लाक्षणिकत्वात्तस्य णत्वयोः स्यामि
द्धत्वादिषु जितिरूपाभावाद्ग्रहणं न स्यादेव न तत इकारादित्वं क्रियते न नु च सत्यपीकारादित्वे तदनुबन्धकग्रहणे नातदनुबन्धकस्य एकानुबन्धकग्र
हणे न द्व्यनुबन्धकस्येति वा लं कृञादीष्णुच एव ग्रहणे न भवितव्यं नास्य इकारोच्चारणसामर्थ्यादस्यापि ग्रहणं भविष्यतीति मन्यते यद्येवं व्या
जयमस्तु तत्र षत्वणत्वयोश्च कारस्य च करणसामर्थ्याद्धि कृतेऽस्यापि ग्रहणं सिद्धमिति चिंत्यप्रयोजनमिकारादित्वं॥ ११ ॥ ॥ ॥

॥स्पृशोनुदके॥ ॥ननु चेत्यादि। सुपि स्थ इत्यत्रोक्तं सकर्मकेषु कर्मण्येवोपपदे तिष्ठते अन्यत्र सुपीति तत्तस्य सुबन्त उपपदे क्विन् प्रत्यय इत्युक्तमनुपपन्न
मिति भावः तत्कर्तृप्रत्ययार्थमिति कर्त्तरि क्विरिति वक्तव्ये कर्त्तरि क्विनः सिद्धत्वात्कर्तृग्रहणं निरर्थकमत्र प्रयोजनमस्तीति भावः कर्तृप्रत्ययो लभ्यत इति कर्मण्युप
पदे एकः कर्त्ता कारणान्तरे वा यद इत्येवं प्रत्ययो भवति घृतस्पृगिति क्विन्प्रत्ययस्य कुरिति शकारस्य पदकारः साक्षात्वे नान्तरे स्यात्तस्मात्(?) लाजशोनि(?)

॥स्पृशोनुदके क्विन्॥ ॥स्पृशो धातोरनुदके सुबन्त उपपदे क्विन्प्रत्ययो भवति॥ ननु च सकर्मकत्वात्स्पृशेः कर्म
ण्युपपदत्वं प्राप्नोति नैष दोषः कर्त्तरीति पूर्वसूत्रादनुवर्त्तिष्यते तत्कर्तृप्रत्ययार्थं विज्ञास्यते सुबन्तमात्र उ
पपदे कर्तृप्रत्ययो लभ्यते। घृतं स्पृशतीति घृतस्पृक् मन्त्रेण स्पृशतीति मन्त्रस्पृक् अनुदक इति किं उदकस्प
र्शः नकारः क्विन्प्रत्ययस्य कुरिति विशेषणार्थः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

क्विनः ककारो गुणवृद्धिप्रतिषेधार्थः इकारो वेरपृक्तस्येति विशेषणार्थः नकारः किमर्थः एकाजभ्योत्पत्त्यर्थं विधीयते तत्र धातुस्वरेणैव सिद्धं यस्तु
र्यनेकाच दधृगिति वस्येत रूपे द्विर्वचनं अन्तोदात्तत्वे चेति एवं तर्हि क्विन्प्रत्ययस्य कुरिति विशेषणार्थः क्विप्रत्यये सत्युच्यमाने स्पृशेर्दृहः स्यात
के: क्विप्येव निर्दिश्य इति क्वेरपि निर्दिष्टे पकारस्थाने चिवेति द्विर्वचनं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥ऋत्विक्॥ ॥ऋतौयजतीतिवसंतादिकेऋतुयजतीतियस्मिन्यागेऋतुर्हेतुस्तायथावसंतायकपिंजलानालभतेयिशंगाख्रपोवासंताख्य
तुपश्रूनालभेतेग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षास्वादौतरतिप्रापमेतत्॥ ऋतुप्रयुक्तोवेतिवक्ष्यतेज्योतिवायजेतेसादौयलर्तलितत्प्राप्रा
यमेततावत्वंचेति॥ अन्यथाह्यास्यदाघोगीतिनिषेधःस्यातसुबंतमात्रइति॥ अन्यथासकर्मकत्वात्कर्मण्येवस्यात॥ केवलादेवेति एतत्तुक्विन्विधा
नसामर्थ्यादपिलभ्यतेनहिसोपपदाद्युजेःक्विनिक्विपिवाविशेषोस्तिकुत्वस्यचोःकुरित्यनेनैवसिद्धत्वात अनुपपदेतुयुजेरसमासइतिवु

॥ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचांचा॥ ॥ऋत्विगादयःपंचशब्दाःक्विन्प्रत्ययांतानिपात्यंते॥ अपरेत्र
योधातवोनिर्दिश्यंते॥ ऋतुशब्दउपपदेयजेर्द्दर्तोःक्विन्प्रत्ययोभवति॥ ऋतौयजतिऋतुंवायजति ऋतुप्रयुक्तोवा
यजतिऋत्विक्॥ ऋदिरेषायथाकथंचिद्व्युत्पत्त्या॥ धृषेःक्विन्प्रत्ययःद्विर्वचनमंतोदात्तत्वंचनिपात्यते॥ सृजेःकर्म
णिक्विनमागमश्चनिपात्यते॥ दधृक्॥ दिशेःकर्मणिक्विन्प्रत्ययोनिपात्यते॥ दिशंतितामितिदिक्॥ उत्पूर्वात
ष्णिहेःक्विन्प्रत्ययउपसर्गांतलोपःषत्वंचनिपात्यते॥ उष्णिक्॥ अंचुयुजिक्रुंचइत्येतेषांक्विन्प्रत्ययोभवति॥
निपातनैःसहनिर्देशादत्रापिकिंचिल्लाक्षणिकमस्ति॥ अंचेःसुबंतमात्रउपपदेक्विन॥ प्राङ्॥ प्रत्यङ्॥ उदङ्॥ युजे॥
क्रुंचेश्चकेवलात॥ युङ्॥ युंजौ॥ युंजः॥ सोपपदात्सत्सूद्विषेत्यादिनाक्विप॥ अश्वयुक्॥ क्रुङ्॥ क्रुंचौ॥ क्रुंचः॥ नलोपः
कस्मान्नभवति॥ निपातनैःसहनिर्देशात॥ १२॥ ॥

सिद्धतेनकाएपकुत्वार्थंक्विनोविधानंभवतिसार्थकंयदित्तुनिपातनसाहचर्यात्सोपपदादनुपपदाच्चयुजेःक्विनभवतीत्युच्यतेतदासत्सूद्विषेत्य
त्रयुजियहणंशकामकर्तुंनलोपःकस्मान्नभवतीतिकुंचवक्रुंचकोटिल्यानल्पीभावयोरितिनोपधायाःधातुतत्वानिकुंचितिरितिनलोपोदृश्यतेचुदि
नतुजकारस्यश्रवणात्तस्यासिद्धत्वाच्चकार्यरतःश्चोःकुरितिकुत्वंनभवतिकुंचोकुंचइत्यादौजकारोयधातुपरत्वात्स्यात्तत्रसदि॥ सलीतिवच
नान्नभवतीतिवक्रमसदि॥ तिप्रत्याहारःसनःसद्दशदाप्याभिहिडोडःकारात॥ अमेतुक्रुंचिरेकस्यधातुःतस्यककारस्यरेफोपिक्विन्संनि

॥ ॥त्यदादिषु॥ ॥पश्यार्थैश्चिसत्रवक्ष्यति अनालोचनं चक्षुःसाधनं विज्ञानमात्रप्रतिषेधं मन्यते यादृक्ता दृशीति दृशशब्दं तु घितिवर्तमाने आसर्वनाम्न इत्यात्वं त्र कञो विशेषणार्थ इति। आद्युदात्तत्वस्य नकारेणापि सिद्धत्वात् ञकारो योधस्य प्रयोजनं विशेषणमेवेत्यर्थः ननु स्यादेतत्प्रयोजनमित्युच्यते तं पश्यति तद्दर्श इति चक्षुर्विज्ञाने अणेव भवति कथं पुनः प्रयुज्यमानस्यैव दृशेरनालोचनार्थत्वमित्याह तादृशादयो रूढिशब्दा इति ततः किमित्याह नैवात्रेति रूढिशब्दा स्यासं ताप्यवयवार्थे न च तु साधने पश्यातैलपायिकादयः एतदर्थमेव चानालोचन इत्युक्तं दृश्यर्थाभावे यं विधिः सति तु दृश्यर्थे अणेव भवतीति। भाष्ये तु कर्मकर्तरि

॥त्यदादिषु दृशोऽनालोचने कञ्च॥ ॥दृशेर्धातोरनालोचनेऽर्थे वर्तमानात्त्यदादिषूपपदेषु कञ्प्रत्ययो भवति चकारात्क्विन्च। तादृकः। तादृशः। यादृकः। यादृशः। कञो ञकारो विशेषणार्थः ठक्ठञ्कञिति। अनालोचने इति किं। तं पश्यति तद्दर्शः। तादृगादयो हि रूढिशब्दाः नैवात्र दर्शनक्रिया विद्यते। समानान्ययोश्चेति वक्तव्यम्। सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। दृशेः क्सो वक्तव्यः। तादृक्षः। यादृक्षः। अन्यादृक्षः॥ ॥सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्॥ ॥सुपीति वर्तते कर्मग्रहणं तु स्पृशोऽनुदके क्विन्नित्यतः प्रभृति न सम्बध्यते। सदादिभ्यो धातुभ्यः सुबन्त उपपदे उपसर्गेऽप्यनुपसर्गेऽपि क्विप्प्रत्ययो भवति। उपसर्गग्रहणं ज्ञापनार्थं अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति। वदः सुपि क्यप्चेति। सू इति द्विषा साहचर्यात्सूतेरादादिकस्य ग्रहणं॥ ॥छ॥

प्रत्यासत्ति दर्शिता तमिवेमं पश्यन्ति जनाः सोयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति तत्र कर्मव्यापारमात्रे वा दृशेर्वृत्तिः कर्तृस्थधात्वर्थस्यारोपेण ज्ञानो कर्षातिशयप्रतिपादनायेति द्रष्टव्यं समानान्ययोश्चेति समानस्य छन्दसि तु सम्भवविधानात्सिद्धं वक्तव्यं चेति सदादिषु समानान्ययोश्च। तादृक्षः सदृक्षः अन्यादृक्ष इति दृक्षे चेति वक्तव्यमिति तिसभाव आत्वं च॥ ॥सत्सूद्विष॥ ॥अतः प्रभृतीति भाष्यकारप्रयोगात्प्रभृतिशब्दयोगे पञ्चमी वदः सुपि क्यप्चेति। प्रयोजनं दर्शयितुं दर्शितानात्र अनुपसर्ग इति वर्तते तस्मात्स्पृशोनुदके क्विन्नित्यादौ प्रयोजनं द्रष्टव्यं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥सुवतेरितिन्यायस्य तुल्यत्वादीत्यादिकस्याप्यग्रहणं॥ शुचिषदिति॥ छांदसोयंप्रयोगः हंसः शुचिषदिति पूर्वपदादिति षत्वं शुचिसदितिपाठे लौकिकः प्रयोगः कथमत्रणत्वमितिग्रामणीविषयः प्रश्नः प्रणीरित्यत्र तूपसर्गादसमासेपीतिणत्वमस्त्येवज्ञापकादिति पूर्वपदस्थान्निमित्तादुत्तरस्यनयतिनकारस्यासंज्ञायामपिणत्वंभवतीतिसामान्येनज्ञापकमित्यर्थः तेनाग्रणीरित्यत्रापिभवति कर्मण्यणीतुनभवतिनीत्स्यविषयत्वात् ज्ञापनस्यअग्रेलत्वग्रा॥

॥नसुवतेस्तौसादिकस्य युजिर् योगे युजसमाधौ द्वयोरपिग्रहणं॥ विदज्ञाने विद सत्तायां विदविचारणे विद्लृलाभे सर्वेषांग्रहणं लाभार्थस्यविदेः अकारस्यविवक्षितत्वात् शुचिषत् अंतरिक्षसत् उपसत् संसत् सू अंडसूः शतसूः प्रसूः द्विष मित्रद्विट् प्रद्विट् दुह मित्रध्रुक् दुह गोधुक् युज अश्वयुक् विद वेदवित् ब्रह्मवित् निवित् निविन् निवित् भिदः काष्ठभित् प्रभित् छिद रज्जुच्छित् जि शत्रुजित् प्रजित् नी सेनानीः प्रणीः अग्रणीः ग्रामणीः कथमत्रणत्वं एषांग्रामणीरिति नयतेः पूर्वपदात्संज्ञायामपिणत्वं राज विराट् सम्राट् मोराजिसमः क्वाविति मत्वे अन्येभ्योपिदृश्यतइति सामान्येनक्विब्व स्तेतेनसिद्धेवाप्रपंचः॥ ॥भजोण्विः॥ ॥उपसर्गेसुपीतिवर्त्तते भजेर्द्धातोः सुबंतउपपदेण्विप्रत्ययोभवति अर्द्धंभजतेअर्द्धभाक् पादभाक् उपसर्गेपि प्रभाक्॥ ॥छंदसिसहः॥ ॥उपसर्गेसुपीत्येव छंदसिविषये सहेर्द्धातोः सुबंतउपपदेण्विप्रत्ययोभवति तुराषाट्॥ ॥वहश्च॥ ॥वहेर्द्धातोः सुप्युपपदे छंदसिविषयेण्विप्रत्ययोभवति प्रष्ठवाट् दित्यवाट् योगविभागउत्तरार्थः॥ ॥कव्यपुरीषपुरीष्येषुञ्युट्॥ कव्यपुरीषपुरीष्यइत्येतेषूपपदेषु छंदसिविषयेवहेर्द्धातोर्ञ्युट्प्रत्ययोभवति कव्यवाहनः पितॄणां पुरीषवाहनः पुरीष्यवाहनः॥ ॥हव्येनंतःपादं॥ ॥हव्यशब्दउपपदेछंदसिविषयेवहेर्द्धातोर्ञ्युट्प्रत्ययोभवति अनंतःपादंवहेर्हिवर्त्तते अग्निश्च हव्यवाहनः अनंतःपादमि

त्याख्यानयतेरितिवक्तव्यमितिवचनाज्ज्ञापनमपितद्विषयंतत्रापिनीत्स्यविषयमितिस्थिता॥ ॥छंदसि॥ ॥तुराषाडितिसहेःसाडः षइतिषत्वं अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घः तुरासाहंपुरोधायशत्रूनाषाट्ठिषोयोद्धुंपुरुहूतः प्रतनाषाडितिभाषायांप्रयोगाः श्वेतवाः पुरूडाशोहयते र्णिजेतातः क्विप्॥ ॥छ॥ ॥

॥जनसन॥ ॥विशेषणार्थश्चेति॰ विड्वनोरनुनासिकस्यादित्यनुच्यमाने हि क्विवादीनामपि ग्रहणं स्यात् अथात्र निरनुबंधकत्वात्तस्यैव ग्रहणं वेरपृक्तस्येत्यत्राप्यस्यैव ग्र
हणं स्यात् अथात्र क्विवादीनामपि ग्रहणं स्याद्विड्वनोरनुनासिकस्यादित्यत्रापि स्यादिति समानं वचनं वचदिति भावः॥ गोषा इति सनोतेरन इति षत्वं॥ अग्रेगा इति पू
र्ववदलुक्॥ ॥अदोनन्ने॥ ॥अन्नाद इति भाषायामणेव भवति छंदसि लकारादनुपपदादिसमर्थात्प्रसेच बाधजिन्मतेते ना अन्नाद इत्यन्नमद इत्यवग्रहो भव

॥जनसनखनक्रमगमोविट्॥ ॥छंदसि उपसर्गे सुपीति वर्त्तते॰ जन जनने॰ जनी प्रादुर्भावे द्वयोरपि ग्रहणं॰ तथा
षणु दाने॰ वन षण संभक्तौ॰ गिति॰ जनादिभ्यो धातुभ्यश्छंदसि विषये विट् प्रत्ययो भवति॰ टकारः सामान्यग्रहणाविघा
तार्थः ढेरेकस्येति॰ विशेषणार्थश्च॰ विड्वनोरनुनासिकस्यादिति॰ अब्जाः गोजाः॰ गोषा इंद्रो नृषा असि॰ विसखाः कूप
खाः॰ क्रम॰ दधिक्राः॰ गम॰ अग्रेगा नेतृणां॥ ॥अदोनन्ने॥ ॥छंदसीति निवृत्तं॰ अदेर्धातोरनन्ने सुप्युपपदे विट् प्र
त्ययो भवति॥ आममत्ति आमात्॰ सस्यात्॰ अनन्ने इति किं॰ अन्नादः॥ ॥क्रव्ये च॥ ॥क्रव्यशब्द उपपदे अदेर्धातोर्विट्
प्रत्ययो भवति॰ क्रव्यमत्ति क्रव्यात्॰ पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थं तेनाण् न भवति॰ कथं तर्हि क्रव्यादः॰ कृत्तवि
कृत्तशब्द उपपदे ण्णत स्य च पृषोदरादित्वात् क्रमभावः॰ कृत्तविकृत्तपक्वमांसभक्षः॰ क्रव्याद उच्यते॰ आममांसभक्ष
कः क्रव्यादिति॥ ॥छ॥ ॥छ॥ ॥

ति॥ ॥क्रव्ये च॥ ॥वासरूपबाधनार्थमिति तथा च वार्त्तिकं अदोनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थमिति कथं तर्हीति॰ यदि वासरूपविधिबाधनार्थमि
ति भावः॥ कृत्तविकृत्तेति कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तमिति पूर्वकालेति समासः॥ तस्य पक्वशब्देन पुनः सपक्वसमासः ततो मांसशब्देन पुनर्विशेषण
समासः॥ पृषोदरादित्वात्क्रमभाव इति यद्येवं क्रव्याद इत्यस्य रूपस्यावर्जनीयत्वादसरूपबाधनार्थेनानेन वचनेन वार्त्तिकविरोधश्चैवं बद्रूप इत्याशंक्या
ह कृत्तविकृत्तेत्यादि अर्थभेदादुभयमपि नास्ति किल लेख्य यमभिप्रायः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥दुहः॥ ॥कामदुघेति काम्यंत इति कामाः तान् दुग्धे कामदुघा अर्थो मधुपर्कः॥ ॥मंत्रे॥ ॥एतेभ्य इति श्वेतादिपूर्वेभ्यो वहादिभ्यो धातुभ्य इत्यर्थः॥ धा
तूपपदसमुदायात् इति किमर्थमित्याह अलाक्षणिके ति श्वेतवाहस्तादिषु अवयाः श्वेतवाः पुरोडाश्चेति निपातनात् उक्तं उभयथाश इति नलोपे अत उपधाया
इति वृद्धिः रुत्वं ॥ उक्थशस इति प्रत्येकमभिसंबध्यते भाविपदत्वाश्रयेण चेदमुच्यते यत्र असन्तस्य पदत्वं भविष्यति तत्रापि विनेऽपवादो डसप्रत्ययो वक्तव्य
इत्यर्थः पद्येवमनेन डस् सिद्धः तेनाप्यलसंतस्येति दीर्घत्वं च श्वेतवाहस्तादिषु सिद्धं नार्थो विधाप्यश्वेतवा इति निपातनेन एवं तर्हि संबुद्ध्यर्थं निपातनं हे श्वेत

॥दुहः कब् घश्च॥ ॥दुह इत्येतस्मात् सुप्युपपदे कप्प्रत्ययो भवति घकारश्चान्तादेशः कामदुघा धेनुः धर्मदुघा॥ ॥मंत्रे
श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ ॥श्वेतवह उक्थशस् पुरोडाश् इत्येतेभ्यो ण्विन् प्रत्ययो भवति मंत्रविषये धातू
पपदसमुदाया एव निपात्यंते अलाक्षणिककार्यसिद्ध्यर्थं प्रत्ययस्तु विधीयत एव श्वेतशब्दे कर्तृवाचिनि सुपपदे वहेर्धा
तोः कर्मणि कारके ण्विन्प्रत्ययो भवति श्वेता एनं वहंति श्वेतवाः इन्द्रः उक्थशब्दे कर्मणि करणे वा उपपदे शंसतेर्ण्वि
न्प्रत्ययो भवति नलोपश्च उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः दाशृ दाने इत्यस्य पुरः पूर्वस्य डत्वं कर्मणि च
प्रत्ययः पुरो दाशंत एनमिति पुरोडाः श्वेतवहादीनां डस् पदस्येति वक्तव्यं श्वेतवोभ्यां श्वेतवोभिः पदस्येति किं श्वेत
वाहौ श्वेतवाहः॥ ॥अवे यजः॥ ॥अवे उपपदे यजेर्धातोर्ण्विन्प्रत्ययो भवति मंत्रे त्वं यज्ञे वरुणस्यावयाः असि
योगविभाग उत्तरार्थः॥ ॥१४॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

वाः इडिति अत्वसंतस्येत्यत्र हि असंबुद्धाविति वर्तते डस् अपि वक्तव्यमुक्थार्थं श्वेतवोभ्यामुक्थशोभ्यामिति एवं चोक्थशा इत्यपि संबुद्ध्यर्थं निपातनं कर्तव्यं यदि
मंत्रे दर्शनमस्ति॥ ॥अवे यजः॥ ॥अवया इति निपातनादुक्तं योगविभाग उत्तरार्थ इति पुरोडाशावयजोर्ण्विन्नित्येकयोगे श्वेतवहादीनामप्युत्तरत्रानु
वृत्तिः स्यात् यद्यपि श्वावपूर्वस्यैवानुवृत्तिः स्यात् केवलस्यैव चेष्यते तदर्थो योगविभाग इत्यर्थः॥ ॥१४॥ ॥छ॥ ॥ ॥

॥विजुपे॥ ॥अथ छंदोग्रहणं किमर्थं यावता मंत्र इत्यनुवृत्तेरेव भाषायां न भविष्यति तत्राह छंदोग्रहणं ब्राह्मणार्थमिति मंत्रव्यतिरिक्तो वेदभागो ब्राह्मणं यथोक्तं तच्चोदकेषु मंत्राख्या शेषे ब्राह्मणशब्द इति किमर्थं पुनरिदमिति उत्तरसूत्र एव विजुपग्रहणं छंदोग्रहणं च क्रियतामिति प्रश्नः। नियमार्थमिति न नु दृशिग्रहणादेव भाषायां न भविष्यति सत्यं तस्यैव प्रपंचार्थमिदं॥ ॥आतः॥ ॥अश्व इव तिष्ठति अश्वत्थामा पृषोदरादित्वात्सकारस्य तकारः सुधी

॥विजुपे छंदसि॥ ॥उपे उपपदे यजेर्धातोश्छंदसि विषये विच् प्रत्ययो भवति· उपयड्भिरूर्ध्वं यजंति· त्वद्रुपयत्वामुपय ड्· छंदोग्रहणं ब्राह्मणार्थं· चित्करणं सामान्यग्रहणाविघातार्थं चेट्कस्येति· किमर्थमिदमुच्यते यावतान्येभ्योपि दृश्यंत इति यजेरपि विच् सिद्धः· नियमार्थमेतत्· उपे यजश्छंदस्येव न भाषायामिति॥ ॥आतो मनिन्क्वनिब्वनिप श्च॥ ॥छंदसीति वर्त्तते· सुप्युपसर्गेपीति च· आकारांतेभ्यो धातुभ्यश्छंदसि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवंति चकाराद्विच् च· सुदामा· अश्वत्थामा· क्वनिप्· सुधीवा सुपीवा· वनिप्· भूरिदावा· घृतपावा· विच् खल्वपि· कीलालपाः शुभंयाः शंयस्योपसदाः॥ ॥अन्येभ्योपि दृश्यंते॥ ॥छंदसीति निवृत्तं· अन्येभ्योपि धातुभ्योऽना कारांतेभ्यो मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवंति विच् च· मनिन्· सुशर्मा· क्वनिप्· प्रातरित्वा· प्रातरित्वानौ· प्रा तरित्वानः· वनिप्· विजावा· अग्रेगावा· विच् खल्वपि· रेडसि पर्णं नयेः· अपि शब्दः सर्वविधिव्यभिचारार्थः· निरुप दादपि भवति· धीवा· पीवा· दृशिग्रहणं प्रयोगानुसरणार्थं॥ ॥

वा सुपीवेति घुमास्थादिसूत्रेणेत्वं चकारो विचोनुकर्षणार्थः यद्येवमुत्तरत्रानुवृत्तिर्न स्यात् एवं तर्हि चकारोप्युत्तरत्रानुवर्त्तिष्यते॥ ॥अन्ये भ्योपि॥ ॥विजावेति विजायत इति विजावा विड्वनोरनुनासिकस्यादित्यात्त्वं एवमग्रे गच्छतीत्यग्रेगावा· रेडिति रिष्यतेर्हिंसार्थात्· उपधागुणः· अ रत्वं च लेः अपि शब्दः सर्वविधिव्यभिचारार्थ इति विधीयते अनेनेति विधिः उपाधिः सर्वोपाधिव्यभिचारार्थ इति युक्तः पाठः दृशिग्रहणं प्रयोगानुस रणार्थमिति यथा प्रयोगे दृश्यंते तथैव भवंतीति वचनव्यत्याश्रयेणेति भावः॥ ॥

॥क्विप्॥ ॥निरुपपदेभ्यश्चेति एतदपिशब्दस्य सर्वोपाधिव्यभिचारार्थस्यानुवृत्तेर्लभ्यते न तु सुपीत्यस्य निवृत्तेः उत्तरसूत्रे सुप्युपसर्गेऽपीति वर्त्तत इति व
स्यमाणत्वात्। छन्दसि भाषायां चेति सर्वसूत्र एव छन्दसीत्यस्य निवृत्तत्वात्· उखास्रदित्यादिसूत्रं सुध्वंसु भ्रंसु अवस्रंसने अनिदितामित्युपधालोपः वसु
स्रंसिध्वंस्यनडुहां दत्वं। वहाभ्रडिति भ्रंशु अधःपतने भ्रस्जादिना षत्वं अन्येषामपि दृश्यत इति दीर्घः उखास्रः स्रंसते पर्णानि ध्वंसते वहाद्रू इत्यपतीति क्विग्रहः
स्वंसिरत्र भावितण्यर्थः सकर्मकः क्वचित्तु वृत्तावेव विग्रहवाक्यानि पठ्यन्ते॥ ॥स्थः कच्च॥ ॥के सप्तमी विभक्तिको निर्दिष्टः अन्येभ्योऽपि दृश्यत इति क्विबिति

॥क्विप्॥ ॥सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप्प्रत्ययो भवति· उखायाः स्रंस
ते उखास्रत्· पर्णध्वत्· वहाद्भ्रट् इत्यपि च वहाभ्रट्॥ ॥स्थः कच्च॥ ॥सुप्युपसर्गेऽपीति वर्त्तते· स्था इत्येतस्मा
द्धातोः सुप्युपपदे कप्रत्ययो भवति क्विप् च· किमर्थमिदं यावता सुपि स्थ इति कः सिद्धः अन्येभ्योऽपि दृश्यत इति
क्विप्· बाधकबाधनार्थं पुनर्वचनं· शमि धातोः संज्ञायामित्यचं बाधते· शंस्थः शंस्थाः॥ ॥१५॥ ॥

सिद्ध एवेत्यपेक्ष्यते न तु तच्छीलादिग्रहणं तत्रानुवर्त्तते तस्मात्क्विच्चेति क्विप् सिद्ध एवेति वक्तव्यं यथा तच्छीलादिग्रहणं तत्र न संबध्यनीयमिति
मन्यते न चैवमपि सुपि स्थ इति विशेषविहितः कः सामान्यविहितं क्विपं बाधेत वासरूपविधिना सोऽपि भविष्यति शमि धातोः संज्ञायामचं बाधत इति
अन्यथा यथा लक्षो हेत्वादिषु टं बाधते धातुग्रहणान्न तथा तिष्ठतेऽपि कः क्विपौ बाधेत अतस्तमप्यचं बाधित्वा कः क्विपावेव यथा स्यातामिति पुन
र्वचनमित्यर्थः। शंस्था इति क्विपि लुप्ते प्रत्ययलक्षणेन घुमास्थादिसूत्रेणोत्वमत्र प्राप्नोति भाष्यकारप्रयोगात्तु न भवति केचित्त्वीत्वमव कारादावि
ति वचनं पठन्ति तेषां सुपीवा सुधी वाक्यत्रापि न स्यात्॥ १५ ॥

॥सुप्यजातौ॥ ॥ब्राह्मणानामंत्रयिते तिना च्छील्यस्याविवक्षितत्वात्तन प्रत्युदाहृतः। नलोकाव्ययेति षष्ठीप्रतिषेधः। उत्प्रतिभ्यामिति पुनः सुब्ग्रहण
स्योपसर्गनिवृत्त्यर्थत्वादयमारंभः साधुकारिणि चेति अताच्छील्यार्थमिदं तच्चेत ज्ञापकात्सिद्धं यदयमाक्वेस्तच्छीलेष्वत्र तच्छीलेष्वभिधायमाधुकारि
ग्रहणं करोति तत् ज्ञापयति साधुकारिण्यताच्छील्येपि णिनिर्भवतीति ब्रह्मणि वदः इति ब्रह्मवेदः २२ मप्यताच्छील्यार्थं॥ ॥कर्तरि॥ ॥उपमानस्योपमेयाये

॥सुप्यजातौ णिनिस्ताच्छील्ये॥ ॥अजातिवाचिनि सुबंत उपपदे ताच्छील्ये गम्यमाने धातोर्णिनिप्रत्ययो भवति।
उष्णभोजी। शीतभोजी। अजाताविति किं ब्राह्मणानामंत्रयिता। ताच्छील्य इति किं उष्णं भुंक्ते कदाचित्। सुपी
ति वर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थं। उत्प्रतिभ्यामाङि। सर्त्तेरुपसंख्यानं। उदासारिण्यः। प्रत्यासारिण्यः।
साधुकारिणि च। साधुकारी। साधुदायी। ब्रह्मणि वदः ब्रह्मवादिनो वदंति॥ ॥कर्तर्युपमाने॥ ॥कर्तृवाचिनि उ
पमाने उपपदे धातोर्णिनिप्रत्ययो भवति। उपपदकर्त्ता प्रत्ययार्थस्य कर्तुरुपमानं। उष्ट्र इव क्रोशति उष्ट्रक्रोशी।
ध्वांक्षविरावी। अताच्छील्यार्थ आरंभः जात्यर्थो वा। कर्तरीति किं अपूपानिव भक्षयति माषान्। उपमान इति किं
उष्ट्रः क्रोशति॥ ॥व्रते॥ ॥व्रतमिति शास्त्रितो नियम उच्यते। व्रते गम्यमाने सुबंत उपपदे धातोर्णिनिप्रत्ययो
भवति। समुदायोपाधिश्चायं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

त्वात्कर्तरि च प्रत्ययविधानात्तस्यैवोपपदकर्त्रोपमानं विज्ञायत इत्याह उपपदकर्त्तेति। उष्ट्रक्रोशीति स्वशरोणतार्थत्वाद्धातोर्नैव प्रयुज्यते
माप्त उपमानानां शब्दो हणमादिके यथा॥ ॥व्रते॥ ॥समुदायोपाधिश्चायमिति न प्रत्ययार्थविशेषणं तथा हि सति व्रत एव कर्तरि प्रत्ययः स्यात्
तद्वतीति भावः। समुदायोपाधित्वमेवस्य स्पष्टयति॥ ॥छ॥ ॥

का॰प्र॰
७१

॥षात्तूपपदेसादिकामचारइच्छाप्रवृत्तिः तत्प्राप्तौसत्यांनियमः सचद्विविधः संभवतिस्थंडिलेशेतएव श्राद्धंभुंक्तेएवेत्येवंरूपोयस्मात्स्थंडि
लएवशेतेश्राद्धमेवभुंक्तइत्येवंरूपोवातत्रपूर्वकेनियमेयदोषाभावश्राद्धादिनाश्राद्धंनभुंक्तेतदैवव्रतलोपःप्राप्नोतिनचैवंविधंशास्त्रमस्तिस्थंडि
लेशायितव्यमेवश्राद्धंभोक्तव्यमेवेति॰ अस्तितुस्थंडिलएवशायितव्यंश्राद्धमेवभोक्तव्यमितिव्रतइतित्वाख्यातोनियमइत्युक्तंतस्माद्वितीयो
योनियमोविज्ञायतइत्याहसतिशयनइत्यापि॥ ॥बहुलं॥ ॥आभीक्ष्ण्येपौनःपुन्यमितिपुनःपुनर्भवितत्वेवर्त्तमानाभ्यामभ्यासार्थाभावेष्व

॥धातूपपदप्रत्ययसमुदायेनचेद्व्रतंगम्यतइति॰ स्थंडिलशायी॰ श्राद्धभोजी॰ कामचारप्राप्तोनियमः सतिशयने
स्थंडिलएवशेतेनान्यत्र॰ सतिभोजने॰ श्राद्धमेवभुंक्तेनश्राद्धमिति॰ व्रतइतिकिं॰ स्थंडिलेशेतेदेवदत्तः॰ अन्नाच्छील्या
र्थत्वात्सेः ज्ञासर्थोवा॥ ॥बहुलमाभीक्ष्ण्ये॥ ॥आभीक्ष्ण्येगम्यमानेसुबंतउपपदेधातोर्बहुलंणिनिप्र
त्ययोभवति॰ आभीक्ष्ण्यंपौनःपुन्यंतात्पर्यमासेवातच्छील्यादन्यत्॰ कषायपायिणोगांधाराः॰ क्षीरपायिण
उशीनराः॰ सौवीरपायिणोवाह्लीकाः॰ बहुलग्रहणात्कुल्माषखादइत्यत्रनभवति॥ ॥मनः॥ ॥सुपीति
वर्त्ततेमन्यतेर्णिनिः सुबंतउपपदेणिनिप्रत्ययोभवति॰ दर्शनीयमानी॰ शोभनमानी॰ बहुलग्रहणानुवृत्ते
र्मन्यतेर्ग्रहणंनभवति॰ उत्तरसूत्रेहिखश्प्रत्ययेविकरणकृतोविशेषःस्यात॥ ॥१६॥ ॥ ॥ प्रा॰
७१

जत्रअभ्यासार्थंभमात्रेरिलोपः ताच्छील्यादन्यदितिएतेनसुप्यजातावित्यनेनागतार्थत्वंदर्शयतिफलान्तयेष्वप्रवृत्तिस्ताच्छील्यंगांधारादयस्तु
वातादिसाम्यार्थंदेशाचारवशेनकषायादिपानेप्रवर्त्तन्ते।उदाहरणेष्वातीयुक्तिचिणक्वतोरितियुक्प्रातिपदिकान्तनुम्विभक्तिषुचेतिणत्वं॥ ॥
मनः॥ ॥मन्यतेर्ग्रहणमितिमनज्ञानइत्यस्यदैवादिकस्यमनुतेरितिमनुअवबोधनइत्यस्यतानादिकस्यनिवृत्त्युत्तरोनभावितव्यंयदिनेष्यते
संज्ञापूर्वकोविधिरनित्यः किंपुनः कारणंप्रयत्नेनमनोतेर्ग्रहणंनिवार्यतेयावताउहद्वयोरपिणिनितदेवरूपंनचार्थभेदइत्याहउत्तरसूत्रइ

॥आत्ममाने॥ ॥चकारएणिनिश्चेतिवासरूपविधिनासिद्धोपिणिनिरविच्छेदायसमुच्चीयतेतेनकरणोयजइत्यत्रणिनेरेवानुवृत्तिर्निर्वर्तितानंतरस्य खशः आत्मशब्दोयंपरमात्मादिनिंकुर्वणोपयत्नप्रतियोगिनमर्थमाचष्टेसस्वशब्दपर्यायोयुक्तस्तेनचेतनद्रव्यवचनः मननंमानः भावेघञ् आत्मनोमानआ त्मानः कर्मणिषष्ठ्याः समासः तत्रकस्येत्यपेक्षायांप्रत्ययार्थस्यसंनिहितस्यमतुरेवात्मनइतिगम्यते तदाह प्रत्ययार्थः कर्त्तेति दर्शनीयत्वादिनाधर्मेण नितिविशिष्टमितिविशेषः कर्त्तरिषष्ठ्याःषष्ठीसमासोनभवतिसर्वस्याएवमतेर्मतिकर्तृकत्वाव्यभिचारात् एवंचेतनद्रव्यवचनेप्यात्मशब्देकर्तरिषष्ठ्यामव्यभिचा रादविशेषणांकर्मणिषष्ठ्यांतुचेतनांतरेकर्मणिप्रसंगप्रसंगः तस्मात्स्वशब्दपर्यायएवात्मशब्दः दर्शनीयंमन्यइतिशरीरधर्ममपिदर्शनीयत्वादिकमा त्मधर्ममेवमन्यतेसंसारिणः शरीरशरीरिणोरत्यर्थोगोलकयोरिवाभेदंमन्यमानाः पंडितंमन्यइतिएकस्याप्यात्मनःस्वरूपेणाकर्तृत्वंपंडितत्वादिवि शिष्टरूपेणकर्मत्वंचयुज्यतएवयथोक्तमाचार्यैः अमस्तस्रयोगमभिन्नाज्ञानसेवचकर्त्तरि॥ भवंतीतत्रसंवित्तिर्युक्तेतायात्मकर्तृकेतिखशः खकारेमु

॥आत्ममानेखश्च॥ ॥आत्मनोमननमात्ममानः आत्ममानेवर्त्तमानान्मन्यतेर्धातोः सुप्युपपदेखशप्रत्ययोभवतिच कारण्णिनिश्च प्रत्ययार्थः कर्त्ता आत्मानमेवदर्शनीयत्वादिनागुणेनयुक्तंमन्यते तदायंविधिः दर्शनीयमात्मानं मन्यतेदर्शनीयंमन्यः दर्शनीयमानी पंडितंमन्यः पंडितमानी आत्ममानइतिकिं दर्शनीयमानीदेवदत्तोयज्ञदत्त स्य॥ ॥भूते॥ ॥भूतइत्ययमधिकारोवर्त्तमानेलडितियावत् यदितऊर्ध्वमनुक्रमिष्यामः भूतइत्येवंतद्वेदितव्यं धात्व धिकाराच्चधात्वर्थेभूतइतिविज्ञायते वक्ष्यति करणेयजः अग्निष्टोमेनेष्टवानग्निष्टोमयाजी भूतइतिकिं अग्निष्टो

मर्थः दर्शनीयंमन्याकुमारीत्यात्रटिद्भूत्स्वार्थश्चशकारः सार्वधातुकसंज्ञार्थः दिवादित्वाच्छ्यन् तस्यानुदात्तेतिशिष्टोपिविकरणस्वरः सार्वधातुकस्वरंनबाध तइतिखशएवभवतिनिनिस्वरः दर्शनीयमानीदेवदत्तोयज्ञदत्तस्येतिकर्मणिषष्ठीतद्योगेपस्यापिदर्शनीयशब्दस्यगमकत्वात्समासः॥ ॥भूते॥ ॥भूतस ज्ञाप्रपदस्त्वात्तत्त्वंभूतशतशब्देनोच्यतेतत्रनज्ञायतेकस्मिन्भूतइतिकिंसाधनेभूतेकिंवाधात्वर्थेतिआहधात्वधिकाराच्चेतिचशब्दः पूर्वोक्तेनार्थेना स्यसंगतिंद्योतयतिधात्वर्थेभूतइतिननुधात्वधिकारादानोभूतइतियुक्तंनतुधात्वर्थेभूतइतिउच्यतेप्रयोगेप्रत्ययस्यपोसंभूतत्वमर्थस्येववविशेषणंभ वितुमर्हतिविशेषणांतरवत्तनतुशब्दस्यतस्याभिधेयप्रतिपादनेव्यग्रत्वाद्विशेषणसंबंधंप्रत्ययोपपत्त्वात् किंचनित्योधातुः अनित्यत्वेपिभूतात्प्रत्यय विधिस्तुपपन्नः उच्चारितलक्षणेभूतत्वेविशेषणंमर्थंनत्वनुच्चारितात्प्रत्ययविधिः संभवतिनित्यश्चायंभूतशब्दोतिक्रान्तवाचीतितिद्योपासितरेतात्प्र

यत्वादप्रसिद्धिरित्यचोद्यं॥ २७ ॥ ॥

का॰प॰ ॥ ॥करणे॥ ॥फलनिरनुवर्त्तिनत्वशिति॰ अत्रोक्तोहेतुः अनिरनुवर्त्तितेनत्वकिति अत्रोक्तोहेतुः अग्निष्टोमयाजीति ननु चाग्निष्टोमशब्दः कर्मना
७८ मधेयं तत्कथमग्निष्टोमस्य याजिं प्रति करणत्वं न हि तदेव तत्र कारणं भवति इदं तु पुनः मुदाहरणं सोमेनेष्टवान्सोमयाजी मान्त्राप्येनेष्टवान् सान्त्राय्ययाजीति
तत्राह अग्निष्टोमः फलभावनायां करणं भवतीति॰ स संयाग एवाग्निष्टोमः यागोपि फलभावनायां करणं फलस्य स्वर्गादेर्भवितोया भावना उत्पादना तस्या
मित्यर्थः ननु दीक्षणीयादि रूढवसानीयां तो ज्योतिष्टोमाख्यो याग एव स्वर्गभावना न तदतिरिक्तः कश्चिद्व्यापारो यजमानस्यास्ति यत्र यागः कारणमभ्युते
उच्यते द्विविधो यजमानव्यापारः सामान्यरूपो विशेषरूपश्चेति तत्र सामान्यरूपश्चोदासीन्यप्रच्युतिरूपः कृतिप्रयत्नादिपदाभिलप्यः वाद्यस्तु दीक्षणी

॥करणोपजन४॥ ॥फलनिरनुवर्त्तिनत्वशत्यन्नेद्भूतोः करणत्वपपदेशनिति॰
प्रत्ययो भवति॰ अग्निष्टोमयाजी॰ वाजपेययाजी॰ अग्निष्टोमः फलभावनायां
करणं भवति॥ ॥छ॥ ॥

यादिरूढवसानीयां तः प्रतिरूप एव एवमोदनं पचतीत्यादिष्वप्यात्मगुणः प्रयत्नो वास्यभ्याधिश्रयणादि ईप्सितः फलं हि प्रेप्सन्न तदर्थं प्रयतते नो ए॰म॰
दासीन्येनोपायमुपायं जिज्ञासते जानीते चलतो वोपायमनुतिष्ठति से स्वाभिष्टः स्वर्गादि फलो ईशो न प्रहृत्तात्कृतिभवितेत्युच्यते सा च भाव्यं करणमितिक ७८
र्त्तव्यताञ्चेति त्रितयमपेक्षते रदमनेनेत्थं भावयेदिति यथाह भावनापेक्ष्यमाणा हि साधनं विंफलसमे साधनानुग्रहः कोवेलन्तुमस्त्रमपेक्षतार
तिसेषा सामान्यरूपा प्रवृत्तिर्न शास्त्रकटाक्षमपेक्षते विशेषरूपा त्वपेक्षते न तथा हि फलार्थी तदुपायं जिज्ञासते तदुपायं जिज्ञासमानः शृणोति
ज्योतिष्टोमेन स्वर्गकामो यजेतेति तत्र च पुरुषप्रवर्त्तनारूपो विधिः श्रूयते॥ ॥

नचापुरुषार्थे पुरुषः प्रवर्त्तत इति विध्यवरुद्धाभावानाभामापेक्षायां समानपदोपात्तमपिहुः स्वरूपं धात्वर्थमपहाय पदांतरोपात्तमपि पुरुषोपस
र्जनमपि सुखरूपं स्वर्गमेवावलंबते ततः करणापेक्षायां समानपदोपात्तो धात्वर्थः करणं भवति यश्चात्र निक्षिप्तमोक्षान्तरीक्षणीयादीति कर्त्तव्यतया
चेतीत्येषा मीमांसकमर्यादा यत्र तु न विध्यवरोधो भावनायास्तत्र धात्वर्थ एव भाव्यो भवति यथा पचति पाकं करोति गच्छति गमनं करोतीत्यादि निर्दि
श्यते ननु भावनया संपद्यमानस्य बाह्यव्यापारस्य कथं तत्र करणत्वं को दोषः करणं खलु सर्वत्र कर्तृव्यापारगोचरः कुठारेण छिनत्तीत्यत्रापि उद्यम
ननिपातनरूपेण कर्तृव्यापारेणाप्यमानस्यैव कुठारस्य तत्र करणत्वं तद्वदेव कथं द्विधाभवनरूपेण फलेनागच्छिन्नयोस्तयोश्छेदनरूपत्वं न स्वरूपेण

॥कर्मणि हनः॥ ॥कर्मण्युपपदे हन्तेर्धातोर्णिनिप्रत्ययो भवति भूते॰ पितृघ्न
घाती। मातुलघाती॰ कुत्सितग्रहणं कर्तव्यमिह माभूत चौरं हतवान्॥ १८ ॥

छेदकेदर्शनात सोऽपि हि वस्त्रमुद्यच्छते निपातयति कथं च द्विधाभवनाभावान्न छिनत्तीत्युच्यते तदेवमुद्यमननिपातयोश्छेदरूपत्वं कुठारगोचर
त्वनिबंधनमिति तस्य तत्र करणत्वं तथेहापि भावनायाः स्वर्गभावनारूपत्वमग्निष्टोमव्यापारगोचरत्वनिबंधनमिति तस्य तत्र करणत्वं तदिदमु
क्तं फलभावनायाः करणमिति यं हि फलं धात्वर्थं च संपादयति तत्र फलभावनारूपत्वेन यो व्यापारः करणमित्यर्थः ४ नन्वेवमपि यत्पर्थे प्रतिष्ठ
ग्निष्टोमः करणं न भवति मा भूत्तत्र करणत्वं करणं तावत संबंधिवयजिना सामानाधिकरण्येन तत्र यथा भावनापि धातोरेव वाच्या न प्रत्ययस्य तत
त्र धात्वर्थैकदेश एकदेशांतरस्य करणं अग्निष्टोमशब्दश्च तत्रैकदेशांतरे वर्त्तत इति न किंचिदनुपपन्नं॥ ॥कर्मणि हनः॥ ॥कुत्सितग्रहणमिति
पितृत्वमवधारितमायः कर्तृत्वं कुत्स्यते तत्रायं प्रत्यय इति वक्तव्यमित्यर्थः॥ १९ ॥ ॥

का॰प॰ ।ब्रह्म॥ ॥चतुर्विधश्चात्रेतिधातूपपदकालप्रत्ययविषयः भाष्येधातूपपदविषयंनियमद्वयंप्रदर्शितंतदुपलक्षणंनतुनियमांतरस्याव्यावृत्त्यर्थमिति
गम्यतेब्रह्मादिष्वेवहंतेरितिधातुनियमः अत्रापिनियमेभूतइत्याश्रयणात्कालांतरेउपपदांतरेपिभवत्येवपुरुषंहंतिहनिष्यतिवापुरुषहेति।ब्रह्मा
७९ दिषुहंतेरेवेत्युपपदनियमः अत्रापिभूतइत्याश्रयणात्कालांतरेधात्वंतरादपिभवत्येवब्रह्मजयतिजेष्यतिवाब्रह्मजिदितिभूतकालएवक्विबेवेतिकालनि

॥ब्रह्मभ्रूणवृत्रेषुक्विप्॥ ॥कर्मणीतिवर्त्तते। ब्रह्मादिषुकर्मसूपपदेषुहंतेर्धातोः क्विप्प्रत्ययोभवति। ब्रह्महाः
वृत्रहा। किमर्थमिदमुच्यते। यावतासर्वधातुभ्यः क्विब्विहितएव। ब्रह्मादिषुहंतेः क्विप्वचनंनियमार्थं। चतुर्वि
धश्चात्रनियमइष्यते। ब्रह्मादिष्वेवहंतेः नान्यस्मिन्नुपपदे पुरुषंहतवानिति। ब्रह्मादिषुहंतेरेवनान्यतः ब्रह्मा
धीतवानिति। ब्रह्मादिषुहंतेर्भूतेक्विबेवनान्यः प्रत्ययः।तथाभूतएवनान्यस्मिन्काले। ब्रह्माणंहंतिहनि
ष्यतिवाइति। तदेतद्बहुसमाश्रयस्यबहुलग्रहणस्यपुरस्तादपकर्षाल्लभ्यते॥ ॥बहुलंछंदसि॥ ॥पूर्वेण
नियमात्प्राप्तः क्विब्विधीयते। छंदसिविषयेउपपदांतरेपिहंतेर्धातोर्बहुलंक्विप्प्रत्ययोभवति। योमातृहा।
नचभवति। पितृघातः॥ ॥छ॥ ॥ एम४

यमः नान्यः प्रत्ययइतियथाकर्मणिहनः कर्मण्युपपदेउपपदांतरेतुभूतेपिप्रत्ययांतरंभवत्येवपितृव्यंहतवान्पितृव्यघातीतिसोपपदश्चप्रत्ययोनिय ७९
मेनव्यावर्त्ततेनिष्ठातुभवत्येवब्रह्महतवानितितथाभूतएवेतिप्रत्ययनियमः अत्रापिब्रह्मादिषुहंतेरित्याश्रयणादुपपदांतरेधात्वंतरेचकालांत
रेपिभवत्येवकथंपुनरेकस्मिन्नेवयोगेचतुर्विधोनियमोलभ्यतइत्याहतदेतदितितिअपरस्यमाणविशेषलाद्देवचतुर्विधोनियमोलब्धुंशक्यतेतत्रैवत
योद्बहुलकमेतदुक्तंवेदितव्यं॥ ॥छ॥ ॥

॥सुकर्म॥ ॥स्वादिष्विति सुशब्दं वर्जयित्वेत्यनंतरमेवाभिधानादेतद्गुणासंविज्ञानो बहुव्रीहिः बाकुत्साश्रयणेनैवमुक्तं आद्यो सामर्थ्यतिवृत्ति
विधश्चेति एतद्बहुलग्रहणानुवृत्तेरेव लभ्यते कालोपपदप्रत्ययविषय इति तत्र कालनियमात्कर्म कृतवान् कर्मकारस्यणन भवति उपपदनियमात् मंत्र
मधीतवान् मंत्राध्यायः स एव भवति न तु क्विप्प्रत्ययनियमात् मंत्रं करोति करिष्यति वेति विवक्षायामणेव भवति न तु। क्विप् शास्त्रकृदिति क्विप् चेति
क्विप्॥ ॥सोमे॥ ॥कालधातूपपदप्रत्ययविषय इति तत्र भूतकालस्यापि क्विपि नियतत्वात्सोमं सुतवान् सोमं सावदर्शणन भवति। तथा धातोः सोम

॥सुकर्मपापमंत्रपुण्येषु कृञः॥ ॥कर्मणीति वर्त्तते· तदसंभवात्सुशब्दं वर्जयित्वा परिशिष्टानां विशेषणं·
स्वादिषु कर्मसूपपदेषु करोतेर्धातोः क्विप्प्रत्ययो भवति· सुकृत्· कर्मकृत्· पापकृत्· मंत्रकृत्· पुण्यकृत्· अ
यमपि नियमार्थ आरंभः· त्रिविधश्चात्र नियम इष्यते धात्वनियमं वर्जयित्वा· कालोपपदप्रत्ययविषयः· धातोरनि
यतत्वादन्यस्मिन्नप्युपपदे भवति शास्त्रकृत्· भाष्यकृत्॥ ॥सोमे सुञः॥ ॥कर्मणीत्येव· सोमे कर्मण्युपपदे
सुनोतेर्धातोः क्विप्प्रत्ययो भवति· सोमसुतौ· सोमसुतः· अयमपि नियमार्थ आरंभः· चतुर्विधश्चात्र नियम इष्य
ते कालधातूपपदप्रत्ययविषयः॥ ॥अग्नौ चेः॥ ॥कर्मणीत्येव· अग्नौ कर्मण्युपपदे चिनोतेर्धातोः क्विप्प्रत
्ययो भवति· अग्निचित्· अग्निचितौ· अग्निचितः· अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते॥ ॥१९॥ ॥ ॥

एवोपपदे नियतत्वात्सुरां सुतवान् सुरासाव इत्यणेव भवति तथा सोमस्य सुनोतावेव धातोर्नियतत्वात्सोमं क्रीतवान् सोमक्रीरिति क्विप् न भवति अणेव
तु भवति तथा क्विपो भूते नियतत्वात्सोमं सुनोति सोष्यति वेति विवक्षायां क्विप् न भवति अणेव तु भवति॥ ॥अग्नौ चेः॥ ॥अत्रापीत्यादि तत्र भूतका
लस्य क्विपि नियतत्वादग्निं चितवान् अग्निचाय इत्यणेव भवति धातोश्चाग्नावुपपदे नियतत्वाद् इष्टकाचिदिति न भवति अग्नेश्चिनोतावेव नियतत्वादग्निम
दिति न भवति क्विपश्च भूत एव नियतत्वादग्निं चिनोति चेष्यति वेत्यत्राभावः॥ ॥१९॥ ॥छू॥ ॥छू॥ ॥छू॥ ॥छू॥ ॥

का० व० कर्मणि॥ ॥कर्मणि हन इत्यतो नुवृत्तं कर्मग्रहणमुपपदं इदं तु कर्मप्रत्ययार्थं इत्याह कर्मण्येवकारक इति एवकारः पौनरुक्त्यनिरासः उपपदं तावत् कर्म
८० प्रत्ययार्थोपि कर्मैव तिअग्न्याख्यायां ग्रहणं रूढिसंप्रत्ययार्थमिति अग्निशब्दो लोके ज्वलने रूढः वेदे तत्समर्थ इष्टकाचयेपि प्रचुरः प्रयोगः य एवं विद्वानग्निं चि
नुते अग्निं चेष्यमाणाः इति समुखोऽजच्चनोवा भवतु इह तत्समत्वाख्याग्रहणो लोकप्रसिद्धिवशेन ज्वलन एव गम्यते तन्मा भूदिति इष्टकाचय एव गम्यतामित्याख्या
ग्रहणमित्यर्थः॥ ॥कर्मणि॥ ॥कर्मणीति वर्त्तमाने इति कर्मणि हन इत्यतः कर्त्तुः कुत्सानिमित्ते कर्मणीति यत् कर्म क्रियासंबद्धं कर्त्तुः कुत्सामाव

॥कर्मण्यग्न्याख्यायां॥ ॥चेः कर्मणीति वर्त्तते कर्मण्युपपदे चिनोतेर्धातोः कर्मण्येवकारके क्विप्प्रत्ययो भव
ति अग्न्याख्यायां । धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते । श्येनइव चीयते स्म श्येनचित् । कंकचित् । अ
ग्न्याख्यायां किं । अग्न्यर्थो हीष्टकाचय उच्यते श्येनचिदिति॥ ॥कर्मणीनिर्विक्रियः॥ ॥कर्मण्युप
पदे विपूर्वात्क्रीणातेर्धातोरिन्प्रत्ययो भवति । कर्मणीति वर्त्तमाने पुनः कर्मग्रहणं कर्त्तुः कुत्सानिमित्ते कर्मणि
यथा स्यात् कर्ममात्रे मा भूत् । सोमविक्रयी । घृतविक्रयी । तैलविक्रयी । इह न भवति धान्यविक्रायः॥ ॥दृशेः क्व
निप्॥ ॥कर्मणीत्येव । दृशेर्धातोः कर्मण्युपपदे क्वनिप्प्रत्ययो भवति । मेरुदृश्वा । परलोकदृश्वा । अन्येभ्यो
पि दृश्यत इति क्वनिपि सिद्धे पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थं॥ ॥राजनि युधिकृञः॥ ॥कर्मणीत्येव । राजन्श
ब्दे कर्मण्युपपदे युधेः करोतेश्च धात्वोः क्वनिप्प्रत्ययो भवति । ननु च युधिरकर्मकः अन्तर्भावितण्यर्थः सक ए म०
र्मको भवति । राजयुध्वा । राजानं योधितवानित्यर्थः ८०

हतीति तत्रेत्यर्थः सोमादीनां विक्रयः शास्त्रे निषिद्धः॥ ॥दृशेः॥ ॥प्रत्ययान्तरनिवृत्त्यर्थमिति प्रत्ययान्तरं सह निर्दिष्टं मनिन्वनिप्विचश्च सोपपदान्नि
वृत्तु भवत्येव परलोकं दृष्टवानिति॥ ॥राजनि॥ ॥ननु च युधिरकर्मक इति तत्कथं राजन्शब्दे कर्मवाचिन्युपपदे स्यादुक्तमिति भावः अन्तर्भावितण्य
र्थ इति अनेकार्थत्वाद्धातूनां लक्षणया वा यदा ण्यर्थमपि युधिर्वान्तर्भावयति तदा प्रयोज्येन कर्मणा सकर्मको भवतीत्यर्थः॥ ॥छ॥ ॥छ॥

॥सहे च॥ ॥असमस्तवचनत्वान्नोपपदं कर्मणा विशेष्यत इति अनन्तरस्य कर्मणो नितानुवर्त्तत इति भावः। न पुनरस्तु वर्त्तमानेस्यैवात्रास्संबंधः उत्तरत्राप्र
नुपयोगात्॥ सप्तम्यां॥ ॥मंदुरज इति वाजिशालायां मंदुरा स्याद्यः संज्ञा छंदसोर्बकुलमिति द्रूसः॥ ॥पंचम्यां॥ ॥बुद्ध्यादयस्यात्मगुणाः संस्कारो

॥सहे च॥ ॥सहशब्दे चोपपदे युधेः कृञश्च धातोः क्वनिप् प्रत्ययो भवति। असमस्तवाविलान्नोपपदं कर्मणा विशेष्य
ते। सहयुध्वा। सहकृत्वा। ॥सप्तम्यां जनेर्डः॥ ॥सप्तम्यंत उपपदे जनेर्धातोर्ड प्रत्ययो भवति। उपसरे जातः उपसरजः।
मंदुरजः॥ ॥पंचम्यामजातौ॥ पंचम्यंत उपपदे जातिवर्जिते जनेर्धातोर्ड प्रत्ययो भवति। बुद्धिजः। संस्कारजः। खेदजः। दु
खजं। अजाताविति किं। अश्वाज्जातः। हस्तिनो जातः॥ ॥उपसर्गे च संज्ञायां॥ ॥उपसर्गे चोपपदे संज्ञायां विषये ज
नेर्धातोर्ड प्रत्ययो भवति। प्रभुत्वयोग्याधिः संज्ञा। अथेमा मानवीः प्रजाः॥ ॥अनौ कर्मणि॥ ॥अनुपूर्वाज्जनेर्धा
तोः कर्मण्युपपदे ड प्रत्ययो भवति। पुमांसमनुजातः पुमनुजः। स्त्रियमनुजातः स्त्र्यनुजः॥ ॥अन्येष्वपि दृश्यते॥
॥अन्येष्वप्युपपदेषु कारकेषु च जनेर्धातोर्ड प्रत्ययो दृश्यते सप्तम्यामित्युक्तं असप्तम्यामपि दृश्यत इत्यर्थः। न जातः
अजः। द्विर्जाताः द्विजाः। पंचम्यामजाताविह्युक्तं जातावपि दृश्यते। ब्राह्मणजो धर्मः। क्षत्रियजं युद्धं। उपसर्गे च संज्ञाया
मित्युक्तं असंज्ञायामपि दृश्यते। अभिजाः केशाः। अनौ कर्मणीत्युक्तं अकर्मण्यपि दृश्यते अनुजातः अनुजः। अपि
शब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादपि भवति। काकातेत्पः परितः खाता परिखा। आखा। १० ॥

रागः खेदात् स्त्री बुभुक्षातिरिति निर्दर्शनात्॥ ॥उपसर्गे॥ ॥प्रजेति प्राणिजातस्यैषा संज्ञा॥ ॥अनौ॥ ॥पुमांसमनुजात इति। पुमांसमनुरुध्य जा
त इत्यर्थः। तेनास्य सकर्मकत्वं पुमनुज इति पुंसः संयोगांतलोपः॥ ॥अन्येषु॥ ॥द्विर्जात इति मातुरग्रे विजननं द्वितीयं मौञ्जिबंधनं। तत्रास्य माता
सावित्री पिता त्वाचार्य उच्यते॥ १० ॥ ॥

का·प८०
८१

॥निष्ठा॥ ॥क्तक्तवतू निष्ठेत्युक्तमिति ककारः कित्कार्यार्थः उकार उगित्कार्यार्थः अत्वसंतस्येति विशेषणार्थश्च निष्ठायामित्यादि। अप्रसिद्धिनिष्प
त्तिः कस्य संज्ञायाः संज्ञिनो वा कथमित्याह संज्ञयेति। यद्धि क्तक्तवत्वग्रहणं क्रियेत इह च संज्ञा विधीयेत न तेन स्यादित्तरेतराश्रयत्वमिति संज्ञयेत्युक्तं
मतोश्चतयोरिति लोके शास्त्रे वा गता क्त्वा लोके सानुबंधावेतौ स्तः शास्त्रे यद्यपि त्रीतः कः नपुंसके भावे क्त इति क्तः स्वरूपेण विहितो स्ति भूते तु काले

॥निष्ठा॥ ॥क्तक्तवतू निष्ठा इत्युक्तं स निष्ठासंज्ञकः प्रत्ययो भूते भवति· कृतः कृतवान्· भुक्तः
भुक्तवान्· निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः संज्ञया क्तक्तवतू भाग्येते भतोश्चतयोः संज्ञ
याभवितव्यं नैष दोषः भाविनी संज्ञा विज्ञायते· स भूते भवति यस्योत्पन्नस्य निष्ठेति संज्ञा भवती
ति· सामर्थ्यात् क्तक्तवत्वोर्विधानमेतत्॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥छ॥

एम४
८१

नास्ति क्तवतुस्तु न कार्यमस्तीति भावः भाविनी संज्ञेति संज्ञिनो भावित्वात् संज्ञापि भाविनी सूत्रशाटकवत् यथा स्य सूत्रस्य शाटकं वयेति तंतुवायं उक्तः स
पश्यति यदि शाटको न वानक्यः अथ वातव्यो न शाटको वातव्यश्चेति विप्रतिषिद्धं मन्ये स वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति सामर्थ्यादिति क्तक्त
वतू निष्ठेति वचनात् अन्यस्योत्पन्नस्य निष्ठेति संज्ञाया अभावः सामर्थ्यं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥